(૨૬) "સાંખ્યદર્શનના પ્રકૃતિ-પુરુષ મતનો જૈનદર્શનના કર્મ-આત્મા મત સાથે નિકટ મેળ છે," એવું લખનાર પ્રો. એ ભૂલે છે કે બે વચ્ચે મહાન અંતર છે. સાંખ્યો પુરુષને કુટસ્થનિત્ય, અબદ્ધ, અમુક્ત, અજ્ઞાન, અસુખી માને છે. જૈનો આત્માને પરિણામી, બદ્ધમુક્ત, અનંત સુખી માને છે. સાંખ્યો પ્રકૃતિને જગતનું ઉપાદાન કહે છે. 'પ્રકૃતિનો પરિણામ એ જ પંચભૂત, અને ઇન્દ્રિયો વગેરે જગત,' એમ એ કહે છે. ત્યારે જૈનો જગતની વિવિધ રચનાઓમાં કર્મને માત્ર નિમિત્ત કારણ માને છે, બાકી જગતનું કલેવર તો જુદા જુદા દ્રવ્યોનું બનેલું કહે છે. સાંખ્યો જડ પ્રકૃતિના પરિણામમાં જ્ઞાન, ઇચ્છા વગેરે ધર્મો માને છે. ત્યારે જૈનો જડ કર્મના આવા ધર્મો નથી માનતા, સાંખ્યો સદા શુદ્ધ મુક્ત પુરુષનેય મોક્ષ પુરુષાર્થ જરૂરી માને છે. જૈનો બદ્ધ આત્માને જ એ જરૂરી, મુક્તને નહિ એમ કહે છે. કેવા મહાન તફાવત !

(૨૭) દિદૃક્ષાના પ્રસંગનાં સૂત્રોને પ્રો. ગૂઢ અને ગુંચવણભર્યા માની એને સ્પષ્ટ ન સમજી શકે, એ તો ઠીક; પણ ટીકાકાર મહર્ષિનેય પોતાની સમજણ માટે સહાય ન કરી શકવાનું, અર્થાત્ ન સમજી શકવાનું કહે, એ અજ્ઞાન બચ્ચું બાપને અજ્ઞાન કહે, એના જેવું છે. ટીકાકારે કેવી સરસ સ્પષ્ટતા કરી છે, એ આગળ વિવેચન-ગ્રંથના પૃષ્ઠમાં જુઓ.

(૨૮) 'न तदुच्छेदेऽनुत्पादः' નો અર્થ સ્પષ્ટ છે. સંસાર સત્ છે. એનો સર્વથા ઉચ્છેદ જો થઇ શકે, તો તદ્દન અસત્ સંસારની ઉત્પત્તિ ય ન થઇ શકે એવું નહિ, અર્થાત્ થઇ શકે. જો સત્નો સર્વથા વિનાશ થઇ શકે, તો અસત્ની ઉત્પત્તિ ય

કેમ ન થાય ? આ અર્થ પ્રો. ન સમજી શક્યા, તેથી એમણે 'न तदुच्छेदेन उत्पादः' એમ ખોટો પદચ્છેદ કર્યો અને 'સંસારના વિનાશથી મોક્ષ ઉત્પન્ન નહિ થઇ શકે' એવો અર્થ કર્યો એ પ્રો. નો કેટલો કરુણ અબોધ !

(૨૯) "હું 'न अनादिमान् भवः इति चेत्' એમ લગાડવા ધારું છું" એવું કહેતાં પ્રો. ની ખ્યાલ બહાર એ લાગે છે, કે ઠેઠ 'न भवाभावो सिद्धि' થી માંડીને પ્રશ્નોત્તરો જ શરૂ થાય છે. જુઓ આ વિવેચન ગ્રંથ. ત્યાં માત્ર અહીં જ 'इति चेत्' શું કામનું ?'

(૩૦) પ્રો. 'નિરાધારોऽન્વયઃ કૃતો નિયોગેન' ઇત્યાદિ ખાસ સ્પષ્ટ કરવા યોગ્ય સ્થળો ન સમજી શકવાથી ચર્ચવું છોડી દે છે, એ એમને માટે શોભાભર્યું બન્યું છે. એવું જો સર્વત્ર કર્યું હોત તો વધુ શોભાભર્યું થાત.

(૩૧) 'समयाः अत्र ज्ञातम्' અહીં ભવ્યોની અનંત સંખ્યા સમજાવવા ત્રણે કાળના આઠમે અનંતે રહેલા સમયો (અવિભાજ્ય સૂક્ષ્મકાળ) ને દૃષ્ટાંત તરીકે લીધા છે. પ્રો. આ જિનગામ-પ્રસિદ્ધ વાત પણ ન સમજ્યા. તેથી ટીકા કરતાં સારો અર્થ બતાવવા 'સમયાત્' પદ કલ્પી, 'શાસ્ત્રથકી' એવો અર્થ કરવા ગયા. પણ તેથી તે 'ज्ञातम्' એટલે દૃષ્ટાંત તે કયું, એ કહેવું રહી ગયું, એ ન સમજ્યા. જ્ઞાતમ્ એટલે જાણેલું છે એ અર્થ પણ સંગત નથી. કેમકે સમયાત્‌ની પૂર્વે 'इति' પદ નથી.

(૩૨) અભવ્ય કરતાં મોક્ષે કદી ન જવાવાળા ભવ્યમાં શો તફાવત ? એના સમાધાન માટે ગ્રંથમાં ગાંઠાળું કાષ્ઠ અને પડી રહેલું શુદ્ધ યોગ્ય કાષ્ઠ એને દૃષ્ટાંત તરીકે લીધા છે. પણ પ્રો.

એ ન સમજવાથી સમાધાન તરીકે ત્યાં લખે છે કે ઘણા યોગ્ય કાષ્ઠ પ્રતિમા બન્યા વિનાનાં રહે છે !

(૩૩) અંતે જિનાજ્ઞા કોને આપવી એના પ્રસંગમાં પ્રો. જે કહે છે કે અયોગ્યને દીક્ષા ન આપવામાં એનું હિત છે. તે કથન તદન અધૂરું છે. કેમકે અહિ તો દીક્ષા જ નહિ પરંતુ કોઇ પણ જિનાજ્ઞા અયોગ્યને ન આપવાનું ફરમાન છે.

(૩૪) બીજી સંખ્યાબંધ ભૂલો આ પ્રો. પોતાના અંગ્રેજી ભાષાન્તરમાં કરે છે. તેનો સહજ નમુનો જુઓ :-

(ક) સૂત્ર પહેલામાં જ ચાર તાત્ત્વિક ભૂલો છે :- 'अणाइकम्मसंजोग' માં અનાદિ એવો સંયોગ લેવાનો છે, ત્યારે પ્રો. અનાદિ કર્મ કહે છે. તે ખોટું છે. જૈનમતે કોઇ કર્મ અનાદિનાં છે જ નહિ. પણ આત્મામાં કર્મનો સંબંધ એટલે કર્મવાળાપણું અનાદિનું છે.

(ખ) 'दुःखानुबंधी' નો અર્થ 'દુઃખ તરફ દોરે છે' લખ્યો. એ ખોટો છે, કેમકે એ અર્થ તો બીજા 'दुःखफल' માં આવી જાય છે. તેથી ત્રીજી વાત કઇ ? સાચો અર્થ 'દુઃખની પરંપરા (Series) ચલાવે છે' એવો છે. કેમકે 'અનુબંધ-બંધની પછી બંધ,' સંસાર એકવાર દુઃખોત્પાદક પછી પણ દુઃખોત્પાદક છે.

(ગ) 'तस्स विवागसाहणाणि' માં વિપાક તથાભવ્યત્વાદિનો કહ્યો છે, પણ પ્રો. 'પાપકર્મોનો' વિપાક લે છે, તે ખોટું છે. કેમકે પાપકર્મ એની સ્થિતિ પૂર્ણ થતાં સ્વતઃ પાકે છે. વળી અહિ બતાવેલ ચતુઃશરણગમનાદિ સાધનો એને પકવી શકે નહિ. તથા 'तस्स' એ એ. વ. માં છે.

(ઘ) 'संकिलेस' એટલે સંક્લેશ. એ જિનાગમ પ્રસિદ્ધ શબ્દ છે, એનો અર્થ કષાયની તીવ્રતા થાય છે. પ્રો. તેનો દુઃખ એવો અર્થ કરે છે, તે ખોટો છે. કેમકે માત્ર દુઃખમાં જ નહિ, સુખમાં ય ઘણીવાર જે ગુસ્સો, અભિમાન, માયા, તૃષ્ણા વગેરેની તીવ્રતા સંભવે છે, તે પણ સંક્લેશ છે.

(ચ) બીજા ફકરામાં 'अनुत्तरपुण्यसंभार' થી અનુત્તર એટલે સર્વશ્રેષ્ઠ એવો, પુણ્ય સંભાર એટલે પુણ્યનો પ્રાગ્ભાર, જે તીર્થંકર નામકર્માદિ, તે લેવાનું છે. તે શ્રી અરિહંત પ્રભુની જ ખાસ વિશેષતા છે. તે ન સમજી પ્રો. સામાન્યથી સર્વશ્રેષ્ઠ પુણ્યોના સમૂહ લે છે. વળી આમાં પુણ્યનો અર્થ ગુણ કર્યો તે પણ ખોટો છે.

(છ) ત્રીજા ફકરામાં કેવળજ્ઞાનનો અર્થ 'સર્વવિષયનું જ્ઞાન અનંત જ્ઞાન' એવો થાય છે એની જગ્યાએ પ્રો. 'ખામી વિનાનું જ્ઞાન' એવો અર્થ લખે છે, તે અર્થ સમજ વિનાનો છે.

(જ) બીજું કૃતકૃત્યમાં કૃત્યનો અર્થ પ્રો. ફરજો કરે છે, પણ તે ખોટું છે. કેમકે ફરજો પૂરી કરેલી હોય છતાં પોતાની અપૂર્ણ સ્થિતિને પૂર્ણ કરવાનું કામ જ્યાં સુધી ઊભું રહે છે, ત્યાં સુધી મોક્ષ નથી. માટે કૃત્યનો અર્થ દરેક કાર્ય એવો લેવાનો છે, કૃતકૃત્ય એટલે હવે જેને કાંઇ જ કરવાનું રહેતું નથી તે.

(ઝ) ચોથા ફકરામાં સાધુને પરોપકાર-નિરત કહ્યા. એનો અર્થ પ્રો. બીજાને મદદ કરનારા એવું કહે છે, તેને બદલે શ્રેષ્ઠ ઉપકાર કરનારા (Benevolent) કહેવા જોઇએ. સાધુઓ ગૃહસ્થને તો મદદ કરનાર નહિ, પણ ઉપકાર કરનારા કહેવાય છે.

આ તો સામાન્ય ભૂલોનું દિગ્દર્શન છે, પણ પ્રો. ના આ ભાષાંતરમાં આગળ ઉપર તો ઘણી અસહ્ય અનેક ગંભીર ભૂલો છે, જેને અહીં સંમાર્જવાનો અવકાશ નથી. પણ તે ભૂલો આ વિવેચન-ગ્રંથ પરથી સમજી શકાશે. વિદ્વત્-શરણ્ય શ્રી હરિભદ્રસૂરીશ્વરજી મહારાજના લેખમાં ભૂલો કાઢવા જતાં, કે એમના કરતાં સારો અર્થ બતાવવા જતાં પ્રોફેસરે પોતે કરેલી સંખ્યાબંધ ભૂલોનું અને ભાષાંતરમાં કરેલ અનેકાનેક તાત્ત્વિક ખામીઓનું મુખ્ય કારણ તો એમને ગુરુગમનો અભાવ લાગે છે. આ પંચસૂત્રકમાં બતાવેલ અવશ્ય કર્તવ્ય ગુરુની નિશ્રા વિના કેવળ ભાષાજ્ઞાનથી કે ઇધર-ઉધરના પાના-પ્રસ્તાવનાઓ ઉથલાવી જવાથી ગંભીર જિનાગમોના સાચા અર્થ સમજાઇ જાય; એ માનવું મિથ્યા છે, અયુક્ત છે. ગીતાર્થ ગુરુઓના માર્ગદર્શન વિના વાચા કે કલમ ઉપાડવાનું પરિણામ કેટલું કટુ આવે છે, તે ઉપર બતાવ્યું છે. જે કોલેજના વિદ્યાર્થીઓ વાસ્તવ વિદ્વાન સાધુઓના સંસર્ગમાં નથી આવતા, તે આવા પ્રોફેસરોના લેખથી કેવી વિદ્યા પામે એ પણ સમજાય એવું છે. એવી વિદ્યા પર બી. એ; એમ. એ; પી.એચ.ડી. નાં વૈભવી બિરુદો આપતાં પહેલાં અને એવા પુસ્તકોને પાઠ્ય પુસ્તકો બનાવવા પૂર્વે યુનિવર્સિટીએ પૂરતી તપાસ કરવી ઘટે. કોલેજીયનોએ પણ આ ઉપરથી સદ્વિદ્યા માટે ખૂબ સાવધ રહેવું ઘટે.

પ્રાંતે, મોક્ષના આદર્શવાલા આર્યમાત્રને સ્વાધ્યાય માટે, તથાભવ્યત્વના પરિપાક માટે આ શ્રી પંચસૂત્રશાસ્ત્ર અતિ આવશ્યક છે, આનો રોજ સ્વાધ્યાય કરવો જોઇએ, જેથી સાચો મોક્ષાધિકાર પ્રાપ્ત થાય. આના નિરુપણો ઘણા મૌલિક અને વ્યાપક છે. જેમ દ્રવ્યાનુયોગમાં તત્વાર્થાધિગમ, તેમ

ચરણકરણાનુયોગમાં આગમો પછી પંચસૂત્ર મૂલ આધારસ્થંભ તરીકે લાગે છે. પંચસૂત્રનો આધાર આગમો છે. વિધિવાદનો આ સંક્ષિપ્તસંગ્રહ ગ્રન્થ નિદિધ્યાસન માટે પણ પરમ ઉપકારક છે. આનો વિવેચન ગ્રન્થ પણ ઘણા પદાર્થોને અલ્પ શબ્દમાં સંગ્રહે છે. તેથી ખૂબ સ્થિરતાપૂર્વક પ્રત્યેક શબ્દ, પ્રત્યેક વાક્ય અને પ્રત્યેક પ્રકરણ પુનઃ પુનઃ મનનીય છે.

**મુક્તિદ્વાર,**
**દશા પોરવાડ સોસાયટી**
**અમદાવાદ.**
**આસો સુદ ૩**
**વિ. સં. ૨૦૨૨**

લી. કૃપાક્ષીરોદધિ ગુરુદેવ
સિદ્ધાંતમહોદધિ પૂ. આચાર્યદેવેશ
**વિજયપ્રેમસૂરીશ્વરજી**નો વિનેયાણુ **ભાનુવિજય**
**(આ. શ્રી વિજય ભુવનભાનુસૂરીશ્વરજી મ.)**

## આનંદનીય-અનુમોદનીય

પ. પૂ. દાદાગુરુદેવશ્રીની આ અણમોલ પ્રસાદી સેંકડો-હજારો વર્ષો સુધી સાધકોને કૃતાર્થ કરતી રહે એ ઉદ્દેશથી આ સંસ્કૃત તાત્પર્યાનુવાદનું સર્જન તો થયું... પણ એના સંપાદન માટે વિશિષ્ટ વિદ્વાનોનો સહયોગ આવશ્યક હતો. પ પૂ. શાસનપ્રભાવક પંન્યાસપ્રવર **શ્રી મુક્તિવલ્લભવિજયજી ગણિવર્ય**ના શિષ્યરત્ન પ. પૂ. વિદ્વદ્વર્ય મુનિરાજ **શ્રી વીતરાગવલ્લભવિજયજી મ. સા.** તથા પ. પૂ. શાસનપ્રભાવક પંન્યાસપ્રવર **શ્રી યશોવિજયજી ગણિવર્ય**ના શિષ્યરત્ન પ. પૂ. વિદ્વદ્વર્ય મુનિરાજ**શ્રી નિર્મલયશ-વિજયજી મ. સા.**એ પોતાના અમૂલ્ય સમયનો વિનિયોગ કરીને આ પ્રબંધના સંપાદનમાં સુંદર સહયોગ આપ્યો છે, તે અત્યંત અનુમોદનીય છે. તેમને ખૂબ-ખૂબ અભિનંદન-ધન્યવાદ ઘટે છે.

अथ

# पञ्चसूत्रोपनिषद्

## मङ्गलम्

ऐन्द्रवृन्दविवन्दारु-वृन्दारकाभिवन्दितम् ।
श्रीनाभेयं जिनं स्तौमि, कुन्दवृन्दसमस्मितम् ।।१।।

धर्मचक्रमहाचक्री, चक्रिण अग्रजोऽजनिः ।
चक्रिचक्रातिगोऽजितो, जितं जापयताज्जिनः ।।२।।

सङ्घवात्सल्यसावित्री-सूतः सूतशिवः शिवः ।
सम्भवः सम्भवः श्रीणां, भवाभावकृदस्तु वः ।।३।।

करिकर्णाङ्गनाऽपाङ्ग-लोलं लोलतमत्वतः ।
कपिवत् कपिवन्मेऽन्तः, सार्वाभिनन्दनं श्रयेत् ।।४।।

सुमेरौ सुरसुरीभिः, स्नापितोऽपि ससम्भ्रमम् ।
सुमतिस्वनुवृत्तिस्स्यात्, सुमतिः सुमतिप्रदः ।।५।।

प्रवालजालसङ्काशा, गुञ्जार्धरागसन्निभाः ।
पद्मप्रभप्रभाः पान्तु, भावारिकोपकल्पिताः ।।६।।

पृथ्वीव प्रक्षमः पृथ्वी - प्रसूतः प्रसूतः प्रभुः ।
सुपार्श्वः श्रीसुपार्श्वोऽसौ, सार्वस्तनोतु सार्वताम् ।।७।।

चन्द्रप्रभाप्रभः प्रेष्ठ - चन्द्रलाञ्छनलाञ्छितः ।
चन्द्रपुरीपतिः सोऽयं, पातु चन्द्रप्रभः प्रभुः ॥८॥

नीहारहारसङ्काशा, कुन्दवृन्दसमप्रभा ।
शुभ्राभ्रशुभ्रध्यानं वः, सुविधिशोचिरादिशेत् ॥९॥

कर्पूरपूरनिर्जेता, चन्द्रचन्द्रकरातिगः ।
अस्तश्रीखण्डखण्डोऽसौ, शीतलः पातु वो जिनः ॥१०॥

सिंहपुरीपतिः सिंह-सत्त्वः सत्त्वकृपापरः ।
श्रेयःश्रीशरणः स्वामी, श्रेयांस श्रेयसेऽस्तु वः ॥११॥

अतिरम्भोर्वशीतिलोत्तमा अप्सरउत्तमाः ।
विहाय यतितामितो, वासुपूज्यः पुनातु वः ॥१२॥

विमलकेवलालोका-ऽऽलोकितालोकलोककः ।
विमलोऽसौ विभुर्दद्या-द्विमलालोकमञ्जनम् ॥१३॥

साद्यनन्तस्थितिः शान्त - सान्तानादिस्थितिः स्थिरः ।
अनन्तोऽनन्तमानन्दं, दिशतु द्विषदन्तकृत् ॥१४॥

रत्नपुरीपती रत्न - त्रयीरत्नफलात्मकः ।
धर्मनाथो मदोन्माथः, स्वसनाथान् करोतु वः ॥१५॥

प्राज्यं षट्खण्डसाम्राज्यं, सम्राट् सन्त्यज्य धूलिवत् ।
श्रामण्यं प्रतिपन्नोऽसौ, शान्तिः शान्त्यै जिनोऽस्तु वः ॥१६॥

यस्मिन् शरण्यतापुण्य-कारुण्यकेलिकोविदे ।
कुन्थोरप्यपवादो न, कुन्थुनाथोऽस्तु स श्रिये ।।१७।।

संसारावारपारस्य, पारगस्य पदाम्बुजे ।
स्तुवे श्रीअरनाथस्य, चक्रिणो धर्मचक्रिणः ।।१८।।

राजषट्कं सकामं तु, निष्काममभवद्यतः ।
वैराग्यवार्निधिं मल्लि-नाथस्य शस्यमानुवे ।।१९।।

आलिङ्गितदधिमुखो, यथाऽभूदञ्जनाचलः ।
जन्माभिषेचने यस्तं, नौमि श्रीमुनिसुव्रतम् ।।२०।।

मदर्थं राज्यश्रीस्तेन, त्यक्तेतीवानुरागिणी ।
वव्रे कैवल्यश्रीर्यं तं, नमिनाथमुपास्महे ।।२१।।

हरिणो हारिनारीभि-र्हावभावादिभिर्विभुः ।
नाप मनोभुवं योऽसौ, श्रीनेमिः शरणं मम ।।२२।।

इन्दीवरेन्दिरां मुष्णन्, इन्दिन्दिरान् विलोभयन् ।
राजमानो विरोकोऽयं, पार्श्वेश्वरः पुनातु वः ।।२३।।

विषमेषु समस्यास्या-ऽनार्येष्वप्यार्यदर्शिनः ।
श्रीवीरस्वामिनश्चित्रं, चरित्रं समुपास्महे ।।२४।।

इह हि परमकारुणिको व्याख्याकार आदौ मङ्गलाद्य-भिदधन्नाह-

प्रणम्य परमात्मानं, महावीरं जिनोत्तमम् ।
सत्पञ्चसूत्रकव्याख्या; समासेन विधीयते ।।

अत्र परमात्मनमस्कारो मङ्गलम्, अभिमतशुभकार्यविघ्नभूतानन्तरायकर्मविनाशप्रयोजकत्वात् । अवश्यं कर्त्तव्य एष शुभानुष्ठानारम्भे, सुवर्णसिद्धिमन्त्राद्यतिशायित्वात्, अत एव पारमर्षम् - **'इक्को वि नमुक्कारो जिणवरवसहस्स वद्धमाणस्स । संसारसागराओ तारेइ नरं व नारीं वा'** इति (सिद्धस्तवे ३)। को नु सुज्ञोऽत्राचिन्त्य सामर्थ्ये भगवन्नमस्कारे प्रमाद्येत् ? इतोऽयं महानुभावः, भगवदाज्ञोरीकाररूपत्वात् । यदि चानेन संसारोत्तारोऽपि सम्भवी, तदा सद्गति-विशिष्टसिद्ध्याद्यवाप्तौ दारुणापन्निवारणे तु किं वाच्यमिति ।

पञ्चभिः सूत्रैर्निर्मितं शास्त्रं पञ्चसूत्रकम् । तच्चात्र सता विशेषितम् । सत् सत्यं सुन्दरं च । सत्यम्, तदुक्तप्रक्रियायथोक्ताराधनातोऽवश्यं मुक्तिप्राप्तेः । सुन्दरम्, तदभिहितमोक्षसाधकप्रक्रियया मनोरमत्वात्, सम्भवत्त्वात्, स्वपरहितसाधकत्वाच्च। नानया परपीडालेशोऽपि । स्वपरान्यतरस्याप्यहिता प्रक्रिया भवत्यसुन्दरा । नेदृशीयम् । अत इयमेवाद्रियते प्रेक्षावद्भिः। तदादरस्यैव प्रेक्षाफलत्वात् ।

बहव उपलभ्यन्ते मुक्तिवादाः । किन्तु न तेषु भवति सर्वथा सत्यत्वम्, नापि तत्साधन प्रक्रिया भवत्येकान्तसुन्दरा। यथा - नैष विरागः, अपि तु कातरता तव । अजरामरो ह्यात्मा । मा भूत्ते हिंसकत्वाभिमानः । युध्यस्व प्रगल्भतया - इत्यादिवचोभिर्जिष्णुना प्रेरितोऽर्जुनो युद्धे । स च प्राग् गुरुजनवधपातकभयेन युद्धनिर्विण्णोऽपि कारितस्तेन युद्धम्। एवं पूज्यैः सह योधनेन, दारुणद्वेषदुर्ध्यानविषयतृष्णादिवर्धनेन

दारुणपरिणामं सञ्जातं युद्धम् । कथमेतत्प्रवर्त्तकं वचः सत्यं सुन्दरं च कथयितुं शक्यते ? कथञ्च तदनुसरणे मैत्री-कारुण्यादिभावस्सम्भाव्यते ? कथञ्च तदङ्गीकारो मोक्ष-प्रदस्स्यादिति विचिन्त्यं माध्यस्थ्यमास्थाय ।

इतश्च पश्यतां पञ्चसूत्रोपदर्शितविधिप्रभावः । श्रीऋषभ-देवेनाष्टानवतिपुत्रा भरतेन सह युयुत्सवः प्रतिबोधिताः, यथा - न हि भरतो वो रिपुः, अपि तु हृदयस्थिता विषयतृष्णा कषायाश्च । एभिरेव भवति युष्माकं भरते रिपुत्वदर्शनम् । न हि युष्मद्राज्यगृहीष्यन्नपि भरतो युष्माकं परलोकेऽहितकृत् । तृष्णादयस्तु नियोगतोऽहितकारिणोऽतस्त्याज्यास्ते । 'सल्लं कामा विसं कामा कामा आसीविसोवमा । कामे य पत्थेमाणा अकामा जंति दुग्गइं ।।'

अतोऽनन्तकालत आत्मकदर्थनाप्रवृत्ता आन्तररिपव एव विजेयाः । एवमेव महादुर्लभमानवभवावाप्तिसार्थक्यमपीति ।

एतदुपदेशाकर्णनेन प्रशमिता अष्टानवतिपुत्राः । सम्बुद्धाश्च । गृहीता प्रव्रज्या । जातानुशयः समागतो भरतः । ययाचे क्षमाम् । प्रार्थयति राज्यं स्वीकर्त्तुम् । दृढव्रतास्तु महात्मान आराधनैकनिमग्नाः क्रमेण प्रापुः परमज्ञानम् । न रक्तबिन्दोरपि बभूव निपातः । विलीनो रिपुभावः । आप्लाविता हृदयवसुन्धरा मैत्रीकारुण्यपुण्यरसपूरेण । भरतोऽप्यग्र आससाद कैवल्यम् । तदेतत्सर्वमपि सर्वज्ञवचसः सत्फलम् । तच्च सङ्गृहीतमत्र पञ्चसूत्रकाभिधे शास्त्रे । अत इदं सत्यं सुन्दरं चेति ।

न हि पापप्रतिघातविरहे गुणबीजाधानं नामेति प्रथममत्र

तद्वक्तव्यता । गुणबीजाधानमन्तरेण धर्मगुणगोचरपरमार्थ श्रद्धानविरहः, अतस्ततस्तद्विचारः । उक्तश्रद्धानं विना साधुधर्म-परिभावनाऽसम्भवात्ततस्तद्वार्त्ता । तदभावितस्य तद्ग्रहणं न सङ्गतिमङ्गतीत्यतस्तदनन्तरं तदुपन्यासः । अप्रव्रजितस्य तत्पालनयत्नाभावः, अतस्ततः प्रव्रज्याग्रहणविधानम् । न हि तदनुपालनविरहे तत्परमार्थफलसमागमो घटाकोटिमाटीकते, अतस्ततस्तदुक्तिः । ततश्च प्रव्रज्याफलवचनम् । एवं न्याय्योऽत्र सूत्रपञ्चकक्रमः ।

न ह्येतत्क्रमोल्लङ्घने सम्भवत्यभिमतसिद्धिः । अत आदृतव्य उक्तः क्रमः ।

इह हि पापप्रतिघातगुणबीजाधानाभिध आदिमे सूत्रे प्राणातिपातविरत्यादयो गुणतयाऽभिप्रेताः । हिंसादिदोषगोचरा प्रकृत्यैवारुचिः स्यात्, ततोऽपि तत्त्यागप्रतिज्ञा भवेत्, स गुणः। तत्रापि स्वर्गादिसौख्याशंसयऽऽचर्यमाणो हिंसात्यागादिर-किञ्चित्करः । नैष गुणः, तृष्णाप्रधानत्वात् । किन्तु- भववर्धनानि खलु हिंसादिदुष्कृतानि । मोक्षनिरोधकानि । एभिरात्मनो-ऽधमावस्था - इति विज्ञाय विधीयमान-स्तत्त्यागोऽहिंसाद्यादर-प्रसूतो गुणः । इह द्वितीयसूत्रे तद्गुण स्वीकारवक्तव्यता, प्रथमे तु तद्बीजाधानवार्त्ता ।

**बीजाधानम्** - यस्य कस्यचिदपि गुणस्य प्रथममाधीयते बीजम् । ततश्चाङ्कुराद्युत्पत्तिक्रमेण भवति तत्फललक्षण-गुणप्रसूतिः । धर्मगुणप्रशंसा तद्बीजमिति ललितविस्तरा । यथा धर्मगुणं दृष्ट्वोपदिष्टतया श्रुत्वा वा जायते कस्य-

चिदध्यवसायः - अहो ! कीदृशः सुन्दरोऽयं धर्मगुणः । अहो मञ्जुलोऽहिंसासत्यादिर्धर्मः - इत्यादिः । स एषोऽध्यवसाय एव धर्मगुणात्मकफलप्रसूतौ बीजम् । अनेन सञ्जायते तदवाप्तावभिलाषात्मिका चिन्ता । एषा चाङ्कुरस्थानीया । ततोऽपि तत्प्राप्तियत्नः शास्त्रश्रवणरूपो नालसङ्काशः । एवं क्रमेण धर्मगुणस्वीकारोऽपि भवति । स च सम्भवति पापप्रतिघातानन्तरमेव ।तेन ह्यशुभानुबन्धकर्माश्रवनिरोधः, शुभानुबन्धकर्मोपार्जनं च । यद्यपि प्रतिसमयं बध्यत एव कर्म। तथापि तीव्रमिथ्यात्वकषायावेशोपशमत उदेति शुभभावम् । ततोऽपि शुभानुबन्धोदयः । ततश्च धर्मगुणरुचिप्रभवः । इदमत्र तात्पर्यम् - गुणबीजाधानार्थिना प्रथमं तद्गुणोपादेयमतौ यतनीयम । हिंसादीन्यकर्त्तव्यानि मन्तव्यानि । तत्त्याग एव धन्यं भवति जीवनम् । एतच्छ्रद्धात्मकं बीजं हि सम्यक्त्वम् । अत्र भवति मोक्षाभिरुचिस्तत्त्वज्ञानं तत्परिणतिश्च । न सम्भवत्येतत् पापप्रतिघातमन्तरेण जातु, भवरुच्यभावस्य मोक्षाभिरुच्याविर्भावार्थमावश्यकत्वात्, विषयसौख्याभिमानात्मक-विषयप्रतिभासज्ञानविगमस्य तत्त्वपरिणति गुणाधिगमायाऽ-ऽवश्यकत्वात् । एतद्गुणानुभावतो हि विषयेषु विषत्वदर्शनम्, भवहेतुतया तत्परिज्ञानम्, एवमेव हिंसादीष्वपि संसारकारणत्व-संवित्तिः । ततश्च नियोगतो मिथ्यात्वादि-पापप्रतिघातः सद्दर्शनगुणलक्षणबीजावाप्तिश्च ।

पाप प्रतिघाततोऽशुभानुबन्ध्याश्रवनिरोधः । गुणबीजाधानतः शुभानुबन्ध्याश्रवोदयः । ततश्च हिंसाद्यकृत्याभिलाषलक्षण-

पापसामग्र्या असम्भवः, गुणानुगुणभावोदयसम्भवश्च । बाह्या शुभप्रवृत्त्यनुगुणसामग्री यथा मानुषकाय आर्यदेशः पञ्चेन्द्रियमनो-स्वास्थ्यमारोग्यं सुदेवः सुगुरुः सर्वज्ञवच इत्यादिः । तथाऽ-ऽभ्यन्तरा - शुभभावः सम्यग्वीर्योल्लास इत्यादिः । ततश्चामोक्षं भवतीदृशसामग्रीयोगः । सम्भवत्येवमशुभानुबन्धप्रतिघात-शुभानुबन्धाधानाभ्याम् । प्रभावोऽयं पुण्यानुबन्धिनः पुण्यस्य । तत्राप्याधिपत्यं विशिष्टमोक्षाभिलाषधर्मरुच्यादिलक्षणस्य विशुद्धाध्यवसायस्य ।

ततोऽपि भवति प्रयत्नः स्थूलत उक्तगुणप्रतिपत्तौ तत्र स्थूलत इति गृहस्थेन पालयितुं योग्येन प्रकारेण, यथा - निरपराधत्रसजन्तूनां सङ्कल्पतो वधस्य नियमः, कन्या-गौभूम्यादि सम्बन्ध्यसत्यसम्भाषणस्य नियम इत्यादिः । एतदेव समयपरिभाषयाणुव्रतमित्युच्यते । अत्र एव सर्वथा नियमात्मकं तु भवति महाव्रतं साधूनाम् । तदवाप्तिप्रयोजकं भवत्यणुव्रतानुपालनम् । अतस्तस्मिन् तदनुगुणवस्तुनि चादर स्तद्बाधकत्यागश्च प्रथमं कर्त्तव्यः । एतदभ्यासतः प्राप्यन्ते क्रमेण महाव्रतानि यतिधर्मदशकं च । अत एष साधुधर्म-परिभावनोच्यते ।

परिभावना भावनाऽभीप्सा विशिष्टोद्यमसचिव-नियतव्रतानु-पालनाभ्यास इत्यनर्थान्तरम् । परमो हि क्षमादिदशविधयतिधर्मः । बाह्याभ्यन्तरसर्वसङ्गपरिहारेणाऽऽराधयितुं शक्य एषः । न च मनोवाक्कायसर्वाशुभप्रवृत्त्यत्याग उदेत्ययम्, नापि महाव्रतविशुद्धिमन्तरेण । अतस्तादृशवीर्योल्लासस्यात्मनि

सम्पादनाय प्रागणुव्रतानां विधातव्यो विशुद्धोऽभ्यासः । सोऽप्यहिंसादिगोचरनिश्चलोपादेयमति - अकल्याणमित्रपरिहार-कल्याणमित्रसंसर्ग - धर्मजागरिकादिभिः सहितः कर्त्तव्यः । प्रापणीयश्चात्मा साधुधर्माधिगमयोग्यताम् ।

अनन्तकालं यावदितो विपरीता चर्याऽपि स्वरसपूर्वकं निषेविता जीवेन । न च स्वप्नेऽपि परिज्ञातः साधुधर्मः । न चैष प्रतिभातः कदाचिदात्मधर्मतया । यथा तप आत्मस्वभावतया नाऽऽभाति, अपि त्वभ्यवहरणमेव । परिग्रह एव भवति विभूत्यभिमानः, न तु निष्परिग्रहत्वे । एवमनन्तकालं यावन्निषेविताऽऽत्मस्वभावविरुद्धचर्या । अतोऽत्यावश्यकस्तत्प्रति-पक्षाभ्यासः । अन्यथा नियोगतो भविष्यत्यात्मविसंस्थुलत्वम् । उक्ताभ्यासस्तु तदैव सम्भवति, यदाऽर्थकामविस्मृतिस्स्यात्, स्याच्च सततं धर्ममोक्षसंस्मृतिः । विषयकषायपरिहारेण भवेदादृतिस्त्यागवैराग्यक्षमादीनाम् ।

रत्नचिन्तामणिसदृशे मानवभवेऽहिंसासंयमतपस्त्याग-वैराग्योपशमविरत्यप्रमाददर्शनज्ञानचारित्राण्येव पुनः पुनः स्मर्त्तव्यानि । तत्संस्मरणसम्पादनाय च देशतोऽपि तान्या-चरितव्यानि । ततो हि देशतोऽपि भवति तत्प्रकृतियोगः । ततश्चैतेष्वात्मीयतामतिप्रादुर्भावः, हिंसादिपापस्थानकाहारादि-सञ्ज्ञागृहपरिवारादौ परकीयत्वबुद्धिसमुदयः । ततश्च दृढा प्रवृत्तिरभवेत् संयमादौ । शिथिला तु हिंसादौ । बुद्धेरेव दृढत्वादिनियामकत्वात् ।

न ह्यपरिभावितसाधुधर्मस्तमधिगन्तुमधिकुरुते, तस्य

तदनुपालनयत्नानुपपत्तेः । परिभावित साधुधर्मोऽनुनयति स्वजनादीन् प्रव्रज्यां गृहीतुम् । कथञ्चिदबुध्यमानेषु तेषु प्रयुङ्क्ते तत्प्रतिबोधोपायान् । एवमप्यबुध्यमानेषु कुरुते तज्जीविकाव्य-वस्थाम् । एवमप्यननुज्ञापयतां विधत्तेऽटवीग्लानौषधन्यायतः परिहारम् । ततोऽपि प्रव्रजितस्सन् यततेतरां तदनुपालने । तद्विना परिभावनावैयर्थ्यानुषक्तेः ।

श्रुतसागरसङ्काशद्वादशाङ्ग्याः सारभूतमिदं पञ्चसूत्रम्। एतत्परिणतिमता परिणमितं द्वादशाङ्गीनवनीतम् । ज्ञानक्रिय-योर्हि द्वादशाङ्गीसमवतारः । प्रकृतेऽपि तदद्वयवक्तव्यते-त्येतत्सारो द्वादशाङ्ग्याः ।

ज्ञानक्रियासमुच्चये हि सिद्धियोगः । तथा च पारमर्षम् - हयं नाणं कियाहीणं, हया अन्नाणओ किया । पासंतो पंगुलो दड्ढो, धावमाणो य अंधओ - इति (आवश्यकनिर्युक्तौ) ।

पापप्रतिघातगुणबीजाधानाभ्यां विना ह्यनन्तान्यपि चारित्रानुपालनानि निष्फलत्वं गतानि । न हि क्रमप्राप्यं वस्तु तदन्तरेण प्राप्यते जातु । न चैवं चारित्रगुणभावेऽपि मुक्त्यनधिगतेरन्वयव्यभिचार इति वाच्यम्, तस्य परमार्थतो गुणाभासरूपत्वात् ।

मुख्यं हि चारित्रफलमात्मविशुद्धिः, गौणं तु सुदेवमानुष्यादि। न ह्येतत्प्रदानेऽप्रत्यलं चारित्रं गुणरूपम्, अपि तु गुणा-भासात्मकम्। किञ्चाज्ञानकष्टेनापि प्राप्यते देवत्वम्, न तु तच्चारित्रम् । एवमेवानन्तशो ग्रैवेयकोत्पातसङ्गतिरपि । तदत्र क्रमोल्लङ्घन-स्यैवापराधः । ततश्च कथञ्चिद्दिव्यगत्यवाप्तावपि

तत्र विषयसुखगृद्ध्यतिशययोगादनर्थः ।

सम्यक्त्वं हि मोक्षानुष्ठाने बीजम् । सबीजक्रियात एव मोक्षः । तां विना तु द्रव्यश्रामण्यमपि संसारफलम् । हिंसाभिरुचिरसंयमव्यसनिता मनोज्ञाहारगृद्धिर्विषयलाम्पट्यं कषायप्रमादपारवश्यं च मुञ्चत्यात्मानं दयास्पददशायाम् । यस्य तु क्रमसचिवविधिमार्गे सम्यग्दृष्टिमात्रमपि भवति, तस्यापि नियोगतोऽर्धपुद्गलपरावर्त्तप्रमाण एवोत्कर्षतः संसारः । विना तु सम्यग्दृष्टिं भवत्येवापारः संसारः । अत एव परमार्थत एतच्छास्त्रपदार्था एतत्क्रमेणैवाविर्भवन्तीत्युक्तम् । अपि च-

**अयं चातिगम्भीरो न भवाभिनन्दिभिः क्षौद्राद्युपघातात् प्रतिपत्तुमपि शक्यते ।**

पञ्चसूत्रोदिता भावा अतिगूढा गम्भीराश्च । अत एव प्राक् पापानां समूलं विनाशं कृत्वा धर्मगुणबीजाधानं कर्त्तव्यमित्युच्यते । भवाभिनन्दी हि जीवो निजक्षुद्रतालोभरत्यादिदोषदूषिततया न यतत एतत्पुनित-पदार्थानधिगन्तुम् । नाऽप्येतदवगमेऽप्यसौ प्रत्यलः । नाऽपि तस्यैतदवगमविषय आदरलेशोऽपि भवति । आदरो ह्युपादेयमतिहेतुकः । सा चास्य नास्तीति । एवं च गुणबीजाभावे कुतः फलम् ? बीजं विना तु कष्टमयक्रियाऽपि निष्फलैव स्यात् । अतः क्षुद्रतादिमलप्रक्षालनेन शुद्धात्मस्वभावाविर्भावे यतनीयम् । तल्लेशाधिगतावपि श्राद्धव्रताद्यभ्यासक्रमेण सञ्जायते साधुधर्माभिलाषस्तद्योग्यता च । एष एवाभ्यासः प्रयत्नश्च परिभावनापदेनोच्यते ।

भवाभिनन्दिनोऽष्टौ दुर्गुणा भवन्ति, तद्यथा -

**क्षुद्रो लाभरतिर्दीनो मत्सरी भयवान् शठः ।**
**अज्ञो भवाभिनन्दी स्यान्निष्फलारम्भसङ्गतः ।।**

तत्र क्षुद्रहृदयोद्भूतो भावः क्षुद्रता । नास्मिन् भवत्याशयगभीरता । भवति तु स्वार्थसिद्ध्यौत्सुक्येन सूक्ष्मदृष्टिविरहः, दीर्घकालपर्यालोचनाभावश्च । ततश्च कुतस्तरां तत्त्वश्रद्धाप्रसूतिः ? अतः परिहार्यः स्वार्थान्धत्वोद्भूततुच्छहृदयाध्यवसायः । कर्त्तव्यं वस्तुतत्त्वदर्शनम् । विधातव्यः सूक्ष्मबुद्ध्या विचारः । एवं ह्यनुचितप्रवृत्त्यादेर्भवत्यात्मरक्षा ।

अत्र धर्मरत्नप्रकरणोदितं ज्ञातम् - श्रोत्रीमत्यां नगर्यामुवास पापभीरुः क्षीरकदम्बाभिधो ब्राह्मणः । स च वेदशास्त्रवेत्ता । तत्समीपे तत्पुत्रः पर्वतः, अध्येतुमन्यत आगतो नारदः, राजपुत्रश्च वसुः शास्त्राभ्यासं चक्रुः । अन्यदा तद्गृह आगतं मुनियुगलम् । तत्रैकेनातिशयज्ञानिनाऽभिहितोऽपरः - अत्र विद्यार्थित्रयमध्ये द्वावधोगामिनौ, एकस्तूर्ध्वगामी इति । श्रुतमुपाध्यायेन । चिन्तितं च - राजपुत्रस्तु प्रायः सम्भवत्यधोगामी । इतरस्तु को भविष्यतीत्यस्तु परीक्षा । यतः -

**भर्त्तुर्भार्याकृतं पापं, शिष्यपापं गुरोर्भवेत् ।**
**राज्ञि राष्टकृतं पापं, राजपापं पुरोहिते ।।**

ततश्चान्धकारमय्यां रात्रौ पर्वताय नारदाय चैकैको लाक्षारसमयो कुर्कूटोऽर्पितस्तेन । अभिहितं च - मन्त्रबलेन मूर्च्छा प्रापितोऽयं मया । स च तत्र हन्तव्यः, यत्र न कोऽपि

पश्यति - इति ।

ततोऽलङ्घनीयं गुरोर्वच इति सम्प्रधार्य निर्गतो नारदः । दृष्टमटव्याम् - पश्यति तारामण्डलम् - इति । गतो यक्षमन्दिरे। तत्रापि - यक्षः पश्यति -इति निर्गतः । शून्यगृहेऽपि - अहमेव पश्यामि - इति न जघान । निमीलितचक्षुरपि - लोकपाला दिव्यदृशश्च पश्यन्त्येव - इति विचार्यावगतमनेन गुरुवचस्तात्पर्यम् - न कुत्रापि हन्तव्योऽयं कुर्कूटः - इति । ततश्चाहत एव प्रत्यर्पितस्तेन गुरवे ।

पर्वतस्तु क्षुद्रमतिवशाद्यथा न कोऽपि जनः पश्यति, तथा वने हत्वाऽऽगच्छत् । प्रशंसितो गुरुणा नारदः । उपालब्धस्तु पर्वतः, यथा - कथं पश्यत्स्वपि लोकपालेषु देवतादीषु च हतो भवता कुर्कूटः ? - इति । ततोऽपि तत्पापेनात्मपापित्वं मन्यमान उपाध्यायो गत उद्याने मुन्युपकण्ठे । पप्रच्छ विनयेन - कुटुम्बसत्कः कोऽपि यदि दुष्कृते प्रवर्त्तते, तदा कुटुम्बमुख्यस्य दोषानुषङ्गो भवति, न वा ? - इति । प्रत्युत्तरयन् मुनिः - जाज्वल्यमानं तृणपूलं गृह्णन् यथा दह्यते, तथा गृहस्वामिनोऽपि कर्मबन्धो भवतीति श्रद्धेयम् - इति । पुनरपि पप्रच्छासौ - कथन्नामैतत्पापविगमस्स्यात् ? - इति । जगादैष उत्तरम् - यथा जाज्वल्यमानं तृणपूलं विमुञ्चन्न दह्यते, तथैव गृहत्यागं विदधन्नपि न तद्दोषेण दुष्टो भवति - इति ।

श्रुत्वैतत् प्रवव्राजासौ मुनिसकाशे । गतश्च चरणाराधनया सद्गतिम् । इतश्च पर्वतो विद्यार्थिनः पुरस्तात् 'अजैर्यष्टव्यम्' इति वेदवाक्यस्य 'एलकैर्यज्ञः कर्त्तव्यः' इत्यर्थपरकत्वमाचचक्षे।

तच्छ्रुत्वा नारद उवाच - अजः पुनर्यो न रुहति तादृशं पुराणं शाल्यादि धान्यम्, इत्यर्थो गुरुभिः कथितः - इति । न तु क्षुद्रतावशात् प्रतिपन्नं पर्वतेन । ततोऽप्येकान्ते मात्रा प्रज्ञाप्यमानेनापि न तेनाङ्गीकृतम् । तदर्थे चाङ्गीकृतोऽनेन साक्षिभावो वसुराज्ञः । मात्राऽपि पुत्रमोहतः कारितो वसुराजाऽसत्यभाषणम् । तत्क्षणमेव पातितो भवनदेवतया भूमौ । मृत्वा च स जगाम नरकम् । पर्वतोऽपि बाढं लोककृतं न्यक्कारं प्राप्य मुमोच तद्देशम् । गत्वान्यत्र प्रवर्त्तयाञ्चकार घोरहिंसामार्गम् । अन्ते च गतोऽधमां गतिम् ।

क्षुद्रता हि विस्मारयति तत्त्वम् । उल्लङ्घयति सत्यम् । प्रवर्त्तयति दारुणायामहिंसायाम् । ततश्च दुर्लभा भवति मोक्षदृष्टिः । भवति च भवैकाभिनन्दिता । अतो विमुच्य क्षुद्रतां विचारणीयमुदारहृदयेन - क्षुद्रतयैव भ्रान्तोऽहमनन्तं भवम् । कथन्नाम निकटीकरिष्यामि मोक्षम् ? न हि कस्यापि लज्जते कर्म । दर्शयति क्षुद्रहृदयस्य दारुणविपाकमेतत् । अतो न क्षुद्रतया भववर्धने विषयभोगे स्वार्थसक्तौ च करणीयं बहुमानम् । तदबहुमानत एव तुच्छतास्फातिः, ततश्च क्षुद्रहृदयता । यथा स्वापप्रियस्य मध्यरात्रौ केनचिन्निद्राभङ्गे कृत उदेत्यनल्पो मन्युः क्षुद्रतानुभावात् । अपरथा तूदारमनसैष एव स्याद्विचारो यथा - को नु भाग्यशाली केन सङ्कटेनात्राऽऽगतो भविष्यति ? - इति । एतेन विमर्शेन भवति हृदयं दयार्द्रम् । गच्छत्यात्मा सन्ततमप्यभ्युदयमार्गे । तदत्र समानेऽपि निद्राभङ्गे मनोवृत्तिरुच्चावचगतिनियामिका, अतस्तत्पारम्ये

यतितव्यम् ।

स्वार्थभावना हि क्षुद्रतामूलम् । तत्सातत्यं तु भवति तुच्छभोगबहुमानतः । ततश्चोदेति तुच्छवस्तुगोचरो लोभातिशयः, तदल्पप्राप्तावत्यनुशयः, तत्प्राप्तौ हर्षातिरेकश्च । प्रायो महत्तमो दिनभागो व्येति तद्वार्त्ताविचारादौ । ततश्च कथम्सम्भवस्स्यादुदात्तवृत्तेरुदारव्यवहारस्य च ? कथञ्च - कियन्मम मुक्तेश्चान्तरम् ? भववृद्धिर्मम भवति तद्धानिर्वा ? - इत्यादेः स्वप्नेऽपि स्याद्विचारः ?

यदा तु क्षुद्रतापगमेन गभीरं भवति हृदयम्, तदा न जातु सम्भवेत्तुच्छवृत्त्युदयः । नापि दीयेत प्राधान्यं तुच्छवस्तुने । यद्यपि न स्यात्तत्त्यागप्रत्यलता, तथापि न भवेत्तत्तद्भोग एकायनीभावश्चित्तस्य । अपि भवतिस्तदधिगमयत्ने ग्लानिभावः । न भवति तद्यत्ने क्रियमाणे निर्दयत्वं जीवेषु । न विस्मरणमेति परोपकारः । क्षुद्रता ह्यापादयति हृदये निष्ठुरताम् । ततश्च न विचारयति जीवो यत् - अपरोऽपि मत्सदृशः संसारवर्त्तिजीवः, सोऽपि कर्मकदर्थिततया दयास्पदम् । कथमेतस्मै कुपितव्यम ? कुपितव्यं तु कर्मप्रकृतौ मोहान्ध्ये च, यत्पीडितमिदमखिलं जगत् । प्राप्नोत्वसौ जीवः सन्मतिम् । अपराधादेरस्य भूयाद्रक्षा । मा भूदस्य दारुणं दुर्गतिदुःखम् । भूयादस्यापि मङ्गलम् - इति ।

न हि क्षुद्रस्योदेत्येष मैत्रीकारुण्यभावः । तस्य तु प्रतिपदं भवति द्वेषोदयो निर्दयताविर्भावश्च । कदर्थ्यतेऽसावहङ्कारेण । बाधां प्राप्नोति ममकारतः । निमज्जति दुर्गुणकर्दमे । कुरुते

दानभयेन परेषामपि दानेऽन्तरायम् । विधत्ते धर्मविघ्नम् ।

न हि धर्मभावनानुमतमिदम् । नश्वराणामात्महित-विघातकानां च वस्तूनां बहुमानानर्हत्वात् मनोज्ञविषयाणां वैवश्यापादकत्वात्, दुर्गतिकूपावतारणप्रयोजकत्वाच्चानभिल-षणीयत्वादयुक्तैव तत्तृष्णाहेतुकतुच्छहृदयतेति भावः ।

अभिलषणीयं त्वेकमेवानासङ्गपदम्, न तु पुद्गलद्रव्यम् । किञ्चैकेन्द्रियजीवकलेवररूपा एव भोज्यादयो विभवश्चेति कस्तस्मिन् सचेतसोऽनुरागः ? कथञ्च तुच्छार्थं तुच्छभावोरीकार इति चिन्त्यम् । गृध्रा एव मृतकेषूत्सवं मन्यन्ते । किन्तु प्रतिबध्नात्येनं सद्विचारं क्षुद्रता । उपहासपात्रीविधत्ते तत्त्वचिन्तनम् । कुरुते पण्डितमानिनमात्मानम् । अवगणनां कारयति महाज्ञानिनाम् । क्षुद्रता हि बलात् पातयत्येवानेक-दोषनिकुरम्बकर्दम इति हृदयम् ।

द्वितीयस्तु भवाभिनन्दिदुर्गणो लोभरतिः (लाभरतिः) । भवति हि भवाभिनन्दिनो जीवस्य विशिष्टतरो लोभपक्षपातः, यथा - भाव्यमेव लोभिना, न हि वयं साधवः । संसारिणो हि लोभमन्तरेण निर्वाह एव न स्यात् । किञ्च विभवाद्याकाङ्क्षा-शून्यं हास्यपात्रमेव जीवनम् । भवितव्यमेव मनुष्येण महत्त्वाऽऽकाङ्क्षिणा - इति ।

ततश्चाद्रियतेऽनेन लोभः । नैष लोभ एव, अपि तु लोभरतिः । तया पश्यत्यसावल्पतृष्णान् लोकान् मूढान् वराकाँश्च । अवगणयति त्यागोपदेशवचः । कथयति - पुराणं सूक्ष्मं चैतत् । न च साम्प्रतकाले लोभमन्तरेण लाभं विना च निर्वाह एव

सम्भवी - इति । ततोऽपि कथञ्चिल्लाभे जाते मन्यते तं प्राणाधिकं सर्वस्वं च । कुरुते नक्तन्दिनमपि तदीयचिन्ताम् । लाभेन हि सतृष्णस्य वर्धत एव लोभः, तथा च पारमर्षम् - **जहा लाहो तहा लोहो, लाहा लोहो पवड्ढइ दो मास कयं कज्जं कोडिए वि न निट्ठियं** - इति (उत्तराध्ययने) । अभिहितं च - **इच्छा हु आगाससमा अणंतिया** - इति (उत्तराध्ययने - ९)

स एष लोभरोगो नैराश्यौषधेन नेय उपशमम् । अन्यथा तु दुरन्ता लाभलोभविषचक्रभ्रान्तिः । न हि तद्भ्रान्तस्य भगवद्भक्त्यादियोगा दृश्यमाना अपि जातु समीचीना भवन्ति। स विधत्तेऽपि जिनपूजाम्, शृणोति गुरूपदेशम्, वहत्यश्रूण्यम्बकयोः, दर्शयति गद्गद्भावम्, तथाऽपि न शिथिलयति लोभग्रन्थिम् । मन्यते धर्माराधनामपि लाभसाधनमात्रम् । एवञ्च तत्पक्षपातातिशयान्नासाववगच्छति धनेन्द्रियविषयत्यागवार्त्ताम् । न मन्यते - लोभ एव सर्वपापमूलम्, सर्वगुणविनाशकः, भवदुःखनिबन्धनम्, कर्मवैवश्यापादकः, मुक्तिसुखबाधकः, तृप्तिसौख्यप्रतिबन्धकश्च - इति ।

एवं लोभरतयो गच्छन्त्यधमां गतिम् । यथा राज्यसक्त्या सुभूमः, इन्द्रियविषयगृद्ध्या ब्रह्मदत्तस्त्रिपृष्ठश्च, मन्मनश्रेष्ठी च धनलोभेन.... एवमनेक आत्मानो गताः सप्तमां नरकावनिम्। राज्यादिकं तु तत्रैवाऽस्थात्, तत्सक्ता तु भ्रमन्ति भीमां भवाटवीम्। श्रूयते च समरादित्यतृतीयभवान्तरकथायां बालचन्द्रः स्वभ्रातृवञ्चनं कृत्वा सुवर्णलक्षसप्तकं पर्वततटे निधानीकृत्या-

रक्षत् । तत्रत्यसर्पदंशेन प्राप मृतिम् । इतश्च तद्भ्राता गुणचन्द्रः कदाचित्तीर्थकरयोगे पप्रच्छ - यथा कथममुकपर्वतशिखररुढस्य नालिकेरीवृक्षस्य मूलं तत्तटं यावद् गतमस्ति ? किमस्ति तत्र किमपि निधानम् ? केन च निहितं तत् ? - इति । जगौ चार्हन्, यथा - तन्नालिकेरीवृक्षजीवेन पूर्वभवे त्वद्भ्रातृभूतेन निहितं तत् । मारितश्च त्वं तेन धनलोभेन । अन्तरालभवे जातिस्मरणे स्वनिहितनिधानं विज्ञाय निहितं तटीभागे । ततश्च लाभरतिदोषेण गत एकेन्द्रियताम् - इति ।

एवमतिलोभो लाभरतिश्च दीर्घभवव्याधिकारणं कुपथ्यम् । भावनीयं यथा - अहो मदज्ञानम्, यत् पराधीनेऽपि लाभे स्वात्मगौरवम् । आत्ममालिन्यप्रयोजके लोभे समुज्ज्वलत्व-मानिता । भवति हि पुण्यानुगुण्येऽकल्पितोऽनल्पोऽपि लाभोऽन्तरेणोपार्जनपरिश्रमम्, तद्वैगुण्ये त्वभिलाषयत्नाद्यतिशयभावेऽपि नैव भवति । अपि च पापोदये सति मूलहानिरपि सञ्जायते । कोऽत्र कर्मपराधीनाय लाभायाभियोगः प्रेक्षावतः? न हि स्पृहार्हो बाह्यविभवः, पापप्रकरप्रयोजकत्वात्, अपि त्वान्तरविभवः सुकृतसदाचारसद्गुणात्मकः, सत्संस्कार-समाधायकत्वात् । लाभलोभविषचक्रतस्तु पुराणतमा दारुणतराश्च दृढीभवन्ति कुसंस्काराः । कश्च ततो भवान्तरेषु तत्सम्मार्जनावसरः ? अत आदृतव्योऽयमवसरः - इति ।

तृतीयो दुर्गुणो दीनताभिधः । यदनुभावेन सर्वत्र मनोज्ञमनुकूलं चान्वेषते जीवः । न च तदवाप्तावपि तुष्यति । अनल्पलाभमपि न्यूनमेवाभिमन्यते । पश्यति प्राप्तवस्तुछिद्राणि,

शोचते परिदेवते च । कुरुतेऽभिमतवस्त्ववाप्त्यर्थं परप्रेष्यताम् । वदति चाटूक्तिम् । सेवते कुक्कुरसङ्काशताम् । भजते भिक्षुकभावम् । विस्मरत्यात्मीयमुत्तमकुलादि । निमज्जति पापपङ्के । गच्छत्याहारादिसञ्ज्ञापारवश्यम् ।

सर्वाङ्गदुःखमयो ह्ययं संसारः, न तु सर्वाङ्ग सुखमयः। सर्वाङ्गसुखं तु शुद्धात्मस्वरूपमात्रे । सुखाभासस्त्वन्यत्र । सोऽप्यनेकदुःखसन्दोह हेतुः । का नु तत्र सुखाशा ? किं च तन्न्यूनत्वे परिदेवनम् ? किन्तु नैवं संवेत्ति दीनताकवलितः । नावगच्छति जीवपुद्गलयोः स्वरूपम् । स ह्यात्मनः सुखस्वरूपमन्वेषयति पुद्गलस्वरूपे, न तु तन्नश्वरतया, पराधीनतया, दुःखप्रदानप्रकृतितयाऽवधारयति । कथन्नाम सर्पास्ये सम्भवत्यमृतम्, अतस्तदनवाप्तौ निमज्जत्ययं शोकसागरे ।

अपूर्णता हि भवस्वभावः । नात्र पूर्णत्वसम्भवः । अतोऽत्राल्पेनापि कर्त्तव्यस्तोषः । अल्पमपि मन्तव्यमनल्पम् । अन्यथा तु महासंयमिनोऽपि दीनत्वयोगात् सम्भवति संयमभ्रंशः, कण्डरीकमुनिवत् ।

विभवानुधावनमनुकुरुते स्वछायानुधावनयत्नम् । यथा यथा तदनु धाव्यते तथा तथा सोऽपि सञ्चरति पुरस्तात् । वस्तुतस्तु ततः पराङ्मुखीभवनमेव तदवाप्त्युपायः, अन्वाह -

**नार्थ्यते यावदैश्वर्यं, तावदायाति सन्मुखम् ।**
**यावदभ्यर्थ्यते तावत्, पुनर्याति पराङ्मुखम् ।।**

इति (योगसारे - ४)

पराङ्मुखीभूतास्तीर्थकरा अर्थतः कामतश्च । ततस्तेषां सञ्चरतामागच्छन्त्यधस्ताच्चरणयोः सुवर्णपद्मानि । शिरसाऽर्थं वहमानास्तु तद्दासतामिताः कदर्थ्यन्ते तेनैव । नाम्नैवासावर्थोऽनर्थस्तु परमार्थतः । किञ्च गत्वरविगमेऽनुशोचनमपि न सङ्गतिमङ्गति । कथन्नाम स्वभावोऽन्यथा स्यात् ? अतस्तद्यत्नं विमुच्य सदातनात्मस्वभावाविर्भावाय यतनीयम् ।

क्षुद्रताऽऽपादयति विवेकशून्यताम् । लोभरतिर्लाभरतिश्च कुरुत आत्मानं रङ्कोपमम् । दीनता नित्यं दुःखैकहेतुः । एतत्त्रितयविगमाय प्रार्थयितव्यं प्रभोः पुरस्तात् - (१) दुःखक्षयः कर्मक्षयश्च मेऽस्तु । मा भूत्कष्टेष्वपि मे चित्तपीडा । अस्तु मे सन्ततं तृप्त्यनुभूतिर्मनसि । भूयाच्च मे द्वादशतपआराधनारूपा निर्जरा । (२) अस्तु मेऽन्तसमये समाधिलाभः । (३) भवतु मे भवान्तरे बोधिलाभः ।

अत्र प्रथमा याञ्चा जीवनकालगोचरा, द्वितीया मृत्युसमयगोचरा । तृतीया त्वामुत्रिकविषया । इहलोकेऽपि सुखशान्त्यर्थिना परलोकेऽपि सौख्याभिलाषिणा पारम्पर्येण च परमपदेप्सुना परिहार्या दीनतेति समासार्थः ।

तुर्यो दुर्गुणो मात्सर्यम् । इर्ष्या द्वेषोऽसूया वैरमसहिष्णुता तिरस्कारः परविभवासहनमित्याद्या अस्यैव पर्यायाः । वीतरागऽप्रमत्तसरागसंयमि-प्रमत्तसंयमि-देशविरत-सम्यग्दृष्टिः - मोक्षरुचिमिथ्यात्विनो गुणवन्तः । ततोऽप्यधस्तनकक्षागता भवन्ति भवाभिनन्दिनो दोषैकपरिणताः । तत्कक्षां दृढयति मत्सरः । अनेन न सहते जीवस्स्वस्मादधिकधनवन्तमधिक-

ज्ञानिनमधिकतपस्विनं वा । इर्ष्यावृत्तिरेषा प्रतिबध्नाति भवविरागं सम्यग्दर्शनं च । कारयत्युपकारिणोऽप्यवगणनाम्, सिंहगुहावासिमुनिवत्, पीठमहापीठमुनिवच्च ।

पञ्चमो दुर्गुणो भयम् । दैन्ये स्वानुपलब्धिर्दुःखयोनिः, मात्सर्ये परलाभोऽसुखहेतुः, भये तु-मा भूदवाप्तवस्तुनाशः-इत्येतन्निबन्धना भवति दुःखानुभूतिः । अत्र मूलं सम्पन्मात्रसमागमो मेऽस्तु, मा भून्मम विपल्लेशोऽपीति भावना ।

विचित्रा हि कर्मणां गतिः । प्रतारयन्त्येतानि सभयानपि। पातयन्ति बलादपि कष्टे । समूलमुन्मूलयन्ति सुखम् । नैषां कोऽपि कालनियमो विद्यते । ततः कस्स्याद् भयप्रयुक्तो गुणः? गत्वरं तु गच्छत्येव, किन्तु सभयो दह्यते तच्चिन्तया, कदर्थ्यते ममकारेण, विस्मरत्यात्मानुचिन्तम्, न पश्यति परमार्थम्, विहितं स्वमनो जडकिङ्करम्, सञ्जातश्च स्वयं तदुभयोर्दास इति ।

भीतस्य हि भोजने धनादिव्यये याचकागमे सर्वत्राप्यस्खलितो भवति भयप्रसरः । किञ्च-ग्रहीष्यति धनं प्रशासनम्, लूण्टिष्यन्ति चौराः, अपगमिष्यति मत्सन्मानम्, नोपादास्यते मत्कथितम् इत्यादि भयकदर्थितो न भुङ्क्ते सुखेन, नापि भोजयति परान्, न करोति सुकृतम्, नाप्यनुजानाति परान् तत्कर्त्तुम् ।

भयो हि कारयति रमणं तामसभावेषु, भापयति धर्माचार्येभ्यः, वञ्चयत्युपदेशश्रुतेर्महार्घ्यधर्माराधनातश्च । चिन्तां कारयति मा कार्षीद् दानोपदेशं धर्मगुरुः, ततो वरं न याम्येव तत्समीपे - इति । एवमात्मानं सत्सङ्गवञ्चितं विधत्ते भयम् । ततश्चात्मैव

मलिनत्यात्मीयमुज्ज्वलं जीवनम् । तनोत्यसत्कल्पनाजालम्, रमते पशुप्रायोग्यसञ्ज्ञासु, धत्ते भवगोचरोपादेयमतिम् । अत्र तृष्णा तत्र भयम् । तृष्णैव भयजीवनम् । तत एव भयवृद्धिर्भववर्धनं च ।

अपि च भयेन कल्पयत्यसत्यभाषण-निकृतिहिंसा-कषायादि-प्रवृत्तिम् । यद्यपि कदाचिन्न भवत्यप्यसत्यभाषणादिकम्, मनसा तु कारयत्येव तत्तत्पापानि भयः किञ्च भयेनैव सम्भवति रौद्रध्यानमपि, यथोक्तम् -

**सर्वाभिशङ्काकलुषं चित्तं च धनरक्षणे**-इति (अध्यातमसारे ...) रौद्रध्यानस्वरूपम् । वर्त्तमाने च तस्मिन् यद्यायुर्बन्धः, तदा प्रयाति नरकमपि । ततोऽपि भ्राम्यति दुर्गतिम्, पापानुबन्धानामनुबद्धत्वात् ।

भयो जनयत्यसमाधिम्, प्रसूते गृहादिरक्षागोचराक्षणिकतातिशयम्, उत्पादयति शङ्कां शब्दलेशेऽपि चौरादिगोचराम् । धनं ह्यासक्तिविषयभूतम्, अतस्तन्निमित्तीभवति भये । न हि भवाभिनन्दिनः समाधिसक्तिर्भवतीति 'मा भून्मम समाधिभङ्गः' इत्याद्याकारको नोदेत्यस्य भयः । एतद्भयविरहादेव भवन्त्यस्य तुच्छवस्तुनिबन्धनानि भयशतानि, लुब्धश्रेष्ठिवत् । तथा हि चौराशङ्कया झटिति धनागारद्वारं मुद्रयित्वाऽन्तः प्रविष्टोऽसौ तालकयन्त्रोद्घाटनोपायविरहेणान्तरेव प्राप मृतिम् ।

किञ्च भयदोषेण धर्मानुष्ठानेऽपि न भवति स्थिरचित्तः । एवं खलु भयो दूषयति सर्वस्वम् । इन्द्रियाणि हि लूण्टाकरूपाणि, चौरभूतं मनः, सर्पिणीव विसर्पति कुवासना, प्रतितिष्ठन्ति

रिपूपमा विषयाः, अत एभ्य एव भेतव्यम् । तद्भीतेरेवाप्रमाद-प्रयोजकतया भयभङ्गयोनित्वात्, तथा च पारमर्षम् - **सव्वओ पमत्तस्स भयं, सव्वओ अपमत्तस्स नत्थि भयं** - इति (आचाराङ्गे .....)

षष्ठो भवाभिनन्दिदोषः शाठ्यम् । विधत्तेऽसौ प्रतिपदम्, निषेवते निकृतिम्, कुरुते प्रत्ययघातम्, प्रकृत्यैव प्रकरोति धूर्त्तताम्, भजते निष्प्रयोजनमपि कपटम् । भवति ह्यस्यानादिकालीनो विशिष्टो मायाभ्यासः । ततश्चाभीक्ष्णं तत्सेवनतो बध्नात्यशुभं कर्म ।

अन्तरोद्भूतमायाविफलीकरणमेव तदनुबन्धविनाशोपायः। यस्तु सफलीकुरुते ताम् तस्य तदनुबन्धोदृढो भवेत् । अत कर्त्तव्या हृदयशुद्धिः । भावनीयं यत् - कथं ध्रुवात्मगुणवञ्चना ममाध्रुवाभियोगहेतुका ? - इति । एवं भावनया भवेन्निकृतिनिकारः ।

भवाभिनन्दिनो ह्यतिप्रियो भवति संसारः, माया च संसारमाता, अतोऽस्य नियोगतोऽस्यामनुरागो भवति । प्राग् लोभरतिरस्य दोषतयोदिता, न तु लोभः । अत्र तु शाठ्यरतिम-प्रोच्य शाठ्यमेवोक्तं दुर्गुणतया, तत्रैष हेतुः - न हि लोभमात्रं तथाविधभवाभिनन्दित्वप्रयोजकम्, तथा शाठ्यमात्रम् - इति। एवञ्च दारुणतरोऽयं दोषः ।

माया हि बलात्प्रवर्त्तयत्यात्महितविरूद्ध आत्मानम् । ऋजुस्तु प्राप्नोति सुन्दरामात्मोन्नति प्रयोजिकां विचारप्रवृत्तिम् । ज्ञातमत्र समरादित्यकथावान्तरदृष्टान्तम्, यथा - चन्द्रकान्तनामा श्रेष्ठिपुत्रः परदेशत आगतः । दृष्टा स्वग्रामे धाटिः पतिता ।

ससम्भ्रमं गृहमागत्य दृष्टम्, ज्ञातं किञ्चिद्धनं लूण्टितम् । न च दृश्यते स्वभार्या चन्द्रकान्ता । ज्ञातमाप्तपुरुषाद्धरन्ति मानुषमपि लूण्टाकाः, तत्स्वजनेभ्यः पुष्कलधनाशयेति ।

ततो दाससहितश्चन्द्रकान्तो धनं गृहीत्वा चचाल उवाह दासः शम्बलम् । लुब्धश्चासौ धने । मार्गयति स्म छिद्रम् । भोजनावसरे गृहीतं श्रेष्ठिपुत्रेण शम्बलम्, धनं च दासेन । जलानयनव्याजेन पातितः स्वामी कूपे । पतनानन्तरमेव श्रुतं श्रेष्ठिपुत्रेण 'नमोऽर्हद्भ्यः' इति । परिज्ञातः पत्नीस्वरः । ज्ञातस्तया सद्भावः - यथा तामपहृत्य निशायां तत्र स्थितेषु लूण्टाकेषु शीलरक्षार्थं तया दत्ता झम्पा कूपे - इति ।

इतरयाऽपि दासदुष्कृतं विज्ञाय निन्दितम् । प्रतिषिद्धा श्रेष्ठिपुत्रेण, भणिता च - उपकार्येवासौ, येन मेलितावावाम् । अन्यथा तु कुतश्चौरपल्लीं गतवतोऽपि मे त्वद्योगः ? अपि च नात्र कूपे धनमभ्यवहरणसाधनमभविष्यदपि तु शम्बलमेवेति युक्तमेव सञ्जातं सर्वम् - इति ।

ततोऽपि प्रयोजनवशात्तत्रागतेन सार्थवाहेन कूपादुद्धृतौ तौ चलितावग्रे । दृष्टं मार्गे श्वापदमारितस्य दासस्य मृतकम्, धनं च स्वकीयम् । दृढीभूतो वैराग्यभाव उभयोः । प्रव्रजितौ । एवं मधुरं फलमार्जवस्य, कटुकं तु निकृतेः ।

सप्तमो दुर्गुणोऽज्ञता । सा च द्विप्रकारा मूर्खतारूपा मूढतात्मिका च । मूर्खस्य नोदेति विवेकमतिः । नोपरमत्यसावर्थोपार्जनशब्दादिभोगेभ्यः । भवति स लोकनिन्दास्पदम्, पीड्यते गृहवासे, भ्राम्यति दारुणदुर्गतौ । सैषा मूर्खता ।

मूढता तु सा, यस्यां सत्यपि पाण्डित्ये ज्ञानपरिणत्यभावः । न चास्ति मूढस्यात्मविज्ञानम् । तस्य मनोवाक्काययोगा जडमेवोद्दिश्य प्रवर्त्तन्ते, न त्वात्महितमुद्दिश्य, मूढपण्डितवत्। तथाह्युत्तरप्रदेश एकः पण्डितो गृहे विद्यार्थिनोऽध्यापयाञ्चकारः। तेष्वेकस्मिन् स्वशुश्रुषापरेऽध्येतर्यनुरक्ता तत्पत्नी ।

न च मूढतया पण्डितो विवेद तयोश्चरितम् । सकृद्देशान्तरं गन्तुकामेन पण्डितेन तस्मै विद्यार्थिनेऽर्पितं स्वपत्नीरक्षाकार्यम्। तावपि पण्डितवञ्चनार्थं निकृतिना गृहभागं दग्ध्वा तत्र किञ्चिद्दग्धं मृतकं निक्षिप्य पलायितौ । ततः प्रत्यागतेन पण्डितेन सम्प्रधारितं यथा दग्धा पत्नी । आक्रन्दादिपुरस्सरं चलितस्तदस्थीनि गृहीत्वा गङ्गां प्रति । तत्तटे विलापं कुर्वन् दृष्टस्ताभ्याम् । क्षमितो जातानुशयाभ्याम् । न चासौ प्रत्येति मत्पत्नीति । उक्तश्च भार्यया अहमेव तव गृहिणी - इति । न च श्रद्दधेऽसौ, जगाद च - बहवो धूर्त्ता भवन्ति काश्याम्, मत्पत्नी तु मृता, एतानि च तदस्थीनि, निर्गच्छेतः - इति । एवं मूढतया निर्विवेकस्स शोकं विधाय भ्रान्त्वा च मृतः ।

न हि मूर्खत्वयोगे ज्ञानं भवति, मूढत्वे सति रहस्यभानं च। न चैताभ्यां वेत्ति मनुष्यः, यदस्त्यधिकं स्वस्य पशोः सकाशात् । विस्मृत्य सनातनमात्मानं रमतेऽसौ क्षणसुखेषु विषयेषु । न चास्य भवति तत्त्वरुचिः, नापि रुच्यतेऽस्मै परेषामपि मिथः प्रवृत्ता तत्त्ववार्त्ता । ततश्च नक्तन्दिनं पुष्णात्येषोऽतत्त्वमतिम् । न च गृहादिचिन्तामन्तरेणान्यत् किमपि कर्तुमुत्सहतेऽसौ । सैषा मूढतामूर्खताभ्यामापादिता जीवदशा।

किञ्चाज्ञता पुष्णाति भय-शाठ्य-क्षुद्रता-लोभरति-मात्सर्यादिदुर्गुणान् । भवाभिनन्दित्वं च पुष्यत एभिर्दुर्गुणैः । मूढतायोगेन न गणयति जनो मोहगोचरस्य दोषसन्दोहम् । नाप्यन्यैः प्रज्ञाप्यमानोऽपि श्रद्दधाति । नापि गृह्णाति ज्ञानिनः शरणम् ।

मूढत्वविरहे त्वनतिप्राज्ञस्यापि प्रभवति विवेकः । सहते परलाभाय स्वयमल्पहानिमपि । विचारयति विचक्षणवचः । परिहरति पुनः पुनर्जायमानां क्षतिम् । न ह्येतादृशविवेकोदय-मन्तरेण जातु भवाभिनन्दित्वविगमः सम्भवति ।

अष्टमस्तु दुर्गुणो निष्फलारम्भसङ्गता । मूर्खो हि विचारविकलः, विपरीतविचारस्तु मूढः । अतः स्वस्वदोषहतं भवति तयोः कार्यम् । यद्यपि प्रारम्भे दृश्येत कोऽपि फललेशः, पर्यन्ते तु निष्फलत्वमेवर्च्छति तत् । निष्फलं नाम निस्सारम् । एवंविधं चेष्टितमाचरति भवाभिनन्दी । निष्फलपर्यवसानं दृष्ट्वाऽपि न ततो निवर्त्ततेऽसौ अपि तु द्विगुणं प्रवर्त्तते तत्र । न च भवाभिनन्दिनामपि विभूतिदर्शनान्न निष्फलत्वमेव सर्वत्रेति वाच्यम्, तत्साध्यप्रमोदादिवञ्चितत्वात्तस्य, मनःशान्त्यादि-शून्यत्वात्, पश्चात्तापादिपीडितत्वाच्च । भवत्यस्य दोषपोषो निष्फलैर्यत्नैः । जाड्यवृद्धिश्च तैरेव ।

सन्ततमप्यप्रमादभाव एवोक्तदुर्गुणपरिहारोपायः । अनन्त-कालं यावत्स्वभ्यस्तत्वात्तेषाम् । एवञ्च कथञ्चित्प्रकृति भावमापन्ना एते । अपरिचितास्तु सद्गुणाः । सुखेन सेव्यते क्षुद्रता, कष्टेन त्वौदार्यम् । प्रकृत्योदेति लोभः, कृच्छ्रेण तु

सन्तोषः । स्वभावत आविर्भवति भयम्, उत्पादनीया भवति तु निःसाध्वसता । प्रथममेवोद्भवति स्वार्थसाधनविमर्शः, परार्थविचारस्तु पश्चादपि न । आपद्यवलम्बते जीवोऽधमां वृत्तिम् । किन्तु तत्त्वविचारे तु क्रियमाण आपदुपयुज्यते तादृशवृत्तिविलयार्थम् । अतस्तत्सम्पादनाय परिहार्या मूर्खता मूढता च ।

यावत्क्षुद्रतादिदोषसद्भावस्तावद् भवति तत्त्वद्वेषः । ततश्च तत्त्वरुचिविरहः । ततोऽपि तदनवगमः । विशिष्टरसायनोपममिदं पञ्चसूत्रम् । न चैतज्जीर्यत्यल्पजठराग्नीनाम्, प्रतनोति च प्रत्यपायम् । अतस्त्याज्यास्ते दोषाः । तदर्थं नियन्त्रणीयं मनः, सहनीयः कायक्लेशः, परिहार्यस्तुच्छलाभः, सन्त्याज्या-स्वैरिता, समुपसम्पत्तव्यमनन्तज्ञानिवचः । एतद्विपरीतप्रवृत्तिमूलो हि भवाभिनन्दिनः संसार इति ।

पापप्रतिघातादिक्रमप्राप्या मुक्तिः । तत्र पापप्रतिघातः - (१) भवाभिनन्दिदुर्गुण विनाशः (२) पञ्चसूत्रोदिताराधना-क्रमश्रद्धानम् (३) तद्गोचरपुरुषार्थः (४) पुरुषार्थे विधिबहुमान-कालयोग्यत्व-औचित्य योगः - इत्येतत्समुच्चयतस्साध्यः ।

ननु दुर्लभः पञ्चसूत्रोक्तः क्रमः, अतः कथं तदधिगतिरिति चेत् ? तत्प्राप्त्यौत्सुक्यातिशयजन्ययत्नेनेति गृहाण । अतो यतितव्यमत्र । एवमेव मनुष्यजन्मादिसामग्रीसम्प्राप्तेः सार्थक्य-योगात् । न ह्येषा भावनिद्रादशार्थम्, व्यर्थवार्त्तालापाद्यर्थं वा, अपि तु जन्मजरामरणादिचक्रत आत्ममोचनार्थमिति ध्येयम ।

न ह्योघदृष्टिपरिहारमन्तरेणाद्ययोगदृष्टिसम्प्राप्तिरिति

योगदृष्टिसमुच्चयकाराः । ओघदृष्टिस्त्वनादिकालीनभवाभिनन्दिभावहेतुकाऽऽत्मविस्मरणप्रयुक्ता पुद्गलप्राप्यानन्दमात्रविश्रान्ता दृष्टिः ।

अनादिकालतो जीवो न्यवसत्सूक्ष्मनिगोदे । व्यतीता अनेनात्रैवानन्ताः पुद्गलपरावर्त्ताः । भवन्ति हि निगोदे सर्वमुक्तात्मानन्तगुणाः जीवाः, यदार्षम् -

**जइयाइ होइ पुच्छा जिणाण मग्गंमि उत्तरं तइया ।**
**इक्कस्स णिगोयस्स अणंतभागो य सिद्धिगओ ।।**

किञ्च निगोदजीवानामायुष्यमन्तर्मुहूर्तमात्रम्, कदाचित्तु क्षुल्लकभवमात्रमेव । तदा सञ्जायन्ते तेषामेकोच्छ्वासमात्रे काले साधिकसप्तदशभवाः । अनुभवन्त्येते नरकदुःखादप्यनन्तगुणं दुःखम् । न चान्तरैषां बादरनिगोदादिष्ववतरणव्यवहारो भवतीत्यतोऽव्यवहारराशिगता एते प्रोच्यन्ते । ते चैकस्मिन् शरीरेऽनन्तजीवा अनुभवन्त्यनन्तं दुःखम् । सोढमेतादृशं दुःखमनन्तं कालं यावदस्माभिः । यदा तु कश्चिज्जीवो व्रजति मुक्तिम्, तदा विपक्वभवितव्यतया एको जीवो निर्गच्छत्यव्यवहारराशिनिगोदतः । ततोऽपि भ्राम्यत्यसौ बादरनिगोदादिषु। व्यवह्रियते ततोऽसौ पृथिवीकायादिष्वतो व्यवहारराशिगततयाऽभिधीयते । ततोऽप्यनुभवत्यनन्तं जन्ममरणादिदुःखम् । लभते कदाचित् कथञ्चिन्मनुष्यभवम् । किन्तु हारयति तं विषयकषायादिभिः । गच्छति ततोऽपि सूक्ष्मनिगोदम्, तथापि व्यवहारराशिजीवोऽभिधीयते ।

कृष्णपक्षगतो हि जीवो हारयति प्राप्तामपि मुक्तिसाधन-सामग्रीम्, रमते तामसभावे, सेवते स्वर्गाद्यभिलाषेणोग्रचरणमपि। तथापि शुक्लपक्षविरहेण नावाप्नोत्यात्मस्वरूपस्थैर्यलेशमपि । यदा तु मुक्तेरर्वाक्तनः पुद्गलपरावर्त्तमात्रकालोऽवशिष्यते तदैव तथाविध योग्यताधिगमेन सफलयत्येष उक्तसामग्रीम् । एष च कालः समयपरिभाषया चरमावर्त्तोऽभिधीयते । तदवाप्तौ प्रयोजकद्वयम् (१) अनादिसिद्धभव्यत्वस्वभावः (२) एताव-त्कालयापनं च ।

भव्यत्वं नाम मुक्त्यवाप्तियोग्यता, यथा हि कुम्भकार-सङ्गृहीता मृत्तिका घटनिर्मितियोग्या भवति, अयोग्या तु तटिनीतटीस्थिता । काचित्तु योग्यापि वन्यप्रदेशव्यवस्थिततया सामग्रीविरहेण नावाप्नोति घटभावम् एवं केचिज्जीवा मुक्तिमधिगन्तुं सर्वदाप्ययोग्या एव, तेऽभव्याः । केचित्तु निःसृत्यानादिनिगोदा अभिमुखा भवन्ति मुक्तेः, ते भव्याः । केचित्तु योग्या अपि न कदाचिन्निःसरिष्यन्ति निगोदात्, ते जातिभव्याः । भव्यस्य मुक्तिगमनाधिकारः पौरुषमृतेरेवानादिसिद्ध इति तात्पर्यम् । अतस्तत्साधनप्रवृत्तेर्भव्यत्वपरिपाकः कर्त्तव्य इति ।

न हि चरमावर्त्तप्रवेशमात्रत ओघदृष्टिविगमो भवति, तथा-नियमाभावात् । तद्विगमो योगदृष्टिप्राप्तिश्चावश्यं चरमावर्त्त एव भवति, नान्यत्र । तयोः प्रयोजकस्तु भवति सहजमलहानतः।

अनादिकालीनौ तीव्ररागद्वेषौ हि सहजमलभूतौ, आत्ममालिन्यप्रयोजकत्वात् । चरमावर्त्ते तस्य विशिष्टतरा

भवति हानिः । तल्लक्षणं चैतत्त्रितयम् -

**दुःखितेषु दयाऽत्यन्त - मद्वेषो गुणवत्सु च ।**
**औचित्यासेवनं चैव, सर्वत्राप्यविशेषतः । - इति**

उपलभ्यतेऽत्रान्तर आत्मविश्रान्ता प्रेक्षा । ततोऽपि सद्गुरूपदेशादिनिमित्तयोगत व्यापार्यते दृक् शुद्धात्मस्वरूपे ।

यद्यपि तथाविधबोधाभावे प्राक् तत्त्वरुचि विरहः, तथाप्युपशाम्यत्यत्र प्राक्तनस्तत्त्वद्वेषः, उदेति तत्त्वजिज्ञासा, जागर्त्ति तत्त्वशुश्रूषा । ततोऽपि भवति तत्त्वश्रवणम् । एतद्धि सोपानचतुष्टयमाद्ययोगदृष्टिचतुष्कस्य ।

विरजत्यनेन जन्म-जरा-मृत्यु-रोग-शोकाद्युपप्लुताद् भवस्वरूपतः, संवेत्त्येतन्निर्गुणताम् । ततश्च निर्विद्यत एतद्विषचक्रतः । ततश्च न श्रद्दधाति विषयसौख्यम् । एवं वैराग्यापराभिधानभवनिर्वेदाधिगतिः ।

किञ्च नास्य भवति पापप्रवृत्तौ तथाविधस्वरसः । एवमाप्नोत्यसावपुनर्बन्धकत्वम् । सप्ततिसागरोपम-कोटाकोटिलक्षणां । मोहनीयकर्मस्थितिं यः पुनर्न बध्नाति स ह्यपुनर्बन्धकः। तत्त्वयोगतो दयादानत्यागतपोदेवगुरू-पासनव्रतनियमेष्वंशेन प्रवृत्तिर्धर्मपुरुषार्थः । एतेनान्यायानीत्य-नुचितव्ययोद्भटवेषादिदोषनिरोधपुरस्सरं प्राप्यन्ते न्यायसम्पन्नत्वमातृपितृ-पूजाऽतिथिसेवाज्ञानवृद्धसंयमिभक्त्यान्तररिपुनिग्रहेन्द्रियदमदयापरोपकारसौम्यताधर्मश्रुत्यादयो गुणसम्पदः ।

अत्राद्ययोगदृष्टिचतुष्टये क्रमेण (१) अहिंसा - सत्य-

नीति-सदाचार-परिग्रहपरिमाणाख्या यमाः (२) तपः स्वाध्याये-श्वरध्यानशौचसन्तोषलक्षणा नियमाः (३) पद्मासनादय आसनानि (४) बाह्यभावरेचनमान्तरभावपूरणमात्म-गुणस्थैर्यलक्षणकुम्भकं चेत्येतत्त्रितययोगेन प्राणायामः - इत्येतेषां साधनं क्रियते । सङ्गृह्यते चात्र योगबीजपञ्चकम्, तद्यथा - (१) वीतरागगोचर-शुभचिन्तनपूजन प्रणामादि । (२) आचार्यसेवा (३) सहजो भवोद्वेगः (४) अभिग्रहाः (५) शास्त्रलेखनादि - इति ।

यथाप्रवृत्तिकरणाख्यशुभाध्यवसायेनावाप्यन्त उक्तात्म-दृष्ट्यादयः प्राणायामपर्यन्ताः सद्गुणाः । ततोऽप्यनन्तरं निबिडरागद्वेषग्रन्थिभेदसम्पादनार्थमावश्यकमपूर्वकरणम् । दुर्लभं खल्वेतत् प्राप्यतेऽपार्द्धपुद्गलपरावर्त्तशेषे संसारे । ततः प्राक् तु प्रभवत्यसद्गोचरो रागः ।

दुर्लभं खलु शुद्धं मोक्षानुष्ठानम् । अपूर्ववीर्योल्लासमात्रप्राप्यं तत् । न ह्यात्महितमन्तरेण किमपि स्पृहणीयं वस्तु नाम । तथापीदं जीवस्य मौढ्यम् । यत उत्सहते विषयसौख्य-सन्मानाद्यर्थं कष्टानि सहितुम्, परप्रेष्यतां च कर्तुम् । सीदति त्वात्महितानुष्ठाने । एवञ्च -

**यो ध्रुवाणि परित्यज्य, अध्रुवं परिषेवते ।**
**ध्रुवाणि तस्य नश्यन्ति, अध्रुवं नष्टमेव च ।**

इतिन्यायस्यावतारः । परिणामस्त्वस्यनरकादिदुःखमये भवचक्रे पुनः पुनर्भ्रान्तिरेव ।

एवं विज्ञाय प्रापणीयोऽबाध्यतां धर्मपुरुषार्थः । स एष

विकसितो भवति चरमार्धपुद्गलपरावर्त्ते । धत्तेऽपूर्वकरणरूपताम् । भिनत्ति निबिडरागद्वेषग्रन्थिम् । दधात्युत्कटं भवनिर्वेदम् । दृढतरं श्रद्धत्ते सर्वज्ञोक्तं तत्त्वम् । प्राप्नोति सद्दर्शनम् । अलङ्क्रियते प्रशमसंवेगनिर्वेदानुकम्पाऽऽस्तिक्यैर्विभूषणैः । विभूष्यते चान्यैरपि तत्त्वपरिचय-कुदृष्टिसंसर्गत्याग-जिनशासन-गोचरमनोवाक्कायविशुद्ध्यादिभिः सद्गुणैः ।

प्राप्यापि सद्दर्शनं यतनीयमाराधकभावान्वये, यथा न स्याद्विराधकभावस्पर्शोऽपि । जिनाज्ञायां भावप्रतिबन्ध एव सद्दर्शनपीठिका । स च आवीतरागतावाप्तिमभिधारणीयः । अत एवोच्यते - **धम्मो आणाए पडिबद्धो** - इति (श्रावकधर्मविधिप्रकरणे....) यदेव जिनाज्ञया कर्त्तव्यतयोच्यते, तदेव धर्म इति तदर्थः । न ह्यविरतसद्दृष्टि जिनाज्ञानुपालनसामग्र्ये शक्तः । तथापि तत्र तत्प्रतिबन्धो भवति । मन्यते च - जिनाज्ञैव संसारोत्तारहेतुः, तदेव सत्यं निःशङ्कं च यत्प्रज्ञप्तं जिनैः, एतदेव च कर्त्तव्यम् । स एष जिनाज्ञासापेक्षभाव एवाऽऽराधकभावः ।

अनेन जागर्त्ति वीर्योल्लासः, स्वीकरोति सर्वतो देशतो वापि जिनाज्ञानुपालनम् । उच्यते चैष साधुः श्रावको वा । एतदनुपालकेन सन्ततमपि सावधानेन भाव्यम् । यतो जगत्संयोगाः कर्मोदयाश्च विस्मारयन्त्याराधनाम् । अतः क्षयोपशमान्वयरक्षां विधायाशुभनिमित्तानि त्यक्त्वा च शक्यमाराधकभावानुधारणम् ।

जिनाज्ञाराधनमाराधकभावश्च मोहनीयादिकर्मक्षयोपशमतः

प्राप्यौ । एतत्क्षयोपशमसानुबन्धभावे भवेदुत्तरोत्तरतदन्वयः । तन्निरनुबन्धभावे तु तद्विच्छेदयोगाद्विराधनातद्भावद्वययोगः । अतो गुणान्वयार्थिना यतितव्यं क्षयोपशमसान्तत्ये । तदर्थमपि त्याज्यमनायतनम् । आयतनं नाम गुणनिबन्धनम्, तद्विरुद्धं त्वनायतनम्, यथा ब्रह्मचराणां वेश्यापाटकम् ।

एवं सद्दृष्टेर्मिथ्यादृक्संस्तवस्तदुपदेशश्रुतिश्चानायतनम् । दानरुचेः कृपणपरिचयोऽनायतनम् ।

**सानुबन्धक्षयोपशमोपायः** - (१) अनायतनत्यागः (२) अभीक्ष्णमात्माध्यवसायनिरीक्षणम् (३) गुणसौन्दर्यप्रकृत्यैवो-पादेयमतिः (४) दोषकल्मषजुगुप्सा (५) आयतननिषेवनम् (६) कल्याणमित्रयोगः ।

एतदुपायादृत्या क्षयोपशमे सानुबन्धभावयोगः, ततोऽपि सुरक्षाऽऽराधनायास्तद्भावस्य च । यद्यपि बाह्यप्रवृत्तौ कदाचिद्विराधनावसरः समेति, तथापि न मोच्य आराधकभावः। भावनीयं च - अत्र विषय एषैव तु जिनाज्ञा, किन्तु दुर्भाग्यं मम, यन्न तामनुसर्तुं पारयामि । कर्त्तव्यं तु तदनुसरणमेव । धन्याश्च तत्कृतः । अभिलषाम्यहमपि तदनुपालकताम् - इति । एवं जिनाज्ञाबहुमानेन भवेदाराधकभावत्राणम् । तदुपेक्षया तु तद्विगम एव नन्दमणिकारवत्, यथानेन श्राद्धीभूयापि हारित आराधकभावः, प्राप्तं तिर्यक्त्वम्, पुनस्तद्भावोदयतः सम्प्राप्तो देवभवम्, प्रसिद्धमेतदागमे दर्दुराङ्कदेववक्तव्यतायाम् ।

आराधना ह्याराधकभावोद्गमस्थैर्यवृद्धियोनिः । अतो नैषोपेक्षितव्या । न ह्याराधनायां शक्योद्यममन्तरेण तदुद्गमादि-

गन्धोऽपीत्यतो यतितव्यमस्याम्, श्रीवीरनाथवत्, तथा ह्यनेन प्रियमित्रचक्रि-नन्दनराजर्षिभवयोरुत्तरोत्तरविशुद्धतराराधना-क्रमेणाराधकभावविशुद्ध्याऽवाप्तं तीर्थकृत्त्वमिति ।

## अथ

## पापप्रतिघात - गुणबीजाधानाभिधं

## प्रथमं सूत्रम्

**णमो वीअरागाणं सव्वण्णूणं देविंदपूइआणं जहट्ठिअवत्थुवाइणं तेलुक्कगुरुणं अरुहंताणं भगवंताणं ।।१।।**

वीतरागेभ्यः सर्वज्ञेभ्यो देवेन्द्रपूजितेभ्यो यथा स्थितार्थवादि-भ्यस्त्रैलोक्यगुरुभ्योऽरुहद्भ्यो भगवद्भ्यो नमः ।

अथ पञ्चसूत्रम् । अत्रादिमं वाक्यं मङ्गलम् । कर्त्तव्यं चैतत् । विघ्ननिघातनिपुणत्वात्तस्य, श्रेयसां च विघ्नबहुलत्वात्, यदुक्तम् -

**श्रेयांसि बहुविघ्नानि भवन्ति महतामपि ।**
**अश्रेयसि प्रवृत्तानां क्वापि यान्ति विनायकाः** -इति ।

अतः कर्त्तव्यं मङ्गलम्, तच्चेष्टदेवतास्मरणेन तन्नमस्कारतो वा सम्भवति । सर्वश्रेष्ठेष्टदवता तु देवाधिदेवो वीतरागोऽर्हत्परमात्मेति तद्गोचर एकोऽपि नमस्कारो विनाशयति विघ्नशतानि ।

अनन्तगुणाधिपतिर्हि वीतरागः परमात्मा । अतस्तद्विषयं विशुद्धं ध्यानं तद्गोचरं चिन्तनं च विशुद्धकोटिकं प्रभूतकर्म-निर्जराप्रयोजकम् । प्राधान्यं भजतेऽत्र भावविशुद्धिः । शुभो ह्यध्यवसायो क्षिणोति तीव्राण्यप्यशुभकर्माणि । अशुभस्तु स एव पाशयति सङ्क्लिष्टतरकर्मभिः । भवति ह्यनीदृशेऽपि बाह्यानुष्ठानेऽध्यवसायविशेषाद् गतिविशेषः । प्रसिद्धमत्र तन्दूलमत्स्यज्ञातम् ।

न चैवमहेया हिंसा, भावविशुद्धेरेव नियामकत्वादिति वाच्यम्, हिंसाप्रवृत्तेस्तद्भावप्रयोजकतया भावमालिन्यनिबन्धनत्वात् । यतस्तत्प्रवृत्तेस्तदनुरागः, ततोऽपि तद्भावभावितता, सा च सम्भवत्यप्रवृत्तिकालेऽपि । अतो दारुणतरा सा । अपि च नियत्कालीना भवति हिंसाप्रवृत्तिः, अल्पा च तथाविध-सामर्थ्यादिसामग्र्यभावे । तत्परिणामपरिणतिस्तु सदातन्यपि सम्भवति, बाह्यसामग्रीनिरपेक्षत्वात्प्रबलतमा च । अहो यतनीयं तद्विशुद्धौ । तयैव सम्भवत्यशुभाध्यवसायनिरोधः, यथा गुरूपदेशश्रुत्यनन्तरभाविन्यां भोजनक्रियायामपि सम्भवत्याहार-सञ्ज्ञानिरोधाभिलाषान्वयः ।

अत्र मङ्गले भगवतो विशेषणचतुष्टयमभिहितम्, तत्राऽऽद्यम् - **वीतरागत्वम्** । रागद्वेषविनाभूतत्वं च तदर्थः । रागो नामाभिष्वङ्गजननानुगुणं मोहनीयकर्म । अप्रीत्यापादकं कर्म द्वेषः । अज्ञानमिथ्याज्ञानजनकं कर्म मोहः । रागवेदनीयं कर्मेत्याहुराचार्याः, तत्र रागत्वेन भोग्यं कर्मेत्यर्थो विज्ञेयः । रागाद्यात्मकात्मपरिणामोऽपि रागाद्यर्थः । तन्मुक्तो वीतरागः ।

स चोपशान्तमोहोऽपि भवति, किन्त्वत्र क्षीणमोह इत्यर्थोऽभिप्रेतः।

द्वितीयं **सर्वज्ञत्वम्** । त्रैकालिकाशेषद्रव्यपर्यायज्ञान-दर्शनोपेतत्वं तदर्थः । न च वीतरागाः सर्वज्ञा एव भवन्तीति नैरर्थ्यमेतद्विशेषणस्येति वाच्यम्, उपशान्तमोहवीतरागेनानेकान्तोपलम्भात् । न चाभिमततात्पर्येण व्यवच्छिन्न एव स इति वाच्यम्, तथात्वेऽपि प्रकृतविशेषणस्यैव तत्तात्पर्यज्ञापकत्वात्। स्यादेतत्, एवदेवास्तु विशेषणम्, एतेनैव पूर्वस्य गतत्वादिति चेत् ? न, निमित्तशास्त्राद्यवगमेन कालत्रयावगन्तुरपि लोके सार्वज्ञ्यव्यवहारदर्शनात्तद्व्यवच्छेदकत्वेन वीतरागपदसार्थक्यात्।

सामान्य केवल्यपि भवति सर्वज्ञो वीतरागश्च, अतस्तद्वय-वच्छेदार्थमाह - **देवेन्द्रपूजितेभ्यः** - इति । न चैतेनैव पूर्वद्वयस्य व्यर्थत्वमिति वाच्यम्, गणधराणां तत्त्वेऽपि पूर्वद्वयविरहात्, ततश्च तद्व्यवच्छेदकत्वेन सार्थं पूर्वद्वयम् ।

एवं वैशिष्ट्यत्रयविभूषितः परमात्मा धर्मतीर्थस्थापनानन्तरमेव गच्छति मुक्तिमित्यभिधानार्थं **यथास्थितवस्तुवादीति** तुर्यम-भिहितम। स च चतुर्दशपूर्वधरोऽपि भवतीति तद्व्यवच्छेदार्थमाद्य-त्रयसार्थक्यं दृष्टव्यम् ।

न रोहति हेत्वभावात्कर्माङ्कुरः येषु तेऽरुहन्तः, तेभ्यः ।

तदत्र विशेषणचतुष्केऽतिशयचतुष्टयसमवतारो भावनीयः। तद्यथा - (१) अपायापगमातिशयः अपायाः-दोषा रागादयः, तदपगमेन वीतरागाः । यद्वाऽपायाः - उपद्रवा मारिप्रभृतयः, ते च सपादयोजनशते न भवन्ति तीर्थकृन्नामकर्मोदयात् । (२) सर्वज्ञपदेन सूचितो ज्ञानातिशयः (३) पूजातिशयो

देवेन्द्रपूजितपदेन । (४) यथास्थितवस्तुवादीत्यनेन ज्ञापितः पञ्चत्रिंशदतिशयोपेताया वाचो वचनातिशयः ।

सोऽयमतिशयचतुष्कालङ्कृतो भगवान् त्रैलोक्यगुरुः । गृणाति हितोपदेशमिति गुरुः । स च शुद्धसत्यधर्मोपदेशकः संसारत्यागी विरागी निर्ग्रन्थमुनिरेव भवति । श्रेष्ठस्तु गुरु-रर्हत्परमात्मा ।

अत्र वीतरागपदमुपलक्षणम् । तेन वीतद्वेषो वीतमोह इत्यपि दृश्यम् । रागस्य प्रधानदोषत्वेन तद्विगमस्यैव शेषविगम-ज्ञापकत्वात् । तत्प्राधान्यं चैवम् -

(१) द्वेषनाशो हि नवमे गुणस्थानके । रागस्य तु दशमगुणस्थानपर्यन्ते । अतो ययाऽध्यवसायविशुद्ध्या द्वेषनाशो भवति, तस्या अधिकतरतद्विशुद्ध्या रागविनाशसम्भव इति फलितम् । (२) राग एव द्वेषजनकः, तद्विरहे तदनुदयदर्शनात्, अतः प्रधानो रागः । (३) सुकरं द्वेषापनयनम्, कालेन तद्धानिदर्शनात् । रागे तु कालगमनप्रयुक्ता भवति वृद्धिरिति दुर्मोक्ष एषः । (४) अल्पकालीनः सम्भवति द्वेषः प्रायः, दीर्घाध्वा तु रागः । (५) द्वेषविस्मरणं सुखेन सम्भवति, न तु रागस्य । यथाजीर्णदोषेण सञ्जातो भोजनगोचरो द्वेषो झटित्यपनीयते क्षुत्प्रभवेण तद्रागेण । (६) कटुकः प्रतिभाति द्वेषः, मधुरश्च रागः । खेद उद्भवति द्वेषतः, हर्षस्तु रागात् । एषोऽनुभवोऽपि रागदारुणताज्ञापकः । (७) प्रयत्नेन क्रियते द्वेषः । प्रकृत्या तु भवति रागः । (८) अयोग्यतया प्रतिभाति द्वेषस्सचेतसः, न तु रागः । (९) अवगम्यते द्वेषप्रयुक्ताभिमतहानिः, न तु

रागप्रयुक्ता सा । (१०) हेयो द्वेष इति प्रसिद्धं लोके । रागोऽपि हेय इति तु वीतरागशासनमात्रम् । किञ्च (११) कारयति दुर्ध्यानं द्वेषः, इति मन्यते जनः । न च तत्कारकत्वमधिकमपि सत् प्रतिभाति रागे । (१२) प्रकटीभवत्यन्तरुद्भूतद्वेषो वदनविकारादिभिः, न तु प्रायो रागः । ज्ञायते च 'कृतो मया द्वेषः' - इति, न तु - 'विहितो मया रागः' - इति । न हि दुर्गुणतया भावरिपुरयं ममेति परिचयमेति रागः प्रायः । (१३) हिंसाहेतुर्द्वेष इति परिणामालोचनेन सम्भवति तत्त्यागः । रागस्त्वात्मनो भावहिंसाया अपि हेतुः, दुस्त्याज्यश्च। (१४) न हि रागान्धा जानन्त्यात्मभावहिंसाम्, तत्त्वादेव । (१५) सम्भवति द्वेषोदयानन्तरमनुशयः, न तु रागोदयात् पश्चात्प्रायः । अपि च (१६) अस्मद्द्वेष्योऽप्यस्मान् न द्विषेदित्यभिलषन्तोऽपि वयमिच्छामः- मा भूद्रागपात्रस्यास्मासु रागभङ्गः - इति । एवं दुर्धरो विरागः, दूरुच्या च स्वगोचरपरविरक्तिः । तदेतत्तत्त्वं रागदुर्मोक्षतामेव व्यनक्ति (१७) श्ववद्दंशति स्वख्यापन पुरस्सरं द्वेषः, मूषकवत्तु रागः । इष्ट वियोगे चानुभूयते तत्पीडा । (१८) क्लिश्यते जीव रागपात्रपोषाय, विधत्ते च तदर्थं पापानि । न तु द्वेषपोषणाय क्लिश्येत् कश्चित् । (१९) वेत्ति जनः - विभावो मम द्वेषः, न तु स्वभावः- इति । समानेऽपि रागस्य विभावभावे तं प्रतीत्यैतन्नावगच्छति लोकः । (२०) न रुच्यते दीर्घकालीनो द्वेषः, रागस्तु रुच्यते (२१) न ह्येकस्मिन्नेव वस्तुनि सदातनं रागं धारयितुं शक्यते । एवं नश्वरतया त्याज्योऽसौ । किञ्च

(२२) सर्वथाऽपि दारुणो रागः, तदधीना हि क्रोधादिकषायाः, तत्पुष्टिकृतश्च । (२३) रागो हि रक्षति मिथ्यामतिम् । तया च भवति तत्पोषः । ततश्च रागगोचरवस्तुप्राप्त्याद्यर्थं निषेव्यन्ते प्रकामं क्रोधाद्याः । ध्रियते रागगोचरे कामस्नेहदृष्टिरागान्यतमः । उदेति तन्निमित्तं हास्यं रतिररतिश्च । (२४) कर्मराजो हि मोहनीयं कर्म, तन्मूलश्च रागः । न ह्यनन्तानुबन्धिरागविगम-मन्तरेण सम्भवी मिथ्यात्वापगमः । अपि च (२५) भवति सपक्षपातो रागः, अतस्तीव्रतर एषोऽन्तर्भवत्यनन्तानुबन्धिकषाये । ततश्च नापगच्छति भवप्रतिबन्धः, अतत्त्वग्रहश्च । (२६) प्रयोजकतरो रागो हिंसादौ, धन परिवारादिरागेण तत्प्रवृत्ति-दर्शनात् । (२७)रागो हि भ्रंशयति परोपकारतः । राग एवापादयति रङ्कगोचरं द्वेषम्; यथा - कथं पीनोऽप्येष भिक्षते, नेच्छति परिभ्रमम् - इत्यादि ।

(२८) किञ्चानीत्या धनोपार्जनमपि रागकार्यम् । रागमूलानि हि जगत्पापानि तद्धानिमात्रत उपशम्यानि । (२९) सविवेकोऽपि प्रेर्यते रागेणाविवेकसाध्ये कार्ये । (३०) बलवानपि रागस्य पुरस्ताद् भवति दुर्बलतमः ।

अतः परिहार्योऽपरिहार्यव्यवहारेऽपि रागान्धता । नाश्रित-भरणेऽपि सेव्यं रागान्धत्वम् । रागहानौ भवत्यनावश्यक-वस्तुप्राप्तियत्नहानिः, ततश्च हिंसादि, पापहानम् ।

द्विविधो हि रागः प्रशस्तोऽप्रशस्तश्च । तयोः प्रशस्तरागो न बन्धनिबन्धनम्, अपि तु मुक्तिप्रयोजकः, अप्रशस्त-रागापनायकत्वात् । एष देवगुरुधर्मगोचरः सच्छास्त्रतीर्थात्म-

गुणादिविषयश्च भवति । अप्रशस्तस्तु रागः पापलेश्यासचिवः। भवति हि शुद्धसाधर्मिकबुद्ध्या परिवारगोचरोऽपि रागः प्रशस्तः। श्रमणादिगोचरोऽपि रागः - अहोऽस्य मन्त्रितवासचूर्णानुभावः, येन मम धनलाभोऽजनि इत्याद्यध्यवसायप्रसूतोऽप्रशस्तः । भवानुगुणो रागोऽप्रशस्तः, इतरस्त्वितर इति तात्पर्यम् । प्रशस्तरागेण स्याद् धर्मानुष्ठाने दृढतरयत्नः, ततोऽपि पीन-पुण्योपचयः, ततोऽपि वरतरतत्साधनसामग्रीयोगः, शालिभद्रवत्।

रज्यतेऽनेनेति रागः, अरुच्यर्थको द्वेषः । तौ चेष्टानिष्ट-गोचरावपगतौ यस्य स वीतरागो वीतद्वेषश्च । एष एव वीतमोहोऽपि, अपगताज्ञानत्वात् । मोहोऽज्ञानं मिथ्यावगमो विपर्यासो मूढता मिथ्यात्वमसद्ग्रह इति पर्यायाः । मोहो हि रागद्वेषसचिवो लूण्टयत्यात्मधनम् । कुरुते स आत्मानं मुक्तिपराङ्मुखम् । दंशत्यात्मानमप्रतिभात एव । कारयति सर्पेऽपि रज्जूबुद्धिम् । मानयति विषयसुखादावुपादेयताम् । उत्पादयति देह आत्मप्रतिभासम् । मोहाभावे तु विज्ञाततया सुकरं स्याद्रागहानम् । मोहो हि कुक्कुरे दर्शयत्यजम् । ततश्च न तद्दंशतो बिभेत्यात्मा । पश्यत्यहितमपि हिततया । मन्यते दुःखमपि सुखत्वेन । वेत्ति नगरनिर्धमनमपि सुखसागरत्वेन । स्वकृतामात्मगुणहानिमपि लाभत्वेन मानयति मोहः । अत एवोच्यते -

**अज्ञानं खलु कष्टं, रागादिभ्योऽपि सर्वपापेभ्यः ।**
**अर्थं हितमहितं वा, न वेत्ति येनाऽऽवृतो लोकः । इति**

अज्ञानात्मकेन मोहेन न विचारयत्यात्मात्मानं दोषकलुषितम्, अपि तु गुणवन्तम् । प्रमत्तमप्यात्मानं मन्यते सावधानम्, तदेष मोहोऽहङ्कारविगमेन निरोद्धुं शक्यः, अतो हि गुणदोषविवेकोदयः । ततश्च नियोगतो मोहत्याग इति ।

द्वितीयं भगवद्विशेषणं **सर्वज्ञत्वम्** । एतच्च ज्ञानातिशय-ज्ञापकम् । सर्वज्ञो नामानन्तज्ञानसम्पन्नः केवलज्ञानी । स च भूतभाविवर्त्तमानानानन्तद्रव्यपर्यायान् करावस्थिताऽऽमलक-वत्पश्यति जानाति च । न ह्यस्य किमप्यज्ञातं नाम, प्रतिबन्धक-विरहात्, उक्तञ्च -

**ज्ञो ज्ञेये कथमज्ञस्स्याद्सति प्रतिबन्धके ?**
**दाह्येऽग्निर्दाहको न स्या-दसति प्रतिबन्धके ? ।।**

**देवेन्द्रपूजितो**ऽसाविति तृतीयं वैशिष्ट्यम् । एतेन सूचितः पूजातिशयः । असङ्ख्यसुरसन्दोहस्वामिनोऽपीन्द्रा पूजयन्त्येनम् ।

द्विप्रकारा हि पूजा । तत्र भयादिप्रभवाऽधमपूजा, गुण-बहुमानप्रसूता चोत्तमपूजा । अपरया पूज्यते देवेन्द्रैर्देवाधिदेवः । विभावयन्ति तेऽनन्तं जिनोपकारम् । स्पृह्यन्ति तद्गुणगणविभूतिम् । अभिलषन्ति तत्सदृशचारित्रम् । किन्तु नाज्ञाप्रतिपत्त्या-त्मकानुत्तमा पूजा तैः कर्तुं शक्या, सर्वविरतिसामर्थ्य-विकलत्वात्तेषाम् ।

ननु सा पूजा तु गणधरैः क्रियत एव, अतो गणधरपूजितेभ्य इति वाच्यं स्यादिति चेत् ? न, वैशिष्ट्यज्ञापनार्थत्वा-च्छास्त्रारम्भस्य । दिव्यसमृद्धिसौख्यसागरमध्यनिमग्नानामपि

देवेन्द्राणां यदहमहमिकया देवाधिदेवगोचरपूजाप्रवृत्तत्वम्, तदत्र महद् वैशिष्ट्यं बालजीवानामपि भगवद्बहुमानोद्भवप्रयोजकम्। न हि तथाविधगुणप्रकर्षपात्रताविरहेऽवगणय्य मनुजक्षेत्रदुर्गन्धं सन्त्यज्य च दिव्याप्सरःप्रभृतिसत्कं सौख्यमवतरेयुर्देवेन्द्रा भगवत्सन्निधौ ।

तुर्यमभिहितं **यथास्थितवस्तुवादीति** । विज्ञापयत्येतद् वचनातिशयम् । न ह्यवाप्य कैवल्यं तीर्थकृत् कृतकृत्यतामधिगम्यैवमेव गच्छति मुक्तिम्, किन्तु निरूपयत्येष स्वप्रत्यक्षं तत्त्वं जगतः समक्षम् । उपदेष्टि मोक्षमार्गम् । तारयत्यनल्पभव्यजीवान् । विधत्ते रत्नत्रयीप्रभावनाम् । प्ररूपयत्येष उत्पादव्ययध्रौव्ययुक्तं सत्, जीवाजीवाश्रव-बन्धसंवरनिर्जरामोक्षास्तत्त्वम्, तच्च हेयज्ञेयोपादेयान्यतररूपम्, नाम-स्थापना-द्रव्य-भावलक्षणं निक्षेपचतुष्टयम्, वस्तु प्रमाणनयज्ञेयम्, सप्तभङ्गीप्रतिपाद्यो वस्तुधर्मः, अनन्तधर्मात्मकं वस्तु, मति-श्रुता-ऽवधिमनःपर्यव-केवलात्मकं ज्ञानापञ्चकम् इत्यादि ।

भावनीयं जिनवचनम् । श्रद्धेयमेतत् । तदर्थं त्याज्योऽसत्पक्षपातः । कर्त्तव्यं जिनवचनमात्मसात् । भेदनीयं विरागशिलीमुखै रागान्तरम् । आपादनीयः प्रतिक्षणं जिनवचनगोचर आत्मजागरभावः ।

उत्पाटितदंष्ट्रः सर्वोऽपि रज्जूरेवेत्युत्पाटितव्या रागद्वेषमहाहिदंष्ट्रा । विनाशनीयं कषायविषम् । न ह्येतद्विषपान एव मानुष्यसाफल्यम् । नापि घातिकर्मपोषणार्थमवाप्तेयमुत्तमा

सामग्री । अतो तत्प्रतिघाततः सफलीकार्येयम् ।

स एष वैशिष्टयचतुष्टयविशिष्टः परमात्मा त्रिभुवनगुरुस्त्रिलोकसत्त्वहितोऽनन्यशरणश्च । स एव पिता माता भ्राता त्राता च । अरहाश्चैष, तदगोचरविरहात् ।

ननु यथार्थवाद्येव भवति सर्वज्ञो वीतरागः अतोऽपार्थकं तद्विशेषणमिति चेत् ? न, असदभ्युपगमव्यवच्छेदार्थत्वात्, तथा ह्यस्त्येवंविधोऽसदभ्युपगमः - किल वीतरागादयोऽपि न यथास्थितवस्तुवादिनः, वस्तु वाचामगोचर इत्युक्तेः । स चानेन व्यवच्छिद्यते । प्रत्येयश्च वागर्थसम्बन्धः, तदभावे सङ्केतानुसारेण नियतप्रतीत्ययोगात्, तद्योगस्य च सर्वजनानुभविकत्वाच्चेत्यन्यत्र विस्तरः ।

स्यादेतत्, तर्हि यथास्थितवस्तुवादिभ्य इत्येतावदेवास्तु, नार्थो वीतरागादिग्रहणेनेति चेत् ? न, साम्यतः पूर्वधरादेरपि यथावस्थितिवस्तुवादित्वात्तद्व्यवच्छेदार्थं वीतरागादिग्रहणस्य सार्थकत्वात् । नन्वस्तु तेषामपि ग्रहणम्, गुणवत्तया तत्संस्तवस्यादुष्टत्वादिति चेत् ? सत्यम्, तथापि सर्वत्र गुणप्रकर्षवान् स्तवार्ह इति तस्य तत्सम्पादने तदन्तर्गतगुणानां तत्सम्पादनमेव, उत्कृष्टगुणस्तुतिकुक्षिप्रविष्टत्वा-त्तदन्तर्गतगुणस्तुतेः, तदेतन्न्यायख्यापनार्थत्वादुक्तव्यवच्छेदः समीचीनः । न चैष व्यवच्छेदस्तन्निराकरणार्थमिति ध्येयम् ।

अत्रातिशयचतुष्टयाविनाभाविनो भाविनश्चान्येऽपि देहसौगन्ध्यादयः प्रभूता वेदितव्या । ततश्च-चतुस्त्रिंशदतिशयसमन्वितेभ्यः परमात्मभ्यो नमः - इत्युक्तं भवति । अत एव

सकलविशेषणार्थोपसंहारेणाऽऽह - त्रैलोक्यगुरुभ्यः - इति । त्रैलोक्यवासिसत्त्वेभ्यो गृणन्ति शास्त्रार्थमिति त्रैलोक्यगुरवः, यद्वा त्रैलोक्यवर्त्तिजीवेभ्यो गुणाधिकत्वात्त्रिलोकपूज्यत्वाद्वा त्रैलोक्यगुरवः । तेभ्यो नमस्कारोऽस्तु । किं विशिष्टेभ्य इत्याह अरुहेभ्यो भगवद्भ्यः । भगः समग्रैश्वर्यादिलक्षणः । स विद्यते येषां ते भगवन्तः, तेभ्यः ।

**सूत्र : जे एवमाइक्खंति - इह खलु अणाई जीवे, अणाई जीवस्स भवे, अणाई कम्मसंजोग-निव्वत्तिए, दुक्खरूवे, दुक्खफले, दुक्खाणुबंधे ।**

**एअस्स णं वुच्छित्ती सुद्धधम्माओ । सुद्धधम्मसंपत्ति पावकम्मविगमाओ ।**

**पावकम्मविगमो तहाभवत्ताइभावाओ । तस्स पुण विवागसाहणाणि - १ चउशरणगमणं, २ - दुक्कडगरिहा, ३ - सुकडाण सेवणं ।**

**अओ कायव्वमिणं होउकामेणं सया सुप्पणिहाणं भुज्जो भुज्जो संकिलेसे, तिकालमसंकिलेसे ।**

ये परमात्मान एवमाचक्षते - लोकेऽनादिकालीनो जीवः, अनादिश्च जीवस्य संसारः, स चानादिकालीनकर्मसंयोग-निर्वर्तितः, दुःरूपश्च संसारः, दुःखपर्यवसानः, दुःखसन्ततिस्रष्टा च ।

अनुवादकरणस्यापि श्रेयोभूतत्वेन परमात्मोदितमनुवदति ग्रन्थकारः । अतस्तत्प्रारम्भे विघ्नविनायकोपशान्तये मङ्गलार्थ इष्टदेवतानमस्कार उक्तो वेदितव्यः । इहपदेन लोकाश्रयत्वं

जीवस्याऽऽवेदितम् । एतेनालोकाश्रयत्वव्यवच्छेदः प्रत्येयः । जीव आत्मा । अतति ताँस्तान् ज्ञानादिपर्यायान् गच्छति - आत्मा । स चानादिः सनातनः, असदुत्पत्त्ययोगात् । यथा हि मृत्पिण्डे तिरोभूतघटसद्भाव एव तन्निर्वर्तनक्रियया तदाविर्भाव युज्यते, तन्तुषु च समानेऽपि निर्वर्तनप्रयत्ने नाविर्भवति घटः, तस्मिन् तिरोभूतघटस्याभावात् । तदियं सत्कार्यवादवक्तव्यता प्रतिक्रुष्टोऽनेन पञ्चभूतचैतन्योत्पत्तिवादः । कथञ्चित्सदसदवस्थावस्थितो भवति मृत्पिण्डे घटः ।

अन्यतरैकान्ताभ्युपगमे दोषनिकुरम्बयोगात् । एवं सर्वथाऽप्यसदात्मन उत्पत्तिरेवासम्भविनी, शशविषाणादेरप्युत्पत्तिप्रसक्तेः, तुल्यन्यायात् । अतोऽनादिरेष मन्तव्यः ।

न च समुदायप्रयुक्तविशिष्टशक्तियोगाच्चैतन्योत्पत्तिर्भविष्यतीति वाच्यम्, तादृशशक्तौ प्रमाणाभावात् । प्रत्यक्षमनीक्ष्यमाणत्वात् । अदृष्टाभ्युपगमे युक्तियुक्तस्यात्मन एवाभ्युपगमस्योचितत्वात् । मृतशरीरे पञ्चभूतसमुदायसत्त्वेऽपि चैतन्यासत्त्वादनेकान्ताच्चेत्यन्यत्र विस्तरः ।

अतः कर्त्तव्यः स्वतन्त्रद्रव्यतयाऽऽत्माभ्युपगमः, सम्बन्धमात्रं तु भवत्यस्य शरीरेण । तदेव जन्मत्वेनाभिधीयते ।

आत्मवत्तद्भवोऽप्यनादिः । स च मनुष्यादिगतौ संसरणरूपविभावदशात्मकः । न चैष कदाचिन्नाभवत् । भवन्त्यस्मिन् कर्मवशवर्त्तिनः प्राणिन इति भवः । किम्भूतोऽयमित्याह अनादिकर्मसंयोगनिर्वर्तितः, कार्यानादित्वे कारणानादित्वस्यावश्यकत्वात्, अन्यथा तु प्राक् कर्मसंयोगरहितस्य शुद्धस्यात्मनो

भवाभावप्रसङ्गः, हेतुविरहात्, मुक्तवत् ।

अतः पूर्वपूर्वबद्धकर्मोदयतोऽवाप्यते तत्तच्छरीरेन्द्रियादिकमित्यवधारणीयम् । एवञ्चानादिः कर्मसंयोगः प्रवाहतः । न च तथापि कश्चित् प्रथमोऽप्यस्तु कर्मसंयोग इति वाच्यम्, निर्हेतुकोद्भवासम्भवात्, अतस्तत्तद्भवः कर्मसंयोगश्च तत्पूर्वपूर्वहेतुकः प्रतिपत्तव्यः ।

स एष भवो दुःखरूपः, दुःखफलः, दुःखानुबन्धश्च । तत्र दुःखरूपः, सर्वात्मना तन्मयत्वात्, विषयसुखस्यापि परमार्थतो दुःख रूपत्वानतिक्रमात्, सुखाभासमात्रत्वात्, कच्छूकण्डूयनवत्। तृष्णादुःखप्रतिकारजनितक्षणसुखाभिमानमात्रजनकमेव विषयसुखम् । तदेव चाधिकतरतृष्णादुःखवर्धनमित्यसुखमेव वस्तुतः । न हि तद् वस्त्वस्ति संसारे, यन्न स्याद्दुःखरूपम्, अत एव पारमर्षम् - **जम्म दुक्खं जरा दुक्खं रोगा य मरणाणि य । अहो दुक्खो हु संसारो जत्थ कीसंति जंतुणो** - इति (वैराग्यशतके...., उत्तराध्ययने......)

अपि च दुःखफलक एषः, गत्यन्तरेष्वपि जन्मादिदुःखप्रदत्वात् तत्फलत्वेन दुःखस्यावाप्तेः । न च सकृदेव प्रदाय फलं विरमत्येषः, किन्तु जनयति दुःखपरम्पराम्, अनेकभवानुबन्धिकर्मतद्बीजजनकत्वात् ।

एवञ्चानादितयाऽनन्तकालतो बम्भ्रमतोऽप्यस्य जीवस्य विसहतोऽप्यनन्तदुःखानि नाद्यापि सञ्जातः खेदः, नाद्याप्युद्भूतो भवोद्वेगः । उद्भूते तु तल्लेशेऽपि कथं नाम तदन्तकरणयत्नो न स्यादिति । अतोऽल्पकालीनं संयमकष्टलेश सहित्वाऽनन्त-

कालीनदुःखं विनाशयितव्यम् । रत्नतुल्य एष मनुष्यभवः, न युक्तं रत्नमयेन स्थालेन पुरीषशोधनम्, पुरीषशोधनस्थानीया अत्र विषयभोगाः ।

अतो यतनीयं संसारोच्छेदे ।

एतस्य भवस्य, णं इति वाक्यालङ्कारे व्यवच्छित्तिर्नाशः शुद्धधर्मात् - ज्ञानदर्शनचारित्ररूपात्, औचित्येन सातत्यसत्कार-विधिसेवितात् । न चैष न सम्भवति श्रावकादेरिति वाच्यम्, अभिग्रहपालनेन तेषामपि तद्भावसम्भवात्, अभिग्रहभावस्य सातत्येन भावादिति । पारयन्ति च तेऽपि स्वस्वभूमिका-प्रायोग्यरत्नत्रय्याराधनां साभिग्रहं कर्त्तुमिति ।

(१) न हि शुद्धाऽपि धर्माराधनाऽनादिकुवासनासम्मार्जने प्रत्यलाऽन्तरेण सर्वगमौचित्यानुपालनम् । तदभावे ह्यनुचित-जीविकाऽयुक्तं च वृत्तमापादयति निष्ठुराध्यवसयाम् । ततश्च पाकोत्तारितमृत्तिकावद् गुणघटनायामयोग्यः सञ्जायत आत्मा । अत औचित्यपालनेनानुसन्धेयं भावमृदुत्वम् । न च विशिष्ट-लोभादि परिहारमन्तरेण तत्पालनं सम्भवतीति यतितव्यं तत्र ।

(२) व्यतीतेष्वनन्तेषु भवेषु दृढीकृताः सन्ति मिथ्यात्वा-ज्ञानहिंसाहृषीकग्रामाविरतिभिरात्मनि तदध्यवसायाः । तद्दृढीकरणहेतुस्तु सातत्येन तदाऽऽसेवनम् । अतस्तदपनयनाय तत्प्रतिपक्षेषु दर्शनज्ञानचारित्रेषु यतनीयं सातत्यतः । न हि दीर्घकालीनो रोगः सन्ततमौषधाऽऽसेवन-मन्तरेणोपशाम्यतीत्येवं प्रकृतेऽपि ज्ञेयम् ।

(३) किञ्चावश्यकोऽत्र हृदयबहुमानात्मकः सत्कारः । सेवितो हि बाढमादरपुरस्सरं मोहः सुदीर्घकालं यावत् । अत एव नोद्विज्यतेऽत्यन्तं दुःखमयादप्येतस्मात्संसारात् । अत स्तदपाकरणाय सद्दर्शनादिः शुद्धधर्मोऽनुष्ठातव्यो बहुमानसारम् एवमेव मोहह्रासक्रमेण भवाभावसम्भवात् ।

(४) तथा धर्मश्रुत्यादावावश्यकं विध्यनुपालनम् । न ह्यादरेण सन्ततं सेवाप्रवृत्तोऽपि विध्यनभिज्ञः पुत्र आवर्जयति पितरम् । नापि कालानुपानयतनाकुपथ्यपरिहारादिविधि सेवनमन्तरेणौषधमपि विधत्ते कञ्चिद् गुणम् । एवं धर्मानुष्ठानेऽप्यूह्यम् ।

अत्रौचित्यं सर्वत्राप्यावश्यकम्, तद्यथा-जीविकायाम्, उचितलोकव्यवहारानुपालने, भाषाव्यवहारे, भोजनप्रवृत्तौ, कुटुम्बादिसम्भावने - इत्यादि । सातत्यार्थं तु तत्तज्ज्ञानादिप्रवृत्तौ नित्यं नियतकालं वा यतनीयम् । न ह्यन्यथा तत्संस्कार-दार्ढ्यमिति प्रतीतम् । आदरसम्पादनार्थं कर्त्तव्या धर्मधर्मिगोचरा महार्घ्यरत्ननिधानवत् प्रीतिः । विधेयस्तत्कथानुरागः । परिहार्या तन्निन्दाश्रुतिः । अनुकम्प्यास्तन्निन्दकाः । मन्तव्यः संसारसारतया धर्मः । भाव्यं धर्मावाप्त्यत्युत्सुकेन । उद्यन्तव्यं तदर्थम् । अनुभवितव्यस्तदवाप्तौ सम्भ्रमो रोमाञ्चश्च । मन्तव्योऽनेनाऽऽत्मा सौभाग्यशाली । परिहार्यं तद्बाधनिबन्धनम् ।

विध्यनुपालनार्थं यतितव्यं कालस्थानासनमुद्राऽऽलम्बन-प्रभृत्यनुपालने । सेवितव्या अष्टप्रकारोपेता ज्ञानाचारादयः । कर्त्तव्यस्तपोवीर्याचारविधिः । चिन्तनीया धर्मशून्येषु दया,

तत्सहितेषु मुदिता च ।

एतदर्थमपि प्रतिज्ञाग्रहणपुरस्सरं कर्त्तव्यं तदनुपालनम् । अभिग्रहो हि धर्मसातत्यभावप्रयोजकः । विधातव्यः सद्दर्शनादि लक्षणशुद्धधर्मभावस्पर्शः । मिथ्यात्वमोहनीयादिपापकर्म-विशिष्टक्षयस्तत्स्पर्शप्रयोजकः । क्षयोऽप्येष यथा न पुनरुन्मज्जनं स्यात्तेषां कर्मणाम्, तथाविधो द्रष्टव्यः । तादृशक्षये प्रयोजक-पञ्चकमिदम् - तथाभव्यत्वं कालो नियतिः कर्म पुरुषकारश्च । अत्र तथाभव्यत्वपरिपाकेण सञ्जायत इतरकारणाऽऽनुकूल्यम् ।

भव्यत्वमिति सामान्यतो मुक्तिगमनयोग्यत्वम् । तथाभव्यत्वं तदेव विशिष्टम् । सर्वभव्यजीवेषु सामान्यतः समानेऽपि भव्यत्वस्वभावे नैककाले भवति मुक्तिः, तत्र तथाभव्यत्वं नियामकम् । एतच्च साध्यपरिपाकम्, व्याधिवत् । अत उपायत स्तत्परिपाकपुरस्सरं तदन्तो मुक्तिप्राप्तिश्च भावारोग्यस्थानीया भवति, तदिदमुपायत्रयम् -

(१) अर्हत्सिद्धसाधुसर्वज्ञोक्तधर्मशरणगमनमाद्यम् । न ह्येतदन्यत्किमपि शरणं परमार्थतः, भावारिभयानिवारकत्वात् । अपि च नान्यशरणमैकान्तिकमात्यन्तिकं वा, सदातनत्वविरहाद-परशरणापेक्षाऽविगमाच्च । उक्त चतुष्टयशरणं तु पारमार्थिकम्, ऐकान्तिकत्वादात्यन्तिकत्वाच्च । एतच्च प्रयोजकं क्रमेण भवाभावसम्पादने ।

(२) द्वितीय उपायो दुष्कृतगर्हा । सा चेहपरभवानुष्ठितानां दुष्कृतानां पश्चात्तापपुरस्सरं गुरुसमक्षं निन्दारूपा । यथा - अकर्त्तव्यान्येतानि दुष्कृतानि । अहो ! दुष्ठु कृतं मयाऽधमेन,

मिथ्याऽस्तु तत् - इत्यादि । गुरोः पुरस्ताद्यथावस्थिततन्निवेदनं तद्गर्हा चेत्येतद् द्वयमप्रतिहतं कर्मानुबन्धापनयने । स्वोदयकाले नवकर्मबन्धापादनानुगुणा कर्मनिहितशक्तिस्तदनुबन्धः । नाश्यत एष दुष्कृतगर्हया ।

(३) तृतीय उपायः सुकृताऽऽसेवना । सा चार्हदादीनामुत्तमप्रवृत्तेः श्रेष्ठगुणानां चानुमोदनाया आसेवनरूपा । ननु कथं सुकृतपदेनात्रानुमोदनग्रहणमिति चेत् ? सविवेकतया निर्दम्भ उचितादरसहिते नियतभाविनि चानुमोदने सति तस्याऽखण्डशुभाध्यवसायसाधकत्वनियमादिति गृहाण । न ह्यन्या शुभाऽपि प्रवृत्तिर्नियमेन तादृशभावसिद्धौ प्रत्यला । अनुमोदने त्वावश्यको मनोवाक्कायप्रसन्नभावः । अतो महदेतत् कुशलाशयनिबन्धनमिति परिभावनीयम् । कृतकारितानुमतिभेदभिन्ने हि पुण्यपापे एवमुत्तमानुष्ठानानुमोदनमप्याऽऽसेवनविशेषः, पुनितानुष्ठानविशेषं चेदम्, अतो हि हृदये विशुद्धभावोदयः ।

उपायत्रितयमिदमौचित्यसातत्यसत्कारविधिपुरस्सरं सेव्यमानं परिपाकं वितनोति तथाभव्यत्वस्य, रोगपरिपाककृदौषधवत् । ततश्च पाककर्मविनाशः, ततोऽपि भावसारं शुद्धधर्मप्रतिपत्तिः, ततोऽपि संसरोच्छित्तिः । यत उक्तसाधनत्रितयादवश्यं दुःखमयदुःखफलकदुःखानुबन्धिसंसारविनाशात्मकस्येष्टसाध्यस्य सिद्धिः, अत आसेव्यमिदं मोक्षार्थिना प्रशस्तप्रणिधानैकाग्र्यभावविशुद्धिसचिवम् । सदा-सर्वकालम्, सुप्रणिधानम् - शोभनेन प्रणिधानेन, नात्र कालो नियम्यते, किन्तु सुप्रणिधानम्, यदा यदा क्रियते, तदा तदा सुप्रणिधानं

कर्त्तव्यमित्यर्थः, सुप्रणिधानस्य फलसिद्धौ प्रधानाङ्गत्वात्, यदाहुः - प्रणिधानकृतं कर्म, मतं तीव्रविपाकवत् । सानुबन्धननियमाच्छुभांशाच्चैतदेव तत् - इति । प्रणिधानं हि प्रापयति क्रमेण सिद्धिम् । उक्तञ्च षोडशके प्रणिधानं प्रवृत्तिर्विघ्नजयः सिद्धिरिति क्रमः । स च सूचयति प्रणिधानस्य मूलभावम् । अल्पमपि सुपात्रदानं सञ्जातं प्रणिधानप्रभावतः शालिभद्रत्वनिदानं सङ्गमकस्य ।

यदि तु तीव्ररागद्वेषोदयात्मकतीव्रसङ्क्लेशयोगादति हर्षोद्वेगरत्यरतिमदतृष्णादयः प्रादुर्भवन्ति, तदैतदुपायत्रयस्याऽऽसेवनमभीक्ष्णं करणीयम् । अन्यथाऽपि त्रिसन्ध्यं तु कार्यमेव।

अनन्तशः स्वीकृतचारित्रेणास्माकं जीवेन कृत एव शरणचतुष्टयस्वीकारोऽप्यनन्तशः, तथापि तात्त्विकतद्विरहेण न जातः पापप्रतिघातः । अतस्तत्सम्पादनाय वक्ष्यमाणार्हदादिविशेषणविसरविषयकश्रद्धासामग्र्येणोरीकार्यं तच्छरणम् । प्रतिपत्तव्यं यथा तत्तद्विशेषणोदिता गुणा विद्यन्ते मुख्यतयाऽर्हदादौ । अन्यत्र तु दोषा एव पापहेतव इति दृढमवधारणीयम् । एवं च सच्छरणतयाऽर्हदादिप्रतिपत्तिः, ततः सुभगम्मानिता च, यथा - अहो महारत्ननिधानवदवाप्तमिदं मयाऽर्हदादिशरणम् - इत्यादि। न चानेनावाप्तेन गणयति यत्किञ्चित् कष्टम् । मन्यते सर्वस्वमेनमेव । संवेत्त्येतदनुभावप्रसूतमासन्नभावं मोक्षस्य। भवत्येवमाश्रवसन्त्यागः । सोऽयं पापप्रतिघातः । ततश्चाविलम्बितं गुणबीजाधानम् । भावनीयं शरणस्वीकारे सुलसाश्राद्धीज्ञातम्।

अर्हन् मम तारकः । एष एव सर्वसुखमूलरूपः । न

ह्यतोऽन्यः कश्चिद्दर्शनीयो वन्दनीयः सेवनीयो वा । समर्पयाम्येनमेव स्वजीवनधनम् । भवाम्येतदाज्ञानुपालकः । इत्थम्भूतं संवेदनं शरणोरीकारस्य स्वरूपम् । यथा लूण्टाकप्रकरभीतः कश्चिद् धनवान् सशस्त्रशरणमुरीकर्त्तुकामो याचते करुणस्वरेण तदनुकम्पाम्, तथा भवाटव्यां कर्मकषायदस्युभिरात्महितविनाशमाशङ्कमानैरुरीकार्यमर्हदादिचतुष्टयशरणम् कर्मकषायविधीयमानदारुणात्मपीडनं तद्रक्षासामर्थ्यसमलङ्कृतार्हदादयस्तत्प्रयुक्तरक्षार्थिस्वात्मा चेत्येवं त्रितयमवश्यं जनयति तात्त्विकं शरणगमनाध्यवसायम् ।

मृत्युसमयेऽनन्यशरणतया गद्गद्स्वरेण गृह्यतेऽर्हदादिशरणम् । ज्ञायत एतत्काले यथा - न बन्धुवर्गविभवशरीरादयः प्रत्यला मत्त्राणाय । गन्तव्यमेव मया स्वल्पकालेन परलोकम् । अहो दुष्कृतान्यनुष्ठितानि मया । तद्दारुणविपाकविमुक्तेरर्हदादिशरणमेवोपायः - इति । एवमन्यस्मिनपि कालेऽङ्गीकार्यमर्हदादिशरणम्, मृत्योरनागमकालविरहात् ।

**सूत्र : जीवज्जीवं मे भगवंतो परम तिलोगनाहा अणुत्तरपुण्णसंभारा, खीणरागदोसमोहा, अचिंतचिंतामणी, भवजलहिपोआ, एगंतसरणा, अरहंता सरणं ॥**

अथार्हच्छरणम् । यावज्जीवमर्हन् मे शरणमस्त्विति प्रतिज्ञाविशेषः, अभिलाषमात्रत्वे भवान्तरकालस्याप्यन्तर्भावस्य न्याय्यत्वात् । कर्त्तव्य एवैषोऽपीति चेत् ? सत्यम्, तथापि परतो भङ्गभयादेतावत् कालपरिणमाणम्, न पुनरवधित्वेन, परतोऽप्यधिकृतशरणस्येष्टत्वात् । एतत् प्रतिज्ञावच एव ज्ञापयति,

यन्त्र मोच्यमाजीवनमेतच्छरणम् ।

अर्हन्तो **भगवन्तः परमत्रिलोकनाथाः**, श्रेष्ठत्वात्, त्रिलोकवासिनां देवादीनां दुर्गतिभयसंरक्षणकृत्त्वाच्च । ऐहिकस्तु नाथो रक्षति कतिपयादैहिकादेव भयात्, एते तु नाथा भाविनो दुर्गतिभयात् सुदीर्घसंसाराच्च रक्षन्ति । अवन्ति जन्म-जरा-मरण-परम्परात्मकाज्जटिलाज्जालात् । श्रद्धेयमेतदर्हद्वैशिष्ट्यम् । सन्ति जगति कोटिद्रव्यवितरणेन दारिद्र्यविदारकाः, सम्यगौषधप्रदानेन रोगनिवारकाः, शुश्रूषयाऽऽनुगुण्यापादकाः, लूण्टाकादिसकाशाद्रक्षणकृतश्च । नैष महानतिशयः, जन्मादिदुःखापनयनेऽसमर्थत्वात् । अतो माहात्म्यं त्वर्हतामेव । भावनीयमत्र श्रीपार्श्वकुमारविहितं ज्वलत्काष्ठाभ्यन्तरस्थस्य सर्पस्य त्राणम् ।

किञ्चैते**ऽनुत्तरपुण्यसम्भाराः**, तीर्थकृन्नामकर्म-समन्वितत्वाच्छ्रेष्ठयशः सौभाग्यादेयादिपुण्यप्राग्भारालङ्कृतत्वाच्च । अत एव तेषाञ्च्यवनसमयेऽपि कम्पन्त इन्द्राणामासनानि । विधीयते दिक्कुमारिकाभिः सूतिकर्मोत्सवः । क्रियते सानन्दं चतुःषष्टि सुरेन्द्रैस्तज्जन्माभिषेकः । प्राप्यते तैरतिशयसन्दोहः प्रागुक्तः प्रातिहार्यादिविभवश्च । एवं श्रेष्ठतमपुण्यशाली परमात्माऽवाप्तोऽस्माभिः । न ह्यतोऽपि परं किञ्चिदवाप्तव्यमिति दृढमवधारणीयम् ।

तथैते **क्षीणरागद्वेषमोहाः** । राग इष्टाऽऽसक्तिः, द्वेषोऽनिष्टारुचिः, मोहोऽज्ञानम् । एते येषामत्यन्तं क्षीणास्ते विभवः सन्तु मम शरणम् । श्रीवीरस्य नाभवद् गौतमे रागः, नाऽपि गोशालके द्वेषः, नाऽप्यस्य किञ्चिदपि कथनं

मोहसंवलितम्, वीतरागत्वात्सर्वज्ञत्वाच्च तस्य । एतच्छरणोरीकारेणैव सज्ज्ञानविरागाद्यधिगमः सम्भवी ।

किञ्चैतेऽ**चिन्त्यचिन्तामणयः** । चिन्तितमेव प्रयच्छति चिन्तामणिः, तदपि लौकिकमेव, तद्वितरितस्यानानुगामिकत्वात् । अचिन्तितमप्युत्कृष्टमामोक्षं फलं ददन्ति परमात्मानः । अतस्तानवाप्यापद्यपि न कर्त्तव्यो विषादः, नानुभाव्यं न्यूनत्वं चेति ।

त एव विशेष्यन्ते - **भवजलधिपोताः** संसारसागरोत्तारकत्वात् । मोचयन्त्येते चतुर्गतिसंसरणरूपाद् भवात्, विषयकषायाद्यनादिसञ्ज्ञात्मकाच्च ।

अपि चैने **एकान्तशरणाः**, सर्वाश्रितहितत्वेन । न ह्येभ्योऽन्ये केऽपि विदधन्ति सर्वकल्याणात्मकमुपकारातिशयम् । अपि चैभिरेव निरूपिता एकेन्द्रियादयः सूक्ष्मजीवाः । उपदिष्टं तद्रक्षाविधानम् । कारिता भव्यसत्त्वैस्तत्पालना । न ह्येवंविधं शरणं विश्वेऽपि विश्वे, अतोऽ**र्हन्तः शरणम्** । तत्राशोकाद्यष्टमहाप्रातिहार्यलक्षणां पूजामर्हन्तीत्यर्हन्तः, ते मम शरणम् - आश्रयः ।

**सूत्र : तहा पहीणजरामरणा, अवेअकम्मकलंका, पणट्ठवाबाहा, केवलनाणदंसणा, सिद्धिपुरनिवासी, निरुवमसुहसंगया, सव्वहा कयकिच्चा, सिद्धासरणं ।**

तथा सिद्धशरणस्वीकारः । ते च प्रक्षीणजरामरणाः प्रक्षीणे सदाऽपुनर्भावित्वेन जरामरणे येषान्ते, जन्मादिबीजाभावात् । अत एवैतेऽक्षयस्थितयः । नैतेषां संसारनाटके शैलूषानुकारित्वम्,

न शरीरनिर्मित्यादिका विडम्बना, न जराऽऽपादितं जर्जरत्वम्, न मृत्युप्रयुक्तः सर्वविनाशः । आस्तामन्यत्, जन्मकदर्थना-मुक्तत्वमेव परमः सिद्धगुणः, यत उक्तम् -

**जरामरणदौर्गत्य-व्याधयस्तावदासताम् ।**
**मन्ये जन्मैव धीरस्य, भूयो भूयस्त्रपाकरम् ।** इति

बालोऽपि राजपुत्रोऽतिमुक्तः श्रीवीरवचसोऽवगम्य जन्म-मरणावर्त्तं संसारम्, चरणाचरणेन कर्मक्षयपूर्वकं सिद्धभावाधि-गतेस्तदभावं च जग्राह चारित्रम् । जगाम मुक्तिम् । प्राप्तवान् सिद्धताम् ।

ननु सिद्धानां जन्माभावोऽपि कुत इति चेत् ? यत एते**ऽपेतकर्मकलङ्काः,** कर्मकलङ्करहितत्वादिति भावः । अत एवैते स्फटिकवदत्यन्तं निर्मलाः । पर्यवसितमाह - **प्रणष्टव्याबाधाः,** सर्वपीडाप्रभृत्यात्यन्तिकविनाशयोगात् । एतदपि सर्वोपाधिशून्यत्वात् । तथा हि - (१) शरीरकर्मादिविरहेण यशोऽपयशइष्टानिष्टादिप्रयुक्तवैषम्यविगमात् (२)

अनन्तज्ञानसुखादिस्वस्वरूपाविर्भावात् (३) रागादिविभाव-विगमाच्च सिद्धानां सर्वव्याबाधानां प्रकर्षतः प्रनाशः प्रत्येयः ।

एत एव विशेष्यन्ते - **केवलवरज्ञानदर्शनाः** सर्वज्ञाः सर्वदर्शिन श्चेत्यर्थः । एतदपि स्वभावाविर्भावात्, तत्स्वभावत्वादात्मनः, न ह्यतोऽन्यथाऽस्य चेतनत्वोपपत्तिरिति भावनीयम् । ज्ञस्वभावो हि चेतनः । प्रवर्त्तत एतत्स्वभावो ज्ञेयमात्रे । ज्ञेयरूपाश्च त्रैकालिकाः सर्वभावाः । ज्ञायन्त एवैत आवरणात्मक-

प्रतिबन्धकविगमे ।

किञ्च सिद्धाद् **निरूपमसुखसङ्गताः**, स्वाधीनसुखसन्दोहसमलङ्कृतत्वात्, विषयाद्यपेक्षाविरहात्, असंयोगजत्वान्नित्यत्वात्सहजत्वाच्च तत्सुखस्य । भावनीयं यथा - अहोऽस्माकं सापेक्षं तुच्छं क्षणिकं दुःखपरिणामि सुखम् । निरपेक्षमनन्तं परमं चाहो सिद्धसौख्यम् । अस्तु तदधिगमाय सिद्धशरणम् । ज्ञातमत्रकरकण्डूराजा, यः दुष्टदुर्बलत्वलक्षणं बलीवर्दस्यावस्थाद्वयं दृष्टवा स्वसौख्यानित्यत्वमवगम्य प्रवव्राज सिद्धसुखलिप्सया ।

इष्टसिद्धिर्हि प्रवृत्तेः प्रयोजनम्, इष्टं च जीवस्यैकान्तसौख्यम् । तच्च सिद्धावस्थामात्रप्राप्यम् । एतद्विचार्योद्यन्तव्यं तदवस्थाधिगमार्थम् । सिद्धा च सा सिद्धानाम् अत एते **सर्वथा कृतकृत्याः**, सिद्धप्रयोजनत्वात् । मोक्षलक्षणश्रेष्ठतत्त्वभूताः सिद्धाः । द्विविधं हि जगत् - जडं चेतनं च । तत्र जडं न कदापि शश्वच्छुद्धस्वभावमेति । चेतनं तूपयाति नित्यशुद्धसतत्त्वम् । तत्रापि सिद्धजीवा अपरेभ्यः श्रेष्ठाः, कर्मकलङ्कविमुक्तत्वात् । नवतत्त्वेष्वप्यन्तिमं मोक्षतत्त्वम्, तच्च सिद्धावस्थास्वरूपम्, नातः परं किमपि साध्यमवशिष्यते । अतः परन्तत्त्वमिदं शरणीकार्यम् ।

**सूत्र : तहा पसंतगंभीरासया, सावज्जजोगविरया पंचविहायारजाणगा, परोवयारनिरया, पउमाइनिदंसणा, झाणज्झयणसंगया, विसुज्झमाणभावा साहू सरणं ।।**

तृतीयं मेऽस्तु साधुशरणम् । ते च प्रशान्तगम्भीराशयाः, क्षमादिगुणगणोपेतत्वात् । अत एव क्षमाश्रमणाभिधानेनोच्यन्त

एते । गभीरा हि भवत्येषां चित्तवृत्तिः, अपेततुच्छाध्यवसायत्वात्। नातस्ते रागादिसङ्क्लेशगोचरा भवन्ति । नापि प्रापयन्त्यन्यान् तद्गोचरताम् । केवलं साक्षिभावतः कर्मनाटकमीक्षमाणा अनुभवन्ति विपद्यपि प्रसन्नभावम् । नयन्त्यन्यानपि प्रशमम् । विभाव्यमत्र यशोधरमुनिचरित्रनिर्वर्णितं सुदत्तमुनिवृत्तम् । तथाहि तेन मुनिना श्वापदकुक्कुरा राजा च प्रतिबोधिताः स्वेन लोकोत्तरेण प्रशान्तगम्भीराशयेनेति ।

गभीरता हि रक्षति मृदुभावम् । ततश्च सुकराऽकार्यनिवृत्तिः, सुलभोऽहङ्कारनिकारः, असम्भवी विपदाद्यापादितचित्तक्षोभः, सञ्जायते यत्किञ्चिदपि निबन्धनं तत्त्वविचार परिपोषकम्, विलयमेति कषायविषयानुरागपरिणतिः ।

अपि च श्रमणाः **सावद्ययोगविरताः** । अवद्यं पापम् । पापसहितमनोवाक्कायप्रवृत्तिः सावद्यकरणकारापणानुमोदनरूपा । गृहकुटुम्बादिपरायणानामसम्भविनी ततो मुक्तिः । मुक्तास्तु श्रमणा एव तदनुमोदनातोऽपि । विचिन्त्यमत्र कुमारपाल-भूपालमन्त्रिदृष्टान्तम् । तेन हि नवं हर्म्यं दर्शयता सूरेः सकाशात्प्रशंसावचोऽपेक्षितम् । ज्ञापितश्चासौ तच्छिष्येन धर्मकर्मैवानुमोदयेत् सूरिरिति । कृतं तेन तदेव हर्म्यः पौषधशालात्वेन । अनुमोदितं सूरिणा यथा - शोभनाऽत्र भविष्यति धर्माराधना - इति ।

एवं पापनिवृत्तिवद् धर्मप्रवृत्तिरपि भवति मुनिविधेयेत्याह - **पञ्चविधाचारज्ञाः** ज्ञानाचार-दर्शनाचार-चारित्राचार-तपआचार-वीर्याचार-रूपाचारपञ्चकस्य सम्यग् ज्ञातार इत्यर्थः । ज्ञानमप्यत्र

ज्ञपरिज्ञाप्रत्याख्यानपरिज्ञाभ्यां ज्ञेयम्, तदवगन्तारः परिपालकाश्च भवन्ति श्रमणा इति हृदयम् ।

एत एव विशेष्यन्ते - **परोपकारनिरताः** उपदिशन्त्येतेऽवसरे निष्पापजीवनं भव्यजीवेभ्यः, त्याजयन्ति पापानि । उत्साहयन्ति गुणाधिगमार्थम् । वितरन्ति योग्यजीवेभ्यः श्रामण्यं च । स एष उपकारः स्वपरौ प्रतीत्यैकान्तिकः, शुद्धत्वात्, अपकार-लेशरहितत्वात् । आत्यन्तिकश्च, उपकारान्तर-निरपेक्षत्वात्, दोषगुणत्यागादानक्रमेणास्यानन्तसुखप्रयोजकतया कृतकृत्यत्व-निदानत्वात् । विभावनीयमत्र शास्त्रोदितं प्रदेशीराजज्ञातम्, यः प्राग् नास्तिकोऽपि प्रतिबोधितः सम्यक् श्रीकेशिस्वामिना। जगाम जिनाज्ञाराधनपुरस्सरं देवभूयम् । भविष्यति क्रमेणावाप्य मुक्तिं कृतकृत्यः ।

तथैते **पद्मादिनिदर्शनाः** पङ्कोत्पत्तिजलस्थितिभावेऽपि तदस्पर्शनेन यथा पद्मादीनि । एवमेव कामेन जनिता भोगेन च वृद्धिमुपागताः श्रमणभगवन्त तदुभयस्पर्शमन्तरेणैव जीवन्ति योगिजीवनम् । आदिना स्वच्छस्वादुशान्तशरदृतु-कालीन-सरोवरवत् स्वच्छा एते प्रशमप्रभावेन, मधुराः कारुण्येन, अत एतच्छरणोरीकारेणावाप्नोम्यहमपि पद्मादिसादृश्यतामिति भावनीयम् ।

किञ्चैते **ध्यानाध्ययनसङ्गताः**, तत्र धर्मध्यानमाज्ञापाय-विपाकसंस्थानानुचिन्तनात्मकम् । शुक्लध्यानं द्रव्यपर्यायान्तर-गोचरचित्तानिरोधरूपं मैत्र्यादिभावना-चतुष्केऽनित्यत्वादि-द्वादशभावनासन्होदे वान्यतमगोचरे प्रशस्तैकाग्रविचारात्मकम्,

न यस्मिन् भवेच्चित्तव्याक्षेपः । यद्वा समस्तेऽपि क्रियामार्गे प्रशस्तैकाग्रं ध्यानम्, तद्वन्तश्च श्रमणाः । अध्ययनम् - वाचना-पृच्छनापरावर्त्तनाऽनुप्रेक्षा धर्मकथात्मको ज्ञानयोगः, तत्परायणा भवन्त्येते । आस्वादयन्ति च ध्यानाध्ययनानुभावादिहैव मुक्तिसौख्यम् ।

तथैते श्रमणा **विशुद्ध्यमानभावाः** । यतः शास्त्रविहित समितिगुप्तिस्वाध्यायावश्यकादीनि धर्मकृत्यान्युत्तरोत्तरं विशोधयन्त्यात्माध्यवसायम्, तथातत्स्वाभाव्यात्, हिंसादि-प्रवृत्तेर्मालिन्यापादनस्वाभाव्यवत् । जिनाज्ञाविहितयोगा हि पानीयस्थानीया प्रक्षालयन्त्यनन्तकालीनं कामक्रोधादिलक्षणं भावमलम् । न ह्यन्यभवे सम्भवत्येतत्प्रक्षालनमिति यतितव्यं तत्र । धन्याश्च निर्ग्रन्थगुरवः, यैः सार्थकीकृतं स्वजीवन-मुक्तविशोधनैः ।

क एवम्भूताः ? इत्याह - सम्यग्दर्शनादिभिः सिद्धिं साधयन्तीति साधवः - मुनयः, ते यावज्जीवं सन्तु मे शरणम् - आश्रयः ।

**सूत्र : तहा सुरासुरमणुअपूइओ, मोहतिमिरंसुमाली, रागदोसविसपरममंतो, हेउ सयलकल्लाणाणं, कम्मवणविहावसू, साहगो सिद्धभावस्स, केवलिपण्णतो धम्मो जावज्जीवं मे भगवं सरणं ।**

तथा - न केवलं साधवः शरणम्, किन्तु केवलिप्रज्ञप्तो धर्म इति सम्बन्धः । स च **सुरासुरमनुजपूजितः** । तत्र सुराः - ज्योतिष्का वैमानिकाश्च देवाः, असुराः - भवनपतयो

व्यन्तराश्च निर्जराः, मनुजाः - पुरुषविद्याधराः । एतद्विशेषण-मापादयत्यत्यन्तं बहुमानं धर्मगोचरम्, ऐहिकसमृद्धिप्रदश्रेष्ठ्या-दिभ्योऽप्यभ्यर्हततरत्वज्ञापकत्वाद्धर्मस्य, देवादीनामपि पूज्यत्वात् तस्य ।

तथैष **मोहतिमिरांशुमाली,** मोहः सदसदादिविवेकविरहः। अनेनोदेति मूढावस्थाऽऽत्मनः, या प्रतिबध्नाति तत्त्वदर्शनम् । एवञ्चान्धकारतुल्यो मोहः । सूर्यस्थानीयः श्रुतचारित्रात्मको धर्मोऽपनयत्येनम् । धर्मशरणानुभाव एष यदतो विलीयते मोहः।

किञ्चैष **रागद्वेषविषपरममन्त्रः,** यथा विषेण प्राणिनां मृत्यु स्तथा रागादिना भावप्राणानाम्, एतेनैव कर्मबन्धप्रयोजकभावेन प्रतिभवं क्रियत आत्मा मृत्युगोचरः । अतो दारुणं हालाहलं रागद्वेषौ । हन्त्येतौ धर्मः, अतो मन्त्रतुल्य एषः ।

एतत्त्वत्रावधेयम् - विषयाशंसापरिहारपुरस्सरं कर्त्तव्यो धर्मः, तदाशंसाया रागविषोपबृंहकत्वात् । रागद्वेषताण्डवात्मके चेष्टितेऽपि नानुरक्तव्यम् । कथन्नाम रागद्वेषविषमुपशमयेन्मम धर्म इति भावनीयम् ।

तथैष धर्मः सर्वज्ञोक्ततया **सकलकल्याणानां** हेतुः, देवमनुजसद्गतियशस्सातेभ्य आरभ्य आ मुक्ति सकलकुशल-निबन्धनत्वात्तस्य । ज्ञापयत्येतद्विशेषणं यन्न हिंसादयः कल्याणनिबन्धनानि । अतोऽनन्यशरणतया गृहीतव्यं धर्मशरणम्।

स एव विशेष्यते - **कर्मवनविभावसुः,** कर्मवनस्य ज्ञानावरणीयादिसमुदयरूपस्य विभावसुरिव अग्निरिव, तद्दाहकत्वेन । कर्मवने हि निष्पद्यन्ते दुःखफलानि । एतद्वनं

पुष्पितं फलितं च सर्वज्ञोक्तशुद्धधर्माभावात् । दुःखमागच्छति कर्मोदयात्, न ह्येतत् सहज आत्मस्वभावः । कर्मजनकं तु हिंसादिपापम् । कर्मवनं दह्यते सर्वज्ञोदिताहिंसादिधर्मानलेन। तेन च भस्मसात्कृते तस्मिन्न सम्भवति दुःखोदयः । भवत्यात्मा स्फटिकवन्निर्मलः । प्रादुर्भवत्यनन्तज्ञानादिमयं ज्योतिः ।

तथैष **साधकः सिद्धभावस्य,** तत्सम्पादकत्वात् । न हि धर्माभावे सिद्धिः, तद्भावे चावश्यं व्रज्या तां प्रति । धर्मसाधनं यथा यथा प्रवर्त्तते, तथा तथा जीवस्य वीतरागदशाऽऽसांयोगिकसुखशुद्धज्ञानदृष्टिप्रभृतिरासन्नीभवति । तदेवंविधः केवलिप्रज्ञप्तो धर्मो यावज्जीवमस्तु मे शरणम् ।

चत्वार्यप्येतानि शरणानि सम्बद्धानि मिथः एकार्थसाधकत्वात् । तथाहि वीतरागोऽर्हन्, तद्भावोपदेष्टा च, सिद्धोऽपि वीतरागः, तद्भावसाधकः साधुः, तद्भावोपायभूतश्च धर्मः । अतो नैतच्छरणचतुष्टयस्वीकारेऽन्योऽन्यविरोधः ।

पापप्रतिघातार्थं चतुःशरणगमनानन्तरं कर्त्तव्या दुष्कृतगर्हा, तामेव व्यनक्ति -

**सूत्र : सरणमुवगओ अ एएसिं गरहामि दुक्कडं । जं णं अरहंतेसु वा, सिद्धेसु व, आयरिएसु वा, उवज्झाएसु वा, साहुसु वा, साहुणीसु वा, अन्नेसु वा धम्मठाणेसु माणणिज्जेसु पूअणिज्जेसु, तहा माइसु वा, पिइसु वा, बंधुसु वा मित्तेसु वा, उवयारीसु वा, ओहेण वा जीवेसु, मग्गट्ठिएसु अमग्गट्ठिएसु, मग्गसाहणेसु अमग्गसाहणेसु, जं किंचि वितहमायरिअं अणायरिअव्वं अणिच्छिअव्वं पावं पावाणुबंधि,**

**सुहुमं वा बायरं वा, मणेण वा, वायाए वा, काएण वा, कयं वा, काराविअं वा, अणुमोइअं वा, रागेण वा दोसेण वा मोहेण वा, इत्थ वा जम्मे जम्मंतरेसु वा, गरहिअमेअं, दुक्कडमेअं, उज्झिअव्वमेअं विआणिअं मए कल्लाणमित्त-गुरुभगवंतवयणाओ । एवमेअंति रोइअं सद्धाए । अरिहंत-सिद्धसमक्खं गरहामि अहमिणं दुःकडमेअं, उज्झियव्वमेअं । इत्थ मिच्छा मि दुक्कडं, मिच्छा मि दुक्कडं, मिच्छा मि दुक्कडं ।**

अत्रार्हदाशातनाविरोधाविनयावर्णवादाज्ञावगणनरूपं तन्मूर्तिचैत्यसिद्धान्तादिविरोधादिलक्षणमश्रद्धाऽशुद्धप्ररूपणात्मकं वा तम्प्रति विरुद्धमाचरणमुच्यते । अनेनैव भ्रान्ता लक्ष्मणाऽऽर्या-ऽष्टशतकोटाकोटिसागरोपमकालं यावत् संसारम् ।

सिद्धं प्रति विपरीतमाचरणम्, यथा - न विद्यत एव सिद्धः। चेदस्ति तदा किन्नामाऽस्य चैतन्यम् ? - इत्यादिकुयुक्तिप्रपञ्चनम्, भोजनाद्यभावे कुतः सिद्धस्य सुखम् - इत्याद्यसदारेकाकरणम्, तन्मूर्त्याद्याशातनादिकं च ।

न च वेत्त्येतत्कृत्, यथा - किं फलोऽन्नादिसम्भोगः ? बुभुक्षादिनिवृत्तये । तन्निवृत्तेः फलं किं स्यात् ? स्वास्थ्यं तेषां तु तत् सदा ।। अस्वस्थस्येव भैषज्यं स्वस्थस्य तु न दीयते । अवाप्तस्वास्थ्यकोटीनां भोगोऽन्नादेरपार्थकः ।। अकिञ्चित्करकं ज्ञेयं मोहाभावाद्रताद्यपि । तेषां कण्ड्वाद्यभावेन हन्त कण्डूयनादिवत् ।। अपरायत्तमौत्सुक्य - रहितं निष्प्रतिक्रियम्। सुखं स्वाभाविकं तत्र नित्यं भयविवर्जितम् ।। परमानन्दरूपं

तद् गीयतेऽन्यैर्विचक्षणैः । इत्थं सकलकल्याणरूपत्वात्साम्प्रतं ह्यदः ।। संवेद्यं योगिनामेतदन्येषां श्रुतिगोचरः । उपमाऽभावतो व्यक्तमभिधातुं न शक्यते - इति (अष्टकप्रकरणे ३२/४-८) ।

आचार्यादारभ्य धर्मस्थानं यावदपि विपरीताचरणमनाचरणीयाचरणादनिच्छनीयप्रवृत्तेश्च दृष्टव्यम् । मातापित्रादिकं प्रति कृतघ्नभावद्रोहेर्ष्यापीडाऽपमानानादरतिरस्कारादयोऽनाचरणीयाः । अमार्गसाधनादरबहुमानादयोऽप्यनाचरणीयाः। समासतो मिथ्याज्ञानाप्रशस्तरागादिप्रयुक्ता सर्वाऽपि प्रवृत्तिरनाचरणीयाऽनिच्छनीया चेतीयं गर्हणीया । भावनीयं दुष्कृतगर्हणे दृढप्रहारिज्ञातम् ।

अत्र व्यतिकरे 'मिच्छामि दुक्कडम्' वारत्रयं पाठः । व्याख्या चास्यार्थविशेषत्वात्प्राकृताक्षरैरेव न्याय्या, निर्युक्तिकारवचनप्रामाण्यात् । यदाह-**मित्ति मिउमद्दवत्ते च्छत्ति य दोसाण छायणे होइ । मित्ति य मेराए ट्ठिओ दुत्ति दुगुंछामि अप्पाणं।। कत्ति कडं मे पावं ऽत्ति य डेवेमि तं उवसमेणं । एसो मिच्छादुक्कडपयक्खरत्थो समासेण** - इति (आवश्यकनिर्युक्तौ......)

अत्र प्रथमं हृदयकोमलभाव आवश्यकः, न हि हृदयकठोरभावे सत्युदेत्यनुशयपरिणामः । प्रतिबध्नाति ह्यहङ्कारः - अधमोऽस्मि, पापोऽस्म्यपराध्यस्मीत्याद्यात्म-गर्हागर्भितमध्यवसायम् । अतस्त्याज्योऽयमात्मशुद्ध्यभिलाषिभिः । तदर्थमप्युपादेयं मार्दवम् । अन्यथा त्ववश्यं कर्मोदये भविष्यति दैन्याविर्भावः ।

दोषतिरस्कारदोषपरिणतात्मजुगुप्सालक्षणं द्वयं क्षिणोति

पापप्रवृत्तौ स्वरसातिशयम् । ततश्च कथञ्चित्सत्यपि तत्सेवने न तथाविधसङ्क्लिष्टाध्यवसायप्रसूतिः ।

न चैवं पापप्रवृत्तितद्गर्हाद्वयस्याभीक्ष्णं भावाद्दम्भो धृष्टता वा स्यादिति वाच्यम्, संसारवासेऽशक्यपरिहाराणामपि दोषाणां गर्हणस्यावश्यकत्वात्, तदभावे तद्गोचरहेयबुद्धेरसम्भवात् । अतो वीतरागता प्राप्तिं यावद्यथा मुनिरपि गर्हति रागादिभावम्, तथा गृहिणाऽपि कर्त्तव्यमेव सावद्यप्रवृत्तिगर्हणम् । न चैतद्दम्भरूपम्, शुद्धभावप्रयुक्तत्वात् । ज्ञापकञ्चात्र भरतचक्रिवृत्तम्, येन सावद्यगर्हाद्याराधनाभ्यासेनाऽऽसादितं कैवल्यम् ।

दुष्कृतगर्हानुभावेनासाद्यते प्रह्वीभावः । अतो हि स्वैरताप्रतिबन्धः । ततश्च सुसम्भवा गुणपरिणत्यात्मनि । अयोग्या भवति कठोरत्वकलङ्किता मृत्तिका घटभावाऽऽपादनार्थम् । एवं गुणपरिणत्यर्थिणा कर्त्तव्योऽहङ्कारनिकारः । तत्र च साधनभावं भजते दुष्कृतगर्हेति ।

उन्मूलनीयं पापप्रवृत्तिबीजम्, यथा परस्त्रीदर्शनादौ बीजं चक्षुर्लोलत्वादि । तदुपशमे विहितेऽसम्भवः पापप्रवृत्तेः, क्रोधोपशमे कृते परुषवचनोच्चाराद्यसम्भववत् । भावनीयं दुष्कृतगर्हणेऽतिमुक्तमुनिवृत्तं कुमारपालपूर्वभववृत्तं च ।

**सूत्र : होउ मे एसा सम्मं गरिहा । होउ मे अकरणनिअमो । बहुमयं मम एयं ति इच्छामि अणुसट्ठिं अरहंताणं भगवंताणं गुरुणं कल्लाणमित्ताणं ति ।।**

गर्हासचिवमेव चिन्तनीयं यथा - भवतु ममैषा गर्हा सम्यक्, भावसारं विधिवदस्त्वेषेत्याशयः । भावसारता चास्यां दुष्कृत-

गोचरहेयबुद्ध्या सम्पाद्यते । ग्रन्थिभेदेन तथा पुनरपि न बन्धविषयमुपयात्युत्कृष्टा कर्मस्थितिः, एवं तदबन्धरूपोऽस्तु मेऽकरणनियमः । इति सामर्थ्यमित्याहुर्वृत्तिकाराः, अर्थापत्ति-गम्यमिदमिति तदर्थः । प्रकरणमेतद्दुष्कृतगर्हासत्कम्, अतो-ऽकरणनियमो दुष्कृतसम्बन्धी प्रत्येय इति भावः ।

एतत् - दुष्कृतगर्हातदकरणनियमलक्षणं द्वयम्, चतुःशरण-गमनदुष्कृतगर्हारूपं वा युगं मम बहुमतम् । इच्छाम्येतदर्थं त्रिलोकनाथस्यार्हतः कल्याणमित्रभूतानां गुरूणां चानुशास्तिकम्, तस्या एवोक्तचतुःशरणगमनादिसर्वाराधनाया बीजभूतत्वात् ।

ननु प्रथमं गुर्वनुशास्त्यभिलाषो न्याय्यः, साक्षादुपकारित्वाद् गुरोरिति चेत् ? न, गुणाधिकत्वादर्हतः, उक्ताऽऽराधनाया मूलोपदेशकत्वाच्च । अधिकगुणाधिगमार्थमधिकगुणवद्बहुमानार्थं च यतनीयं तत्त्वानुगामिभिः । एवमेव तत्त्वानुगामित्वोपपत्तेरिति भावनीयम् । प्रणिध्यन्तरमाह -

**सूत्र : होउ मे एएहिं संजोगो, होउ मे एसा सुपत्थणा । होउ मे ईत्थ बहुमाणो, होउ मे इओ मुक्खबीअं ति ।।**

न हि हितशिक्षासमागमद्वयप्रार्थनमिदं वाङ्मात्रम् अपि तु प्रोक्तद्वयप्राप्त्यर्थं प्रयत्नशीलोऽहं भूयामित्येतत्प्रयोजनतस्त-त्प्रवृत्तिः, अत एव तेन सहितमेवोक्तनिर्णयोऽपि कर्त्तव्यः । न ह्यात्मसामर्थ्यमात्रतोऽर्हदादिसमागमः, अपि तु देवगुरुकृपया, अतस्तदग्रतो भावसारं प्रार्थनीयमिदम् । यथा - अस्तु मे सन्ततमपि त्वत्संयोगः-इति । परमपुरुषमाश्रित्य कृता प्रार्थनाऽपि खलु जगति दुर्लभा निरुपमा निष्पर्यन्तोपकारका च ।

अपि चास्तु मम तद्गोचरः सद्भावातिशयः बहुमानश्च । अतोऽत्यन्तहृदयोल्लासेन समं कुर्यामहमुक्तयाचनम् । इत एव भवतु मम मुक्तिबीजावाप्तिः - इत्यपि प्रार्थनीयम् ।

प्रार्थना ह्यापादयति प्रह्वीभावम् । कारयति परमपुरुषगोचरं बहुमानम् । तनोति शुभाध्यवसायोल्लासम् । सुसंस्कारैः समृद्धीविधत्ते जीवम् । नाशयति मिथ्यात्वादिकं कर्म । प्रापयति मुक्तिबीजम् । तच्च भवति सुवर्णकलशवत् सानुबन्धं शुभकर्म । अनुबन्धः परम्परा कुशलस्य । यथा हि भग्नोऽपि सुवर्णघटो न जहाति सुवर्णभावम्, एवं प्रार्थनयाऽवाप्तं शुभं कर्म विपाकोदयतः क्षीणमपि जनयत्यपरं शुभं कर्म, सानुबन्धत्वादेव ।

प्रकृतेऽपि करणीयं प्रणिधानम्, यथा - सदाप्यस्तु मे दुष्कृतगर्हा, तदकरणनियमः तद्गोचरो बहुमानभावः, उत्कटा च भवतु ममैषा प्रार्थनेति ।

नन्वस्तु देवादिसंयोगयाचना, प्रार्थनायाचनं तु न सङ्गतिमङ्गतीति चेत् ? न, महाप्रभावत्वात्तस्याः, अचिन्त्यानुभावार्हद्गोचरत्वात्, इष्टसिद्धिनिदानत्वात्, धनादियाचनातिशायित्वात्, आत्मविशुद्धिप्रयोजनत्वात्, निराशंसभावबीजत्वाच्च ।

आवश्यको दुष्कृतगर्हा-देवगुरुसंयोगप्रार्थना चेति त्रितयगोचरो बहुमानभावः । तृणायैव मन्तव्यमुक्तत्रितयस्य पुरस्ताद् जगत् । एतद्धि जनयति मुक्तिबीजसाधकं शुभानुबन्धम् ।

अर्हदादिसंयोगस्तत्सेवयैव सफलीभवति, अतः कर्त्तव्यैषा । तदन्यसेवया हि जीवेन निर्मितं स्वदुःखम्, अतः -

**सूत्र : पत्तेसु एएसु अहं सेवारिहे सिआ आणारिहे सिआ पडिवत्तिजुत्ते सिआ निरइआरपारगे सिआ ।**

तारकदेवाधिदेवेषु सद्गुरूषु च प्राप्तेषु सत्सु भवाम्यहं तदुपासनायोग्यः, न हि तद्भावाभावे सम्भवत्युत्तमपुरुषसेवा। योग्यो हि सेवको भवति सेवनीयाज्ञापात्रम् । अतो भवाम्यहं कल्याणकारिण्यास्तदाज्ञायाः पात्रम् । तदाज्ञापालनं हि सङ्केतः शिवसुन्दर्याः । अस्तु मे तत्प्रतिपत्तिः । भवतु मे तद्विषया भक्तिः । भवतु मम निरतिचारं तदाज्ञानुपालनम् । एतदर्थं ममैषा बहुमानगर्भिता प्रार्थना ।

न ह्यन्तरेण सेवां भक्तिं च सम्यगाज्ञास्वीकारः समुपसम्पन्नता च सम्भवति । तत्स्वीकारादिं विना च निरतिचारमाज्ञापारगमनं दुर्घटम् । अत एवोक्त क्रमोपन्यास इति भावनीयम् । एतेनैव क्रमेण तीर्णा शय्यंभवादयः । एतदनादरेणैव निमज्जिता कूलवालकादयः, अतोऽर्हतामधिगम्य सेवनीया अर्हदादयः ।

## (३) सुकृताऽऽसेवनम्

पापप्रतिघात-गुणबीजाधानसत्कं तृतीयमुपायमाह -

**सूत्र : संविग्गो जहासत्तीए सेवेमि सुकडं, अणुमोएमि सव्वेसिं अरहंताणं अणुट्ठाणं, सव्वेसिं सिद्धाणं सिद्धभावं ।**

अथाहं संविज्ञः सन् सेवे सुकृतम् । संविग्नः संवेगसम्पन्नो मोक्षमार्गार्थीति यावत् । तथऽनुमोदये सर्वेषामर्हदादीनामुत्तमं धर्मानुष्ठानम्, सिद्धानां सिद्धावस्थाम् ।

समानं फलं भवत्यनुष्ठानकरण-कारणा-ऽनुमोदनानाम्, अनन्तकालीनानन्ततीर्थकृतां दुष्करधर्मानुष्ठाने किन्नामास्माकं सामर्थ्यम् ? तथाप्यासाद्यते तदनुमोदनेन तथाविधो गुणः ।

अर्हद्नुष्ठानानि - श्रेष्ठमप्रमादभावसचिवः संयमः, उग्रविहारः, घोरं तपः, प्रचण्डः परीषहजय, दारुणोपसर्गेष्वपि निर्भयत्वम्, लोकोत्तरा सहिष्णुता, कर्मपीडितजगदुत्तारणोपदेशः, अतिचिन्तामणिश्रुतसम्यक्त्वदेशविरतिसर्वविरतिवितरणम् । धन्यं खलु जीवनमर्हतः, अहो महत्यस्य प्रवृत्तिः । अनन्तानामर्हता-मनन्तानामनुष्ठानानाम् । अहो लोकोत्तरा तेषाम्प्रवृत्तिः । अहो मादृशानां दीनानां महानसावुपकारकः । न ह्येष्वेकतममपि अनुष्ठानमाचरितुं समर्थोऽस्मि । तथाऽपि मदहोभाग्यम्, यदुत्तमान्यनुष्ठानानि ममावगमगोचरीभूतानि । प्राप्ता मया प्रमोदभावना । अधिगतं मया तदनुमोदनम् ।

करण-कारणा-ऽनुमोदनानि समानफलानि । तान्येव धर्मसाधनमार्गरूपाणि । अत्र तृतीयोपायरूपाऽनुमोदना भावसारेण हृदयेन गद्गद्स्वरेण सम्भ्रमबहुमानपुरस्सरं तत्तदनुष्ठानमनोरथ-सचिवा च क्रियमाणा स्यादेव तदनुष्ठानफलप्रदा । अनुष्ठानमनुसरन्मोदनमानन्दो हि अनुमोदनम् । अतस्तेनोद्विज्यते संयमादिप्रतिपक्षभूतेभ्यो दोषेभ्यः, क्रियते दृढोपादेयमतिः संयमाद्यनुष्ठानगोचरा ।

सिद्धानां सिद्धावस्था नामाव्याबाधा स्थितिः, अनन्तं शश्वत्सुखम्, अरूपित्वं स्फटिकवन्निष्कलङ्कं शुद्धं स्वरूपम्, अनन्तं ज्ञानं दर्शनं च । अनुमोदयाम्येतत्सर्वम् । अहो

मेऽधमाऽवस्था, यस्यां पुनः पुनर्जन्यते म्रियते च, पुनः पुनर्विषयीभूयते रोग-शोकादीनाम् । प्रतिहन्यते कामक्रोधादिभिः । विधीयन्ते हिंसादिपापानि । कलुषीभूयन्ते महामोहादिभिः । धन्यास्तु सिद्धा एव, ये मुक्ता एताभिर्विडम्बनाभिः ।

**सूत्र : सव्वेसिं आयरियाणं आयारं, सव्वेसिं साहूणं साहुकिरिअं,**

तथा त्रिकालसम्भवान् सर्वेषामप्याचार्याणां ज्ञानाचार-दर्शनाचार-चारित्राचार-तपआचार-वीर्याचारात्मकाऽऽचारपञ्चकस्यानुपालनम्, भव्यजीवेभ्यस्तद्दानं तत्प्रवर्त्तनं च । अद्भुता च तेषां प्रवचनप्रभावना अनुमोदयामि सर्वमप्येतदनुष्ठानमेषाम् । क्व जगतो हिंस्राणि मोहप्रयुक्तानि विवेकशून्यानि कष्टप्रदानि च पापाचरणानि । क्व च सविवेकत्वादिविभूषितानि ज्ञानाचरणादीनि । क्व पापाचाराणां पालनं तत्प्रचारश्च ? क्व च ज्ञानादिपुनिताचारप्रचारः ?

धन्यास्ते केशिगणधराः, यैर्नास्तिकोऽपि प्रदेशी राजा सद्दृष्टिं प्रापितः । थावच्चापुत्राऽऽचार्यैरपि मिथ्यादृक् सुदर्शनः श्रेष्ठी महाश्रावकपर्याये प्रतिष्ठितः ।

एवं सर्वेऽप्युपाध्याया भगवन्तः, ये भाविकान् मुमुक्षुवर्गान् तद्योग्यतानुसारेण जिनागममन्त्रतुल्यान् मङ्गलमयान् सूत्रालापकान् सम्यग् विधिना ददन्ति । अनुमोदयाम्यहं तत्सूत्रदानं सूत्रपरम्परारक्षानिदानम् । अहो तेषां महापुंसां भावानुकम्पा, यया सञ्जातोऽभूतपूर्व उपकारस्तस्य शिष्यवर्गस्य ।

एवमपगतसर्वसङ्गानां सम्यक् स्वाध्यायाऽहिंसा - संयम - तपो - विनय - भक्ति- वैयावृत्त्य - शुभध्यान - मैत्री - कारुण्य - महाव्रत - तद्भावना - परीषहोपसर्ग - सहीष्णुता - रत्नत्रय्याराधना सहायभावप्रभृतीनामाराधनानां करोमि भावसारामनुमोदनाम् । अहो साधूनां लोकोत्तरा जीवनवृत्तिः। अहो निर्दोष एषां व्यवहारः । अहो स्व-परहितानुबन्धिनी कल्याणकारिणी प्रवृत्तिः । अहो विश्ववत्सलं पुनितमाचरणम्। अहो पुरुषार्थप्राबल्यम् । अहो यैर्भाग्यशालिभिरेतादृशं सुन्दरमवाप्तं जीवनम्, ते धन्याः, तीर्णप्रायस्तैः संसारावारपारः।

एवं भावसारं विधेया तत्तत्प्रशस्तानुष्ठानानुमोदना । कर्त्तव्या तद्गोचरा श्रद्धा । धर्त्तव्यो निधानावाप्तितुल्यः सम्भ्रमः । मन्तव्यमेतदेव संसारे सारभूतम् । इत्थं ह्यवाप्यते पुरुषार्थयोग्यः कर्मक्षयोपशमः ।

**सूत्र : सव्वेसिं मुक्खसाहणजोगे, सव्वेसिं देवाणं, सव्वेसिं जीवाणं, होउकामाणं कल्लाणासयाणं मग्गसाहणजोगे ।**

सर्वैरपि श्रावकैः क्रियमाणं देवगुरुवैयावृत्यतत्त्वश्रवण-धर्मराग-प्रभुभक्ति - साधुसेवा - दान - व्रत- नियम - तपः - सामायिक - स्वाध्यायादिकं कृत्यं साक्षात् परम्परया वा मोक्षसाधनम् । अनुमोदयाम्यहमेतान् दर्शन - ज्ञान - चारित्रव्यापारान् । न हि मोहाधिकारेऽनपगते सति प्राप्येत तथाविधमध्यात्मयोगानुष्ठानम् । ज्ञापयति चैतदद्भुत-विकसितात्मगुणावस्थाम् । दुर्लभा चैषा दोषनिभृते विश्वे । अतो यत्र कुत्रचिदपि दृश्यमानाऽनुमोदनीया ।

नैतन्मात्रम्, अपि तु सर्वेऽपि देवाः, सर्वेऽपि जीवाः, ये मुमुक्षवः, निकटमुक्तयः, चरमपुद्गलावर्त्तवर्त्तिन, विशुद्धाशयाश्च, तेषामप्यनुमोदयेऽहं मार्गसाधनयोगान् अत्र मार्गः सम्यग्दर्शनज्ञान-चारित्रात्मकः सिद्धिसञ्चरः । तत्साधनभूता योगाः - मार्गानुसारिणामादिधार्मिकाणामपुनर्बन्धकानामाद्ययोगदृष्टिचतुष्टयवर्त्तिनां च जीवानां माध्यस्थ्यपुरस्सरं कुशलप्रवृत्तयः देवदर्शन - व्रत-नियमसेवनादियोगानां पूर्वसेवा, न्यायसम्पन्नत्वादि-मार्गानुसारि-गुणाश्च । एभिर्हि प्राप्यन्ते सद्दर्शनादयः । एतद्गुणापेक्षयैव मिथ्यादृशोऽपि गुणस्थानकमभिहितम् । एवमेव चास्य सान्वर्थभावसम्पादनमिति विभावनीयम् । अत एवानुमोदनीयता प्रोक्तगुणानाम्, मोक्षसाधकत्वात् । मोक्षमार्गस्योपयोगितापेक्षया जिनवचनाविरोधापेक्षया च गुणा एवैतेऽनुमोदनीयाः, न तु मिथ्यादृगिति ध्येयम् ।

अथ विमुच्याभिनिवेशम्, सन्त्यज्यातत्त्वकल्पनाम्, क्रियते प्रणिधानविशुद्धिः । प्रणिधानं कर्त्तव्यनिश्चयः, तदभिलाषश्च, उक्तञ्च - विशुद्धभावनासारं, तदर्थार्पितमानसम् । यथाशक्ति-क्रियालिङ्गं, प्रणिधानं मुनिर्जगौ - इति ।

अत आह -

**सूत्र : होउ मे एसा अणुमोअणा सम्मं विहिपुव्विआ सम्मं सुद्धासया, सम्मं पडिवत्तिजुआ सम्मं निरइआरा, परमगुणजुत्त-अरहंता-सामत्थओ ।**

श्रेष्ठैर्लोकोत्तरैर्गुणैर्युक्तानामर्हत्सिद्धादीनामनुभावेन प्रोक्ता मेऽनुमोदनाऽऽगमानुसारिणी सद्विधिसचिवा भूयात् ।

तीव्रमिथ्यात्वकर्मविनाशेन सम्यक् शुद्धाशयाऽस्तु, मा भूदस्यां पौद्गलिकाऽऽशंसादम्भादिकृतं कालुष्यम् । अस्तु चैतद्गोचरः सम्यक् स्वीकारः । मा भूदस्यां स्खलनात्मका अतिचाराश्चेति ।

नानुमोदनमात्रे, अपि तु यत्र कुत्रचिदपि धर्मानुष्ठाने प्रोक्तान्यङ्गान्यावश्यकानि, तद्यथा - (१) शास्त्रोक्त-विध्यनुपालनम् । आप्तवचविषयः प्रबलः सापेक्षभाव आवश्यकः, तद्यथा - मया तद्वचनानुसारेणैवाराधनायां प्रवर्त्तितव्यं, नोपेक्षणीयमेतदिति । (२) विशुद्धोऽध्यवसायः, हृदये पुनितपरिणामपरम्पराऽविच्छित्तिरित्यर्थः । (३) यथाशक्ति सम्यक् क्रिया, यथा समभावाऽऽसादनार्थं विधिपुरस्सरं सामायिकानुष्ठाने प्रवृत्तिः । (४) तत्प्रवृत्त्या निरतिचारं पालनम् ।

न ह्येतच्चतुष्टयगतान्यतमस्याप्यपाये साध्यसिद्धिः । (१) विध्याग्रहो हि जिनवचनसापेक्षभावज्ञापकः, जिनवचस्तु प्रतिपदमपि पुरस्कार्यमेव मुमुक्षुणा । जिनाज्ञैव संसार-सागरोत्तरणोपाय इति । अन्यथा तु स्वच्छन्दभावः पातयति बलादप्यज्ञानचेष्टायाम्, ततश्च कुतो भवाभावसम्भवः ?

(२) परिहार्या विषयतृष्णा, हातव्या कामक्रोधमद-पारुष्येर्ष्यादयो दोषाः, हृदयकालुष्याऽऽपादकत्वात् । एतदपरिहारेण हीयते जिनाज्ञानुरागः । अत उक्तदोषपरिहारेण यतितव्यं जिनाज्ञानुपालने ।

(३) तथा परिहर्त्तव्यः प्रमादभावः । उद्यन्तव्यं धर्मप्रवृत्तौ अन्यथा पापनिपातध्रौव्यात् । ततोऽपि पापे प्रवर्त्तमानस्य भवेत्परिणामकालुष्यम् । अनादिकालीनाऽऽहारादिसञ्ज्ञाप्रयुक्त-

दुष्प्रवृत्तिसन्तताभ्यासप्ररूढकुवासना तत्प्रतिपक्षतपोदानादिधर्मपुरुषार्थमात्रशक्यक्षयेति दृढमवधारणीयम् । स्वच्छन्दमाहारादिप्रवृत्तेस्तु प्रत्युत तत्पोष एव ।

(४) तथा धर्मप्रवृत्तिरपि यथा निरतिचारा स्यात्तथा यतितव्यम । एवमेवोत्तरधर्मप्रवृत्तितद्गुणस्थानकयोः सम्भवात्, परम्परया वीतरागत्वावाप्तेश्च । अतः सत्त्वसारेण मनसा यतितव्यमत्र ।

चतुष्टयं ह्यात्महितसाधनम् - जिनाज्ञागोचरोपादेयमतिः, हृदयनैर्मल्यम्, पुरुषार्थप्राबल्यं सत्त्वं च । एतच्चतुष्काधिगमार्थं सम्यग् विधिपालने, विशुद्धाध्यवसाये, यथाशक्तिक्रियापालने, निरतिचारतन्निर्वाहे च यतनीयम् ।

जिनाज्ञाप्रतिबन्धतो हि भवति जिनशरणस्वीकारः । ततोऽपि तद्विषयपरमार्थतारकत्वादिगुणगणप्रतिपत्तिः । तदुक्तमेव तत्त्वम्, तदभिहितो मार्ग एव सिद्धिसञ्चरः इति भावसारं मन्तव्यं भवति प्रोक्तप्रतिपत्तिप्रभावतः । ततश्चावश्यं भवत्यनाद्यहङ्कारनिकारः । स एष सर्वोऽपि जिनाज्ञाप्रतिबन्धपरिणामः, अतस्तत्राऽऽदृतव्यम् ।

भर्त्तव्यं हृदयं शुभाध्यवसायतः । सन्ततमपि धारणीयं परिणामपावित्र्यम्, विरेचनीयं भावमालिन्यम्, क्षपितव्याः कुसंस्काराः । पोषणीयाः सुसंस्काराः । एवञ्चैतदभ्यासपरिपाके प्राप्यते परमः प्रशस्ताध्यवसायः ।

तीर्थकृत्स्थापितं धर्मतीर्थमपि पुरुषार्थसत्त्वयोर्माहात्म्यज्ञापकम् । यदि तु काल-स्वभाव-पूर्वकर्म-भवितव्यतामात्रत एवात्मोद्धारः

सम्भवेत्, तदा कथममूढलक्ष्योऽपि भगवान् धर्मतीर्थस्थापने प्रवर्त्तेत ? अपि च पञ्चाचारवर्त्ती वीर्याचारोऽपि पुरुषार्थाऽऽवश्यकतां प्रज्ञापयति । न ह्येतद्विनाऽऽचारचतुष्टये निर्दोषत्व-प्रबलत्वादिविशिष्टा सम्भव्याराधनेति यतितव्यं तत्र ।

सविषयेयं प्रार्थनेति ध्येयम् । अतो विद्यतेऽस्यालम्बनभूतः प्रार्थनीयः । स च पारमार्थिको महानुभावत्वाद्युपेतः पुरुषः । अतो नैतत्प्रार्थनानिष्फलत्वसम्भवः । प्रार्थनीयस्य लोकोत्तर-गुणगणोपेतत्वेन प्रार्थकहृदयप्रह्वीभावापादकत्वात्, स्वाश्रय-गुणोपादेयमतिजनकत्वात्, विशुद्धाध्यवसायजनकत्वाच्च । एवञ्च तमाश्रित्य कृता प्रार्थना । सफलैव, अवन्ध्यनिबन्धनत्वाद् गुणसन्दोहस्य ।

प्रार्थनाऽप्यनुमोदनाया वितरत्यनुमोदनासामर्थ्यम्, ततोऽपि क्रमेणाऽऽसाद्यते निरतिचारं चारित्रम् । प्राप्यत आनुपूर्व्याऽजरामरत्वम् । अवन्ध्यं बीजमुपादेयमतिसचिवाऽभिलाषा धर्मानुष्ठानस्य । भावनीयमत्र नागकेतुवृत्तान्तम् । सुवर्णसिद्धिरसतुल्या हि प्रार्थनेत्यत्र निष्कर्षः ।

पारमार्थिका सुकृतानुमोदनाऽपि दुर्घटा मिथ्यात्व-मान्द्यमन्तरेण । तदर्थं कर्त्तव्यः शुभभावोल्लासः । सोऽपि सम्भवत्यर्हदादिगोचरविशिष्टबहुमानतः । एवञ्च शुभाध्य-वसायप्रकर्षतः सम्भवति मिथ्यात्वमान्द्यम् । ततश्चोल्लसति हृदये तात्त्विकाऽनुमोदना । स एष भगवदनुभावः, कर्णधारोऽपि प्रापणीयप्राप्तौ ध्रुवतारकाद्यनुभावं मन्यते, तथा प्रकृतेऽपि योज्यम । अर्हदाद्यालम्बनाभावत एव जीवस्य संसारसागरेऽजनि बम्भ्रमणम् ।

**सूत्र : अचिंतसत्तिजुत्ता हि ते भगवंतो, वीअरागा सव्वण्णू परमकल्लाणा परमकल्लाणहेऊ सत्ताणं ।।**

अकल्पनीय सामर्थ्यशालिनस्तेऽर्हदादयो भगवन्तः, वीतरागाः सर्वज्ञाश्च । न ह्यर्हच्छक्तिर्गम्या परेषाम्, अगम्यत्वात्, अमेयत्वात्, अनुपमत्वाच्च । श्रेष्ठकल्याणस्वरूपा ह्यर्हन्तः । परमात्मशरणं नाम त्रिविधसंसारतापविमुक्तिरनन्तकल्याणाभियानं च ।

आचार्यादयोऽप्यवाप्तकैवल्या मुख्यतया सर्वज्ञा वीतरागाश्च । तदन्येऽपि महाविरागा बहुश्रुताश्च सर्वज्ञवीतरागवदालम्बनीयाः, परमकल्याणरूपत्वादेव, तद्धेतुभावाच्च । न हि तत्कल्याणमस्ति जगति यन्न प्राप्यते परमेष्ठिसमुपासनतः । प्रकाश्यते तदुपदेशेन मुक्तिमार्गः । उज्जागरयति तद्दर्शनं कल्याणोपायान् । वितरति श्रेयस्तत्स्मरणम् । प्रापयति महाकल्याणं तदालम्बनम् । अत एतेऽचिन्त्यसामर्थ्यशालिनः । एतदेवाभिप्रेत्याऽऽहुः सुधर्मस्वामिनः - अभयदयाणं चक्खुदयाणं मग्गदयाणं सरणदयाणं बोहिदयाणं धम्मदयाणं जिणाणं जावयाणं तिन्नाणं तारयाणं बुद्धाणं बोहयाणं मुत्ताणं मोअगाणं - इति ।

विहितमेतदेव विधेयं सुलसयाऽपि भगवच्छरणोरीकरणरूपम् - एष एव मदाधारः, एष एव निरीक्षणीयश्चिन्तनीय उपासनीयश्च । न ब्रह्मादयो देवताः सेवनीयाः, नाऽपि शब्दादयो विषयाः - इत्यादि । एतद्विभावनेनैवोपार्जितमनया तीर्थकृन्नाम कर्म ।

**सूत्र : मूढे अम्हि पावे, अणाइमोहवासिए, अणभिन्ने भावओ,**

**हिआहिआणं अभिन्ने सिआ, अहिअनिवित्ते सिआ, हिअपवित्ते सिआ, आराहगे सिआ, उचिअपडिवत्तीए सव्वसत्ताणं सहिअंति। इच्छामि सुकडं इच्छामि सुकडं, इच्छामि सुकडं ।**

नाहमुक्तरीत्योरीकुर्वेऽर्हदादीन् । नाप्यभिलषाम्येतदुरीकारं भावसारम् । अतो मूढोऽहम्, पापश्च, आवृतोऽस्म्यहं मोहादिपाप्मभिः समन्ततः । अनादिः खलु मम संसारः । अनादिकालतोऽभ्यस्तो मम मोहः । भावितस्तेन मदात्मनः प्रत्येकः प्रदेशः, लशुनगन्धभावितवस्त्र-सत्कप्रत्येकतन्तुवत् । रागद्वेषमोहवासनावासितं विवर्तते मन्मनः । उन्मत्तोऽस्मि खल्वहं तद्भावनाभावितत्वात् । तत्त्वानभिज्ञोऽस्म्यहम् । न जानाम्यहं वास्तवं मदात्महितम्, नाप्यहितम् । क्व खलु मम पारमार्थिकसुकृतानुमोदनावकाशोऽपि । किन्त्वभिलषामि शरणमर्हतः । ईहे हितेतराभिज्ञताम् । निवर्त्ते मिथ्यात्वा-विरतिकषाययोगलक्षणेभ्य आश्रवेभ्यः । प्रवर्त्ते सद्दर्शनादियोगेषु। भवाम्यहं मोक्षमार्गाऽऽराधकः । करोमि तन्निर्देशकार्हदुपासनाम्। विदधे सद्गुरुशुश्रूषाम् । धारयामि भावप्रतिबन्धं जिनाज्ञायाम्। सेवे सुकृतानि । भवामि सर्वत्राऽप्युचितवृत्तिविभूषितः । तदेवंरीत्याऽहमिच्छामि सुकृतम्, इच्छामि सुकृतम्, इच्छामि सुकृतम् ।

अत्र वारत्रयभणनेऽयं हेतुः - (१) मनोवाक्काययोग-त्रयेणाप्यभीष्टं सुकृतम् । (२) भूत-भावि-वर्त्तमान-कालत्रितयगोचरमिप्सितमस्ति सुकृतम् । (३) सुकृतानुमोदनाऽपि करण-कारणा-ऽनुमोदनरूपप्रकारत्रयेणेहिता ।

उत्तमानुष्ठानमिदं सुकृताऽऽसेवनम्, अन्यजीवसुकृतानुमोदनाऽपि महाफलदायिनी, भावनीयमत्र रथकारमृगबलदेवमुनिज्ञातम् ।

**सूत्र : एवमेअं सम्मं पढमाणस्स सुणमाणस्स अणुप्पेहमाणस्स सिढिलीभवंति परिहायंति खिज्जंति असुहकम्माणुबंधा ।**

अथैतत्सूत्रस्य सम्यक्पठनादेरद्भुतं फलमाह - सम्यक् = संवेगेन हृदयं भृत्वा, संवेगः - चतुःशरणवक्तव्यतोक्तार्हदादितत्तद्विशेषणगोचरा भावसारा श्रद्धाऽऽदरश्च । (२) दुष्कृतगर्हायां संवेगः - हृदयाद्दुष्कृतशल्यान्युद्धृत्य दुष्कृतकारिणं स्वात्मानं प्रति जुगुप्साभावः, यथा - अहोऽधमोऽस्म्यहम्, अहो दुष्ठु कृतं मया - इत्यादि । (३) सुकृतासेवने संवेगः - शरणाद्युपायत्रयावाप्तिर्मम सञ्जातातेति धन्योऽस्म्यहम् - इत्यादि ।

एवं संवेगाय प्रधानभावं समर्प्य सूत्रपठनश्रवण-स्मरणानुचिन्तनप्रवृत्तानां पूर्वबद्धाशुभकर्मरसस्तदनुबन्धश्च मन्दीभवति। परिहीयन्ते तत्कर्मस्थितयः, अल्पीभवन्ति तत्प्रदेशाः । विशिष्टप्रशस्ताध्यवसायसदभ्यासयोगेन निर्मूलमप्युन्मूल्यन्तेऽशुभकर्मानुबन्धाः । ते चात्मनि व्यक्ता इतरा वा तीव्रसङ्क्लेशसंस्काराः । तेषु हेतुभावमुपयान्ति सङ्क्लिष्टतराणि कर्माणि। तान्येव च भवविटपिमूलानि । एतद्विषोपशमे महामन्त्रोपमः प्रकृतसूत्रपाठः । एष एव महौषधसङ्काशस्संसाररोगोपशमे। एष एव च परमरसायनमजरामरत्वावाप्तये । एतत्पठनश्रवणमनननिदिध्यासनान्युल्लासयन्ता शुभाध्यवसायान्, चूर्णयन्त्यशुभानुबन्धान्, शोषयन्ति संसारसागरम् ।

**सूत्र : निरणुबंधे वाऽसुहकम्मे भग्गसामत्थे सुहपरिणामेणं, कडगबद्धे विअ विसे, अप्पफले सिआ, सुहावणिज्जे सिआ, अपुणभावे सिआ ।**

एवं पञ्चसूत्रेण हृदयोद्भवाः शुभाध्यवसाया अपनयन्त्यशुभानुबन्धविषम् । प्रतिबध्यते तेनाशुभकर्मणां विपाकपरम्पराजननसामर्थ्यम् । यथा मन्त्रसामर्थ्येण कटकबद्धं विषमल्पतरफलं भवति, एवं चतुःशरणगमनादि-प्रशस्तपरिणामात्मकेन मन्त्रेणात्रावशिष्टाशुभकर्मात्मकं विषमल्पविपाकं भवति । ततश्च स्यादेतत् सुखापनेयम् । न चान्यदपि तथाविधमुत्कृष्टस्थितिकं कर्म बध्यते पुनरपि । एवञ्च यथा पूर्वकाल आत्मनाऽनुभूतोऽशुभकर्मविपाकः, तथा नैष्यत्काले प्राप्येत कदाचित् । एवमवगम्य चतुःशरणगमनाद्युपायत्रयनिसेवनफलातिशयं निसेवनीयमेतत्प्रतिदिनं त्रिकालम् ।

एवमपायापगमरूपं फलमुक्त्वाऽधुना सदुपायसिद्धिलक्षणं फलमाह -

**सूत्र : तहा आसगलिज्जंति परिपोसिज्जंति निम्मविज्जंति सुहकम्माणुबंधा । साणुबन्धं च सुहकम्मं पगिट्ठभावज्जिअं नियमफलयं सुपउत्ते विअ महागए सुहफले सिआ, सुहपवत्तगे सिआ, परमसुहसाहगे सिआ ।**

एतत्सूत्रतदर्थपठनादिभिः सञ्चीयन्ते प्रभूताः शुभकर्मानुबन्धा आत्मनि । पुष्यन्ते च ते शुभभावाभिवृद्ध्या, प्राप्नुवन्ति परां काष्ठाम् । अहो महामहिमेदं पञ्चसूत्रम् । सानुबन्धं हि कर्म तद्भावत उत्कृष्टं भवति । शुभाध्यवसायप्रकर्षोपार्जित-

त्वेनैतन्नियोगतो भवत्युत्तमफलप्रदम् । यथैवैकान्तकल्याण-कृदुत्तममौषधं सम्यग् विधिप्रयुक्तमारोग्यपुष्ट्यादिकं प्रयच्छति सुन्दरं फलम् । एवं सानुबन्धं शुभं कर्माऽपि प्रवर्त्तयति प्रशस्तानुष्ठाने, प्राप्नोत्युत्कृष्टकोटिम्, साधयति परम्परया निर्वाणोद्भवं परमं सुखम् । यथैवाशुभानुबन्धेनानन्तः संसारः, तथैव शुभानुबन्धप्रकर्षतोऽनन्तमोक्ष इति तात्पर्यम् ।

अत एव निदानं विना रागादिं विमुच्योभयलोकाशंसा परिहृत्याशुभानुबन्धान् निरुध्य कर्त्तव्य एतत्सूत्रपठनादिना शुभभावोल्लासः । असाधारणं निमित्तकारणमिदं सूत्रं शुभभावोल्लासे । अतः सत्प्रणिधानेन चित्तप्रशमसचिवं पठनीयमेतत् । कर्त्तव्यं व्याख्यानुसारेण तच्छ्रवणम् । चिन्तनीयस्तत्पदार्थः ।

अथात्र निदाननिषेधनमयुक्तम्, प्राग् **होउ मे एसा अणुमोयणा** - इत्यादिग्रन्थतो निदानस्याभिहितत्वादिति । मैवम्, तस्य निदानत्वाभावात् ।

रागद्वेषमोहान्यतमप्रयुक्ताशंसा हि निदानपदार्थः । सा च भवति क्लिष्टकर्मबन्धनिबन्धनम्, प्रापयति भवपरम्परां स्फातिम् । संवेगाभावस्तद्धेतुः । भावनीयान्यत्र त्रिपृष्ठ - ब्रह्मदत्ता-ऽग्निशर्मवृत्तान्तानि । अकर्त्तव्यानि निदानानीत्यत्र निष्कर्षः ।

किन्तु न निदानलक्षणं घटते प्रकृतायां सुकृतानुमोदनायाम् । न हि दोष कल्मषशून्या विशुद्धभावसचिवाऽप्येषा निदानरूपा, मुक्तिप्रार्थनाया अपि तत्त्वप्रसक्तेः । अनिष्टं चैतत्, आगमविरुद्धं च । यथाऽऽरोग्यबोधिलाभयाञ्चा निदानं न भवति, तन्निषेध-कवचोविरोधप्रसक्तेः । तत्रारोग्यम् - भावनीरुक्ता मोक्ष इति

यावत् । न ह्येवंविधप्रशस्तप्रार्थनात्मिका संवित्तिर्निदानमित्यलं प्रसङ्गेन ।

**सूत्र : अपडिबंधमेअं असुहभावनिरोहेण सुहभावबीअं ति सुप्पणिहाणं सम्मं पढिअव्वं, सम्मं अणुपेहिअव्वं ति ।**

**नमो नमिअनमिआणं परमगुरूवीअरागाणं । नमो सेसनमुक्कारारिहाणं । जयउ सव्वण्णुसासणं । परमसंबोहीए सुहिणो भवन्तु जीवा, सुहिणो भवन्तु जीवा, सुहिणो भवन्तु जीवा ।**

अत्र सूत्रपरिसमाप्तौ चरमं मङ्गलमाह देवैरपि वन्दिता इन्द्रा गणधरमहर्षयश्च यं नमस्कुर्वते, तं परमगुरुं वीतराग-परमात्मानं नमोऽस्तु । अन्यानपि नमस्कारयोग्यान् गुणाधिकान् नमस्कारो भूयात् । निराकृत्य मिथ्यादर्शनानि जयतु सर्वज्ञ-शासनम् । मिथ्यात्वदोषापाकरणपुरस्सरं वरबोधिलाभावाप्त्या - सम्यग्दर्शनादि शुद्धधर्मावाप्त्या सन्तु प्राणिनः सुखिनः । सन्तु प्राणिनः सुखिनः । सन्तु प्राणिनः सुखिनः । एवं पापप्रतिघातेन - अकुशलानुबन्धाश्रवव्यवच्छेदेन गुणबीजाधानम्, भावतः प्राणातिपातविरमणमिति तन्न्यासः । तथाऽनुबन्ध-तोविचित्रविपाकवत्कर्माधानमित्यर्थः । एतत्सूचकं सूत्रं पापप्रतिघातगुणबीजाधानसूत्रं समाप्तम् ॥

# अथ द्वितीयं सूत्रम्

## साधुधर्मपरिभावना

धर्मगुणगोचरप्रकृतिसौन्दर्याद्यनुचिन्तनम् । विचित्रविपाकं शुभं कर्म हि धर्मगुणबीजमित्युक्तं प्राक् । तद् बीजमाहितं सत् तत्तद्वैचित्र्यात्तत्कालादिनिमित्तभेदेन विपच्यते । एतदाभिमुख्येन, तत एव धर्मगुणप्रतिपत्तिश्रद्धोपजायते । तस्यामुपजातायां यत् कर्त्तव्यं तदभिधातुमाह -

**सूत्र : जायाए धम्मगुणपडिवत्तिसद्धाए भाविज्जा एएसिं सरूवं, पयइसुंदरत्तं, अणुगामित्तं, परोवयारित्तं परमत्थहेउत्तं।**

तथाविधमिथ्यात्वादिकर्मक्षयोपशमेनात्मन्युल्लसति धर्मगुणप्राप्त्यभिलाषः । ततश्च चिन्तनीयं धर्मगुणस्वरूपम् । अनन्तकालीनहिंसादिसङ्क्लिष्टपरिणामविशोधका हि धर्मगुणाः । अहो एषां प्रकृतिसौन्दर्यम् । अहो भवान्तरेऽपि सुसंस्काररूपेणैषां सञ्चरणशीलत्वम् । अन्यपीडापरिहारप्रवणात्मकतयाऽहो तेषां परोपकारित्वम् । परम्परया मोक्षसाधकत्वेनाहो तेषां परमार्थहेतुत्वम् ।

श्रेष्ठं शीघ्रमेव सिद्धिसाधकं च साधुत्वमवाप्तुं तद्भावनया भावयितव्य आत्मा । एतदर्थमपि कर्त्तव्यं प्राथमिकं शिक्षणम्। एतच्चाणुव्रताभ्यासतः सम्भवीत्यतोऽणुव्रतावाप्तिर्दूती महाव्रतानामित्युच्यते । कथन्नामाणुव्रतेषु तथाविधं सामर्थ्यं प्रादुर्भवेत् ? एतदर्थं तस्याद्यो विधिरत्रोच्यते -

(१) **स्वरूपानुचिन्तनम्** - प्रथमं स्थूलाहिंसासत्याद्यणुव्रतगोचरं विस्तृतं स्वरूपं चिन्तनीयम्, यथा-तत्तदणुव्रतमुद्रा, तत्तत्कर्त्तव्यता, तत्तद्विधाने प्राक्तनप्रवृत्तिपरिहारः, तत्तत्पालनप्रकारः, सम्भविताऽतिचार-परिहारः, सम्भवद्बाधकाः, तत्तद्बाधकेषु सत्स्वपि व्रतनिर्वाहः एतत्सर्वमपि विभावनीयम् । न चैतद्विभावने भाव्यं निरुत्साहेन, कातरेण वा, अन्तरेण धर्मगुणानात्महितविरहात् । विभावितं व्रतस्वरूपमानन्दकामदेवादिश्रावकैः । सौत्साहं गृहीतानि तानि । भवत्रयमात्रकालतया परित्तीकृतः संसारः ।

(२) **प्रकृतिसौन्दर्यम्** - अहिंसादयः स्वभावेनैव सुन्दराः । शोभत एभिरात्मा । भवति जीवानां वल्लभः । स्वभावमङ्गुलास्तु हिंसादयः, अपवित्राश्च । निन्द्यते लोकैरपि हिंसाद्यासेवनपरः । यद्यपि कथञ्चिदासाद्यते हिंसादिनाऽपि विभवः, तथापि नानेन सम्पाद्यते स्वास्थ्यमात्मनः, अस्थैर्यानुपशमममत्वमायादि-कलुषितस्य तदनवकाशात् । अत एव प्रकृत्यैवाशोभना हिंसादयः । अहिंसाद्यनुशीलनेन तु भवेच्चित्तस्वास्थ्यम् । दृश्यते मुखारविन्दे सौम्यत्वं कान्तिश्च । भूयते प्रत्यय-पात्रेणाभिगम्येन च । सैषा स्वरूपसुन्दरता ।

फलमपि सुन्दरमेवाहिंसादेः । तदुपार्जितभोगानुभव-कालेऽप्यात्मस्वास्थ्यानपायात् । एतदपि सक्त्यतिशयविगमात् । एतदपि वैशिष्ट्यं ज्ञापयति प्रकृतिसौन्दर्यमेवाहिंसादेः । अत भावनीय आत्माऽहिंसादिभिः । विचिन्त्यमत्र हरिबलमात्सिक-हेलाकश्रेष्ठि-सुदर्शनश्रेष्ठि वङ्कचूल-पुण्यश्राद्धप्रभृतिवृत्तान्तम् ।

(३) **आनुगामिकत्वम्** - आनुगामिकाः खल्वहिंसादयः,

अतः परलोकेऽप्येतेऽनुगच्छन्त्यात्मानम् । ततश्च परलोकेऽपि प्राप्यन्ते प्रकृतिसौन्दर्यपुष्टिप्रयोजकाः सद्गत्यादयो भावाः । सुव्रतश्रेष्ठ्यादिवत् । ननु च हिंसादयोऽपि परलोकानुयायिन एवेति को विशेषो धर्मस्येति चेत् ? सुखमात्रहेतुत्वाख्येति गृहाण । दुःखैकनिबन्धनरूपा हि हिंसादयः परलोकेऽपि, अत न ते प्रेत्य शम्बलरूपतां प्रतिपद्यन्ते, अतो धर्मस्यैव तत्ता प्रतिपत्तव्या ।

(४) **परोपकारित्वम्** - अहिंसादिभिर्विधीयते परपीडापरिहारः । क्रियते परः परोपकारः । नैतन्मात्रम्, अपि त्वात्मनोऽपि तैरेव विधीयत उपकारो दुर्गतिनिरोधलक्षणः सद्गतिसाधनरूपश्च। एवञ्चानेन क्रियत आत्मा सातयशउच्चगोत्रादिभाजनम् ।

कुमारपालभूपालसत्केनाहिंसाव्रतेन दत्तमभयदानं जीवलक्षेभ्यः । श्रीहीरविजयसूरेरूपदेशेनाक्कबर-साहिर्बभूवा-हिंसाप्रवर्त्तकः ।

(५) **परमार्थकारित्वचिन्तनम्** - गुणाभ्यासो हि क्रमेण विशुद्धतराहिंसादिगुणाकर्षणद्वारेण जीवं महापवित्रं विधाय यावन्मुक्तिसौख्यमपि वितरति । एवं च साधयत्येष परमार्थम्। नैतन्मात्रम् अपि त्वन्यानपि जीवान् प्रापयति कल्याणम् । न ह्येतदुपकारसामर्थ्यं हिंसादिषु । भावनीयान्यत्र मेघरथ-श्रीकान्त-राजश्रेष्ठि-विजयश्रेष्ठिविजयाश्राद्धी-मणिकान्तश्रेष्ठिसत्कानि वृत्तान्तानि ।

अहो दुर्लभे मनुजभवेऽवाप्यार्यदेशमुत्तमं कुलं चावाप्ता महासुखमयधर्मजीवनपदवी । प्राप्तोऽवसरो जगदुपकारस्य ।

अधिगतं वृत्तपावित्र्यम् । आसादिता सुविशुद्धाः संस्काराः । कथन्नामैष धर्मगुणो मयि क्षीरनीरवदेकायनीभावं व्रजेत् ? इत्याद्यनुचिन्तनेन भावनीयो धर्मगुणभावनयाऽऽत्मा ।

## (२) धर्मगुणात्मकानां व्रतानां दुष्करता

**सूत्र : तहा दुरणुचरत्तं, भंगे दारुणतं-महामोहजणगतं, एवं दुल्लहत्तं ति ।**

एवं परिभाव्य व्रतप्रकृतिसौन्दर्यादि विशुद्धतत्पालनार्थं भावनीयं यथा - (१) पूर्वाभ्यासाभावाद् व्रतपालनं दुष्करं सकष्टं च । अतो सहर्षं विषह्य कष्टानि पालनीयान्येतानीति दृढमवधारणीयम् । न ह्यल्पमूल्या धर्मगुणाः । महासत्त्व-साध्यश्चैषां निर्वाहः । निभालनीयमेतदर्थे वङ्कचूलवृत्तान्तम् ।

(२) धर्मगुणप्रतिपत्तेः प्रागेतदपि ज्ञातव्यं यथा प्रतिज्ञापुरस्सरं व्रतग्रहणं कृत्वा यद्येतानि भज्यन्ते, तदाऽऽसाद्यते दारुणो विपाकः । न हि जिनाज्ञोल्लङ्घनमन्तरेण तद्भङ्गसम्भवः, दुरन्तं च तदुल्लङ्घनम्, महापापरूपत्वात् । जिनाज्ञाभङ्गो हि जनयति महामोहम् । कारयति लोके धर्मनिन्दाम् । दधाति धर्मेऽरुचिं लोकः । अपास्तधर्मप्रीतिर्दोषपक्षपातयुक्तश्च सञ्जायते तद्भङ्गकृज्जनः । एवञ्च भवान्तरेऽपि दुर्लभा भवन्ति धर्मगुणाः । निबन्धनं चात्र धर्मगुणावधीरणा, दोषपक्षपातप्रयुक्ततदनुगुणभवाधिगतिश्च । ततश्च प्रकृत्यैव भवेद्धिंसामृषावादादिदोषपक्षपातः । दुर्लभाश्च स्युरहिंसादयो गुणास्तत्र । अपि च नरकेषु विषह्यन्ते दारुणानि दुःखानि ।

तथापि दुर्लभास्तेष्वपि धर्मगुणाः । पापफलमनुभवतामपि नारकाणां तदुद्वेगानुदयात् । प्राक् हि व्रतभङ्गं कुर्वद्भिरादृता दोषा भावसारम् । ततः कुतस्तेषां धर्मगुणसौलभ्यम् ? व्रजन्ति चतुर्दशपूर्विणोऽपि महामोहोदयान्निगोदम् । महाव्रतभङ्गेन गतः कण्डरीकः सप्तमां नरकावनिम् । अतः प्राणाधिकान् मन्त्वा रक्षणीया धर्मगुणाः । भावनीयस्तद्भङ्गदुर्विपाकः ।

## (३) विधिपुरस्सरं भावसारं व्रतस्वीकारः

**सूत्र : एवं जहासत्तीए उचिअविहाणेणं अच्चंतभावसारं पडिवज्जिज्जा तं जहा**

**(१) थूलगपाणाइवायविरमणं, (२) थूलगमुसावायविरमणं, (३) थूलगअदत्तादाण-विरमणं, (४) थूलगमेहुणविरमणं, (५) थूलगपरिग्गह-विरमणमिच्चाइ ।**

ते च धर्मगुणा एते - तद्यथा - (१) स्थूलप्राणातिपातविरमणम् । न ह्यहं निरपराधत्रसजीवान् निरपेक्षतयोपेत्य हनिष्यामीत्येतद् व्रतम् । सावच्छेदं चैतत्, स्थावराणां सापराधत्रसजीवानां चाहिंसाया अनङ्गीकरणात् । (२) स्थूलमृषावादविरमण् - अंशेन मृषाभाषणत्यागः । कन्यादिपञ्चवस्तुगोचरासत्यवचनपरिहार इत्यर्थः । (३) स्थूलादत्तादानविरमणम् - अदत्तं केनचिदवितरितम्, तस्याऽऽदानम् - ग्रहणम् - अदत्तादानम् - ततोंऽशेन विरन्तव्यम् । कूटतोलादिपञ्चकात्मक-मदत्तादानं न कर्त्तव्यमिति भावः । (४) स्थूलमैथुनविरमणम् अंशेनाब्रह्मविरतिः । परस्त्रीगमनविरतिः

स्वस्त्रीसन्तोषश्चेति तात्पर्यम् । (५) स्थूलपरिग्रहपरिमाणम् - धनधान्यादेरमुक-ऽपरिमाणस्यानुल्लङ्घनम् । एतत्पञ्चाणुव्रतानि मूलगुणाः । दिक्परिमाण - भोगोपभोगपरिमाणाऽनर्थदण्डविरमण-त्रितयं गुणव्रतरूपम् । तथा सामायिक-देशावकाशिक-पौषधा-ऽतिथिसंविभागलक्षणं चतुष्टयमुत्तरगुणरूपम् । एते धर्मगुणा इत्यवगन्तव्यम् ।

आदावुपन्यास एषाम्, भावत इत्थमेव प्राप्तेः, उक्तञ्च-सम्मत्तम्मि उ लद्धे पलियपुहत्तेण सावओ होज्जा । चरणोवसमखयाणं सागरसखंतरा होंति ।। एवं अप्परिवडिए सम्मत्ते देवमणुयजम्मेसु । अण्णयरसेढिवज्जं एगभवेणं च सव्वाइं ।। इत्यादि ।

तदेतदर्थमावश्यकं कषायमान्द्यम्, उत्तरोत्तरभावविशुद्धिश्च । श्राद्धत्वेन ह्यारोहणं भवति सम्यग्दृष्टेर्जीवस्य । अतोऽत्र धर्मगुणतया दर्शितानि प्रथमं श्राद्धानामणुव्रतानि ।

## (४) व्रतपालनं जिनागमग्रहणभावनपारतन्त्र्याणि च

**सूत्र : पडिवज्जिऊण पालणे जइज्जा, सयाऽऽणागाहणे सिआ सयाऽऽणाभावगे सिआ सयाऽऽणापरतंते सिआ ।**

एवं प्रतिपद्य धर्मगुणान् यतनीयं तत्पालने यथा रत्नकरण्डकं कश्चिन्महामन्त्रं चावाप्य तदनुपालने महानादरः क्रियते, तथाऽनन्तकालानन्तरं प्राप्ता अपूर्वरत्नकरण्डकस्थानीया धर्मगुणा रक्षणीयाः । एतदर्थमपि प्रवर्त्तनीयं वक्ष्यमाणे विधौ ।

एतत्त्वत्रावधेयम् - (१) यद्यप्यादावत्रानुभूयेत दुष्करत्वम्,

तथापि सम्यक् तदनुपालनेनाल्पेनैव कालेन प्राप्यतेऽल्पेनैव कालेन निर्मलचैतन्यप्रकाशः । (२) धर्मगुणा एवात्मनो निजं धनम् । सोढानि ह्यात्मना दुःखशतानि परद्रव्याधिगमार्थम् । ततोऽधुनाऽऽत्मविभूतिरूपधर्मगुणावाप्त्यर्थं कथं न सहितव्यम्। विचारणीयानि सागरचन्द्र-कामदेव-चन्द्रावतंसक-प्रभृति-वृत्तान्तान्यत्र ।

(२) सदैव भाव्यं जिनाज्ञा ग्राहकेन । कर्त्तव्यं प्रतिदिनं जिनाज्ञाध्ययनम्, तच्छ्रवणं च । न चाध्ययनान्तरं श्रवणेन कोऽर्थ इति वाच्यम्, प्रतिपन्नव्रतगुणगोचरतात्त्विकश्रद्धाधिगमार्थं तत्त्वज्ञानावाप्तेरावश्यकत्वात्, तदर्थं च शास्त्राध्ययनं प्रधानाङ्गम्। तदध्ययनं कृत्वापि विशेषावगमार्थं गुरुमुखेन कर्त्तव्यमेव तच्छ्रवणम् । अतः श्रोतव्या जिनवाणी निशम्या श्राद्धसामाचारी, कर्णावतंसीकर्त्तव्या वैराग्यरसधारा । अन्यथा तु दुर्लभोऽहिंसादिगोचरो वर्धमानः परिणामः । भयं च तन्मान्द्यस्य। सन्ततं शास्त्रश्रवणं हि विदधाति श्रद्धादार्ढ्यम्। श्राद्धसामाचारीश्रवणेनैव सम्भव्यनाद्यभ्यस्तमिथ्याप्रवृत्तिनिरोधः। न हि गुरुवाणीश्रवणमन्तरेणोदेति तत्त्वदृष्टिः सारासारविवेकः शुभाशुभध्यानावगमश्च । तदनुदयात् क्लिष्टकर्मबन्धः । अत आवश्यकं जिनाज्ञाश्रवणम् ।

(३) एवं जिनाज्ञाया अध्ययनं श्रवणं च यथाऽऽवश्यकम्, तथा भावनमपि तस्या आवश्यकम् । जिनाज्ञागोचरचिन्तन-मननाभ्यामात्मनस्तद्भावभावितत्वाऽऽपादनं हि भावनम् । यथा हि विषयसुखाभिलाषी जनस्तत्साधनानि प्रत्यादरं विधत्ते, शृणुते

तदधिगमोपायान्, शिक्षते तत्साफल्यप्रयोजकविधिम् । एवं जिनाज्ञाभावनेऽपि यतनीयम् । एवं च जिन एव सततं व्यवस्थितो भवेद्दृष्टिपथि, न तु संसारः । ततश्च गृहादिकार्येष्वप्यन्वेत्यागमानुसारी विमर्शः । सदोदयमाप्नुयादाश्रवसंवरविवेकमतिः । निमीलनं भवेन्मोहदृशः । उन्मीलिता स्याज्ज्ञानदृक् । एवञ्च निरोधो भवेद्व्यर्थ कर्मबन्धस्य कुवासनादृढीकरणस्य च । सञ्चीयन्त एवं सुसंस्कारा आत्मनि । परिभाव्यते सम्यक् साधुधर्मः । आज्ञाग्रहणभावनाविरहे त्वाश्रवादिविवेकाभावाद् भवेत् संवरस्थानेऽपि पापप्रवृत्तिः । यथा रसवतीभाजनपिधानक्रियायाः समानत्वेऽपि जिह्वालाम्पट्यप्रयुक्ता सैव क्रियाऽऽश्रवेऽन्तर्भवति, जीवदयाऽऽशयेन तु सैव संवर इति । अत उन्मीलनीया ज्ञानदृक् । कर्त्तव्यं मिष्टान्नाऽऽस्वादेषु मोहशस्त्रीप्रहारावलोकनम् । निभालनीयं हीरकादिकं सारद्रव्यं रागनागदारुणदंशनिबन्धनम् । कर्त्तव्यं विषयेष्वात्मगुणविस्मारणकृत्त्वविलोकनम् ।

एवमाज्ञानुचिन्तनानन्तरं भवेदेवाऽऽज्ञापारतन्त्र्यानुरागः सचेतसः । ततश्च यततेऽसावागमाभिहितेष्वौचित्यादियोगेषु धार्मिकानुष्ठानेषु । दधात्येतद्गोचरः पक्षपातः । धारयति जिनाज्ञायां भावप्रतिबन्धनम् ।

**सूत्र : आणा हि मोहविसपरममंतो, जलं रोसाइजलणस्स, कम्मवाहितिगिच्छासत्थं, कप्पपायवो सिवफलस्स ।**

ननु किन्निबन्धनमिदं जिनाज्ञामाहात्म्यम् ? येन तच्छ्रवणादेरेवमुपादेयत्वातिशय इति चेत् ? अत्रोच्यते । जिनाज्ञा

हि मोहविषापनयनाय परममन्त्रः । मोहो रागो द्वेषश्चात्मनो विकृता जुगुप्सनीया चावस्था । एत एव भाविकटुविपाक-विटपिमूलस्थानीयाः । एभिरेव व्यर्थतां नीयते दुर्लभ आत्महितावसरः । प्रतिहन्यत एभिरात्महितम् । विधीयते चाहितमात्मनः । तदेतत्सर्वमपि ज्ञायते जिनाज्ञया । अत एषैव मोहविषनिराकरणप्रवणः परमो मन्त्रः ।

न हि सर्वज्ञमन्तरेण जानात्यन्यः कश्चित् सूक्ष्ममोहप्रक्रियाः, कर्मबन्धसङ्क्रमोद्वर्त्तनापवर्त्तनानिकाचनादिप्रवृत्तिम्, दारुणतत्परिणामम्, विचित्रतत्कार्यपद्धतिम्, आज्ञापालनानुभावं च ।

सर्वज्ञाज्ञयोक्तसर्वाधिगमेनैवोल्लसत्यात्मनि वीर्यम् । तत एवापनयत्यसौ मोहविषम् । न हि सर्वज्ञाज्ञानभिज्ञ उद्यच्छ-त्येतदर्थम् । न वेत्त्यसौ मोहदुरन्तताम् । पश्यति प्रत्युतैनं हितम् । ततश्च बम्भ्रमति गहने भवकान्तारे । जिनाज्ञालक्षणो महामन्त्रो हि निराकरोति मोहविषविकारम् । विधत्त आत्मगुण-प्रकाशम् । कारयति परमपदं प्रति प्रयाणम् । अतोऽन्यथा मोहविषविकारनिकारो दुःसम्भवीति भावनीयम् ।

श्रमणभगवन्महावीरवचसा हीन्द्रभूत्यादिभिरपनीतो मिथ्यात्वमोहक्ष्वेडः । पराकृतमविरतिविषम् । प्रतिपन्नं चारित्रम् । अवाप्तं गणधरपदम् । एवमनन्ता गणधरा प्रापुर्निर्मोहपदं जिनाज्ञामहामन्त्रानुभावेन ।

(२) किञ्च जिनाज्ञैव द्वेषारतिशोकाद्यात्मकानलविध्यापनार्थं पानीयरूपा । यस्य हि हृदये निवासो बभूव जिनाज्ञायाः,

तस्य हृदये वसति प्रशमपुष्करावर्त्तमेघः । विद्यत एवास्य हृदये परमं माध्यस्थ्यम् । ततश्च भजतेऽसावुदासीनभावम् । ततश्चानवकाशोऽस्मिन् द्वेषादिविकारस्य । एवंविधावस्था-विशेषानुदये तु हृदयाश्रयजिनाज्ञानिवास एवाऽऽरेकास्पद इति भावनीयम् ।

अद्भुतं हि सामर्थ्यं वर्तते जिनाज्ञाजले द्वेषाद्यनलोपशमार्थम्। उवसमसारं खु सामण्णं - इत्येतन्मात्रं वचो बभूव श्रीहरिभद्रसूरेः क्रोधानलप्रशमनिबन्धनम् ।

(३) तथाऽऽज्ञैव चिकित्साशास्त्रम्, कर्मव्याध्यपनयन-प्रकारोपदर्शकत्वात् । एतदनुसरणेनैव कर्मक्षयो मोक्षश्चेति विभावनीयम् ।

न हि कर्मतः परः कश्चिद् व्याधिर्जगति । तस्यैव जन्ममरणेष्टेतरसंयोगवियोगशोकसन्त्रासदैन्यास्वास्थ्या-रत्यादिदुःखसन्दोहनिबन्धनत्वात् । कर्मव्याध्यपनयनार्थं जिनागमेष्वमोघचिकित्साप्रकारा उपवर्णिताः । यदादरेण मूलत उन्मूल्यते कर्मव्याधिः ।

जिनवचनं ह्यभिदधाति नियतां मुक्तिसाधनक्रियाम् । इन्द्रनागतापसो हि चकारोपवासद्वयपारणद्वितीयदिनादेवा-परमुपवासद्वयमेवं नित्यशः । उग्रमप्यस्य तपोऽज्ञानकष्टमयम्, प्रतिगृहं तन्निमित्तमारम्भप्रवृत्तेः । तेषु चैकस्मिन् गृहे चकारैष पारणम् । सकृदाजग्मुस्तन्नगरे श्रीमहावीरस्वामिनः । प्रेषयामासुस्तत्प्रतिबोधार्थं श्रीगौतमस्वामिनम् । गत्वाऽकथयदेष तम्, यथा - भो अणेगपिंडिया । एगपिंडिओ तं दट्ठुमिच्छइ

- इति । उपेत्यासौ पप्रच्छ जिनम्, यथा - कथमहमेकपिण्ड-मात्रग्राह्यप्यनेकपिण्डिकः ? इति । ज्ञापितश्चासौ सद्भावं भगवता । अपनीतमस्य दर्शनचारित्रमोहावरणलक्षणं मान्द्यं जिनवचसा । प्रतिपन्नोऽनेन षट्कायरक्षाऽऽत्मकः श्रमणधर्मः। विभावनीयमुत्तराध्ययनोक्तं संयतीयाध्ययनमप्यत्र ।

जिनाज्ञा हि सर्वकर्मक्षयप्रयोजकतया मुक्तिनिबन्धनम् । शिवफलप्रदकल्पतरुकल्पा हि जिनाज्ञा । तृणायैतस्याः पुरस्तात् स्वर्गस्था कल्पवृक्षा अपि । न हि वितरन्त्येते मोक्षलक्षणं फलम् । जिनाज्ञा तु चूर्णयति बाह्याभ्यन्तरतपःकुलिशेन कर्माचलम् । वितरत्यल्पकालेनैव मोक्षफलम् । अतो कर्त्तव्यमाज्ञाग्रहणम्, उपादेयं तद्भावनम्, प्रतिपत्तव्यं च तत्पारतन्त्र्यमिति ।

स्यादेतत्, अणुव्रताधिगममात्रेणैव गुणवत्त्वाधिगते-र्व्यर्थमेवाज्ञाग्रहणादिकमिति चेत् ? न, व्रतमात्रतः सिद्ध्यसिद्धेः, तत्पालनफलानुभूतिमात्रपर्यवसानात् । अहिंसाबाधेन सत्यादि-प्रवृत्तिप्रसक्तेश्च । तदत्र विशुद्धाराधना जिनवचोग्रहणमननादिनैव शक्या । अन्यथा तु यद्यपि श्राद्धो नोल्लङ्घयेत् परिग्रह-परिमाणम्, स्वीकृतविभवे तु न मुञ्चेद् गृद्ध्यतिशयम् । एवञ्च व्रतानुपालनमपि वैफल्यमुपेयाज्जिनवचोविभावनमन्तरेणेति निपुणं निभालनीयम् । उक्तरीत्या त्रसहिंसाप्रत्याख्याने सत्यपि निःशूकतया स्थावरहिंसाप्रवृत्त्यादिकमपि दृष्टव्यम् । नीतिप्राप्त-विभवाद्यनुभवे यदि कश्चित् प्रतिबन्धकतामुपेयात् तदा तद्गोचरो द्वेषोऽपि स्यादेव जिनवचनानभिज्ञस्य, अतो यतनीयमा-

ज्ञाग्रहणादौ । अतो व्रतसम्पन्नोऽपि श्राद्धो जिनागमोदित-जीवादितत्त्वसद्विधिसामाचारीहेयोपादेयप्रभृत्यवगमं कुर्यात् । भावयेदेतज्ज्ञानतः स्वकीयं हृदयम् ।

आज्ञाया भावनं पारतन्त्र्यं च सम्पाद्यते देवगुरुभक्त्या, तत्त्वावगमेन, परमात्मध्यानेन, व्रताभ्यासेन, इन्द्रियनिग्रहेण, कषायजयादिना च ।

तत्त्वागमेन हेयतया प्रतिभासते सावद्यम्, ततश्च परिह्रियन्ते तद्धेतुका रागद्वेषाः । ततोऽपि क्रमेण प्राप्यते मुक्तिः । तीर्थकृतोऽपि पूर्वजन्मस्वनेनैव विपरन्ति तत्त्वावगमसञ्चरेण । अनेनैव सुधापानेन प्राप्नुवन्त्यजरामरत्वम् । उपासितं मरुभूति-जन्मप्रभृत्या श्रीपार्श्वनाथजीवने प्रतिजन्म कल्पतरूपमं जिनवचनम् । अत एव दशमभवेऽवाप्य तीर्थकृत्त्वमाप परमं शिवम्। भवदत्तभवादारभ्य जिनवचनानुशीलनेन प्राप्तं जम्बूस्वामिना पञ्चभवे निर्वाणम् ।

प्रत्यात्मप्रदेशमस्ति वीतरागत्वप्रयुक्तमनन्तं सुखम्, परमानन्दहेतुका मधुरता च । तदाविर्भावार्थं यतनीयं जिनाज्ञापरिभावनादौ । कस्तूरीकल्पा हि जिनाज्ञा, अपनयत्येषा-ऽनादिकालीनं दोषदुर्गन्धम् । अपनीते च तस्मिना विर्भवत्यात्मगुणसुरभिः स्वयमेव ।

किञ्चाऽऽज्ञैवैषा चिकित्साशास्त्रस्थानीयाऽपनयति मिथ्यात्वलक्षणं मान्द्यम्, निराकरोत्यविरत्याख्यमातङ्कम् कषायोपमं रोगं च । न ह्येतदुपेक्षया कर्मव्याधिचिकित्सासम्भव इत्यत्राऽऽदरो हितः ।

एतदेवानाद्यज्ञानविजृम्भितम्, यद् देवगुरुगोचरो नोदेति ममकारः । अपि तु शरीरादिविषयः । परिपालयति मूढजीवो गृहादिकं यत्नतः । न तु निभालयत्यपि जिनालयश्रमण-प्रतिश्रयादिकम् । अन्तरेणाप्युपदेशं प्रवर्त्तते गृहकार्यादौ । न तूपदेशेनापि धर्मानुष्ठाने । तदत्र मोहरोगे जिनाज्ञालक्षणं चिकित्साशास्त्र-मनुसृत्य भावारोग्यप्रापणमेव परमार्थ इति

## (६) अकल्याणमित्रत्यागः

**सूत्र : वज्जिज्जा अधम्ममित्तजोगं । चिंतिज्जाभिणवपाविए गुणे, अणाइभवसंगए अ अगुणे । उदग्गसहकारित्तं अधम्ममित्ताणं, उभयलोगगरहिअत्तं, असुहजोगपरंपरं च ।**

श्रमणजीवनसत्कपुनतावस्थाधिगमार्थं षष्ठं वस्त्विदम-कल्याणमित्रत्यागाख्यम् । अकल्याणमित्रमात्मकल्याणघातकम् । यथा द्यूतकृच्चौरो दुराचारो वा । प्रवर्त्तयत्येष मृषावादादौ । प्रसभं कारयति हिंसादिकम् । उदीरयति क्रोधादिदोषान् । प्रेरयत्यभक्ष्यभक्षणादौ । पातयत्याहारादिसञ्ज्ञागर्त्तायाम् । स च बाह्यरूपेण सुहृन् मात्रादिको वाऽपि परमार्थतोऽकल्याण-मित्रमेव, मोहस्फातिप्रयोजकत्वात्, बाह्यभाववर्धनत्वात्, संसारानुरागनिबन्धनत्वाच्च ।

ननु चैवं स्वजनोऽप्यकल्याणमित्रभूतस्त्याज्यस्स्यादिति चेत्? को वा किमाह, त्याज्य एवात्महितार्थिना स इत्युत्तमा नीतिः। यद्वा सोऽपि प्रापणीयः कल्याणमित्ररूपताम् । प्रज्ञापयितव्यं तस्मै यदात्मगुणा एव प्रशमप्रभृतयः परमार्थोपकारिण आत्मनः, अनन्तभाविकालसौख्यनिबन्धनत्वात् - इत्यादि ।

स्मर्त्तव्यमत्रोपासकदशाङ्गस्थमानन्दकामदेवादिवृत्तम् । धर्मप्रतिपत्त्यनन्तरमेव तैः प्रथममुरीकारितो धर्मः स्वभार्याभिरपि। ततश्च धर्मात्मतामुपयातास्तद्गृहिण्योऽपि बभूवुर्धर्मसहायाः । अत्र वैधर्म्यदृष्टान्तं नन्दमणिकारः, योऽकल्याणमित्रसङ्गेन त्यक्त्वान् श्राद्धताम् । प्रवृत्तो वाप्यादिनिर्मितौ । आर्त्तध्यान-मुपगतस्सन् कालं कृत्वा जगाम तिर्यक्त्वम् । उदभवत् स्वनिर्मितायामेव वाप्यां दर्दुरत्वेन ।

स्वजनादयो विनेयाः कल्याणमित्रताम्, यत भवेयुरेते धर्ममित्राणीति तात्पर्यम् । किञ्च नूतना एवावाप्ता धर्मगुणाः। अतो रक्षणीया एते यत्नतः । दुर्गुणास्त्वनादिकालीनाः, अतो भेयमेभ्यः, मा भूदुन्मज्जनमेषामात्महितविघातकृदिति । दुर्गुणपरिहार एवात्महितम्, साफल्यं मनुजजन्मनश्च ।

न हि क्षणिकसम्पन्नश्वरविषयसुखार्थं दारुणदुर्गति-दुःखोरीकारो युज्यते सचेतसः । अतः परिहार्या एव दोषाः, तत्परिहारार्थमपि वर्जनीय एवाधर्ममित्रसङ्गः, दोषपोष-सहायत्वात्तेषाम् । ते च भवन्ति परलोकचिन्ताविरहिताः । न विचारयन्ति ऐहिकं पारलौकिकं च हितम् । अतोऽहित-प्रेरणादारभ्य बलात्तत्र प्रवृत्तिमपि कारयन्ति ते ।

विचारणीयमत्र मरीचिवृत्तान्तम् । अकल्याणमित्र-कपिलसङ्गेन भाषितमनेनोत्सूत्रम्, विस्मृतं सम्यग्दर्शनदौर्लभ्यम्, पुष्टिं नीतमनादि मिथ्यात्वम् । ततोऽपि तेनैवाकल्याणमित्रसङ्गेन तदुत्सूत्रभाषणप्रायश्चित्ताद्यभावतः प्रभूतभवान् यावद्दुर्लभतां नीतं सद्दर्शनम् । अतस्त्याज्यमेवाकल्याणमित्रम् ।

## (७) लोकविरुद्धत्यागः

अकल्याणमित्रवल्लोकविरुद्धमप्यनर्थकृत् ।

तच्च व्यसनसप्तक-निन्दा-खरकर्मादिरूपम् । येन लोकस्याशुभाध्यवसायसङ्क्लेशप्रभृतिस्स्यात्तदपि लोकविरुद्धम्। साधुधर्मपरिभावनापरायणेन तु दयैकतत्परेण भाव्यम् । रक्षणीयाऽनेन स्वकीयाप्रवृत्तिः; यथाऽनया न स्यात्परेषामधर्मप्रेरणम् ।

नन्वेवं पौषधाद्यप्यकर्त्तव्यमापन्नम्, तेनाऽपि केषाञ्चिद्विरोधमत्युदयदर्शनादिति चेत् ? न, प्रथमतो ऽप्यशुभाध्यवसायकलुषिततया धर्मनिन्दकानां तत्कालुष्ये धर्मस्य विशिष्टाहेतुत्वात्। किन्तु यदा पौषधादिधर्मानुष्ठानप्रवृत्तोऽस्थानकायिक्यादिना धर्मनिन्दाहेतुर्भवति, तदा तल्लोकविरुद्धम् । ननु सङ्घभोजनादिमहाव्ययसाध्यधर्मानुष्ठानं तु लोकविरुद्धमेवेति चेत्? न, किन्तु यदा तत्कार्येवाल्पतमव्ययसाध्यामप्यनुमोदनां न कुरुते, तदा तल्लोकविरुद्धम्, धर्म एवेदृश एषां कृपणानामित्यादिलोकनिन्दानिबन्धनत्वात् ।

यदि तु काचिदुचिताऽपि प्रवृत्तिरमुकस्य निजाज्ञानदोषेण विरुद्धा प्रतिभाति, तदा तन्न लोकविरुद्धम् । किन्तु बहुजनानां मा भूत् स्वकृत्ये विरोधप्रतिभास इत्येतदर्थं सावधानेन भाव्यम्। सामान्यापि प्रवृत्तिर्यत्नसाध्या भवति गुणोपासकानाम् । एष एवाभिप्रायो भवत्येषां यन्मा भून्मत्प्रवृत्तितः कस्यचिद्धर्मजुगुप्सा तन्न्यक्कारश्च । धर्मी तु तथा वर्तते, यथा तच्चेष्टितं दृष्ट्वाऽपि

प्राप्नुयुरपरे धर्मम् । तदा स्ववृत्तेनापरेषामधर्मप्रापणस्य तु कथैव केति भावनीयम् ।

धर्मानादरो हि सङ्क्लेशरूपः, अप्रशस्तपरिणामरूपत्वात् । तीव्रमबोधिबीजमेतत् । किञ्च धर्मविरोधिभावजनकं तद्भावदार्ढ्यसम्पादकं चैतत् । ततश्च दूरे भवन्ति लोका बोधिबीजतः । तत्र हेतुभावेन स्वयमपि प्राप्नोत्यबोधिं परलोके । येन हि लोकानां धर्मं प्रत्यसद्भावस्स्यात् तल्लोकविरुद्धम् । यथा तिरस्कारपूर्वकं दानम्, यथा-हृष्टपुष्टोऽपि न लज्जसे भिक्षां याचमानस्त्वमित्यादि । एवं हि लोके प्रवर्त्तते धर्मनिन्दा, यथा - कीदृश एषां धर्मः ? - इत्यादि । किञ्च धर्मव्याजेन परवञ्चनमपि लोकविरुद्धम् । प्रतिज्ञाभङ्गोऽपि लोकविरुद्धः । यदि महोत्सवपुरस्सरमनेकसहस्रलोकमध्ये चारित्रं गृहीत्वा स्तोककालानन्तरमेव यदि तन्मुञ्चति, तदा भवति तद् धर्मनिन्दानिमित्तम् । तथा सङ्घभोजनादि धर्मकृत्यमपि कृत्वा यदि तदुच्छिष्टादिसम्मार्जने सम्यग् न यतते, तदा जायते तज्जनगर्हानिमित्तम् । सर्वाण्यप्येतानि लोकविरुद्धान्यनुष्ठानानि परिहार्याणि प्रयत्नतो धर्मार्थिणा । यतः -

**सूत्र : न खलु इत्तो परो अणत्थो । अंधत्तमेअं संसाराडवीए जणगमणिट्ठावायाणं, अइदारूणं सरुवेणं, असुहाणुबंधमच्चत्थं ।**

लोकविरुद्धा प्रवृत्तिर्जनयत्यपरजनचित्तेषु सङ्क्लेशम् । भवान्तरेष्वपि वञ्चितं विधत्तेऽपरं जनं बोधिलाभात् । आत्मनोऽपि कुरुते दुर्लभं बोधिम् । एवञ्चोभयथाऽपि दारुणत्वान्महाऽनर्थकृल्लोकविरुद्धम् । अन्धभूयमेतद् भीमायां भवाटव्याम् ।

अतो मा भूदेतादृशदारुणप्रवृत्तिरित्येतदर्थं चिन्तनीयम्, यथा - न हीतोऽपि परोऽनर्थोऽस्ति विश्वे । अतो हि लोकानां धर्मं प्रत्यरुच्युदयः । ततश्च भवान्तरेऽपि दुर्लभता धर्मस्य । धर्मं प्रत्यादर एव तदवाप्तिबीजम् । एतेनैव सद्गुरुसमागमादि-कल्याणपरम्परायोगेन धर्मप्रतिपत्तिपर्यन्तहितसंयोगः । तदुपादेयमत्यपाये तु कुतस्तत्प्रतिपत्तिसम्भवः । तत्रापि चेत्तद्गोचरविरुद्धभावोदयस्तदा तु धर्मप्रतिपत्तिनिमित्त-संयोगेऽप्यसम्भव एव तत्स्वीकारस्येति ध्येयम् ।

एवञ्च सूक्तम् - न लोकविरुद्धादप्यपरोऽनर्थः कश्चिदिति। एतन्निषेवणपरो जनो भवति स्वार्थान्धः । ततश्चोपेक्ष्य स्वपराबोधिमवलम्ब्य पारुष्यं विहाय कारुण्यं प्रगल्भतया तथा प्रवर्त्तते, यथा लोकः कुरुतेतरां धर्मनिन्दां । न ह्येतादृशप्रवृत्तिः सङ्क्लिष्टाध्यवसायप्रकर्षमन्तरेण सम्भविनी ।

एष सङ्क्लेशो महामोहप्रभवश्चित्तपरिणामः संसारकान्तारे-ऽनन्यान्धत्वस्थानीयः । न हि विद्यते संसार इष्टविरामः, नापि सन्मार्गगणः । अत एवैष कान्तारोपमः । अत्रापि लोकविरुद्धसेवनं नामाऽन्धत्वम् । अन्धत्वेन हि न दृश्यते पारमार्थिको धर्ममार्गः । कोमलश्चित्तपरिणामो जिनधर्मस्तद्दाता च तद्गोचरादरप्रशंसादिकश्चक्षुस्स्थानीयः । न ह्यतोऽपि परः कश्चित् प्रत्यलः परमार्थहितमार्गं दर्शयितुम् । उक्तचक्षुरभावत एव सञ्जातं जीवस्य भवभ्रमणं नरकादिदुःखनिपातश्च । एवञ्च महदनिष्टकृज्जीवस्याबोधिबीजं लोकविरुद्धसेवनम् । एतेन भवान्तरेऽपि भवति कठोरचित्तपरम्परा । तया प्रवर्त्तते

जीवोऽनेकेषु दुष्कृतेषु । ततोऽपि तत्फलभूतानि विषहते दारुणानि दुःखानि । किञ्चैवमनादिकालीनः परिपुष्यते तत्त्वद्वेषः । एतत्परिणामत एव प्रतिभवं प्रतिबध्यते धर्मरुच्युदयः । ततोऽपि प्रचलति पापाचरणपरम्परा । अतो महाभयङ्करं लोकविरुद्ध-माचरणम् । अत एव पारमर्षम् - लोकः खल्वाधारः सर्वेषां धर्मचारिणां यस्मात् । तस्माद् धर्मविरुद्धं लोकविरुद्धं च सन्त्याज्यम् - इति (प्रशमरतौ....)

## (८) कल्याणमित्रयोगः

**सूत्र : सेविज्ज धम्ममित्ते विहाणेणं । अंधो विवाणुकट्टए वाहिए विव विज्जे, दरिद्दो हो विव ईसरे, भीओ विव महानायगे। न इओ सुंदरतरमन्नंति बहुमाणजुत्ते सिआ आणाकंखी, आणापडिच्छगे, आणाअविराहगे, आणानिष्फायगेत्ति ।**

सन्त्यज्याकल्याणमित्रं विधिपुरस्सरं निषेव्यः कश्चित् कल्याणमित्रभूतः । कर्त्तव्या तस्य सत्प्रतिपत्तिः । प्रत्ययपात्रतां प्रापणीय एषः । एष एव मत्कल्याणसहाय इति श्रद्धेयः सः । अकल्याणमित्राणि क्षणिकविषयसुखप्रदानि हितत्वेन प्रतिभासन्ते मूढस्य, न तु धर्मप्रेरकानि कल्याणमित्राणि। तदत्र मोह एवापराध्यति । कल्याणमित्रगोचरपक्षपातातिशयेन हि शतधा फलति सत्सङ्गः ।

आत्मकल्याणसाधनसहायो हि कल्याणमित्रभूतः । यथा मुनिपुङ्गवो गुणप्रेरको गृहस्थो वा । आत्महितप्रतिबन्धक-स्त्वकल्याणमित्रभूतः । साधयति हितं कल्याणमित्रम् ।

अपनयत्याराधनाविघ्नानि । प्रशंसति धर्माराधनाम् । उत्साहयति सिद्धिसाधने । सम्मार्जयत्यतिचारादिकचवरम् । रक्षति प्रमादगर्त्तानिपातात् । विलोकनीयमत्र मदनरेखावृत्तान्तम् । यया स्वपतिरुपशमं नीतः । प्रापितश्च पञ्चमं कल्पम् । तेनापि देवभूयं गतेन रक्षिता सा कामान्धाद् विद्याधरात्, ग्राहिता च परिव्रज्याम् । क एवं कुर्यात् कल्याणमित्रमृते ?

कल्याणमित्रीभूतैर्गृहस्थैरपि कर्त्तव्यं मिथो धर्मप्रेरणम्, आराधनीयाः सम्भूय पर्वदिनाः कर्त्तव्यास्तीर्थयात्राः, प्रतिपत्तव्यानि तपांसि, माननीया धर्मोत्सवाः । उपदेष्टव्यं कल्याणं कल्याण-मित्रभूतेन मुनिना । उपबृंहणीयास्तत्प्रवृत्ता भावसारम् । अभिधातव्यस्तत्त्वमार्गः । प्रतिपादितव्यः सिद्धिसञ्चरः । योजनीया भव्यसत्त्वाः शास्त्राध्ययनेषु । स्थिरीकर्त्तव्यास्ते दानादिधर्मेषु सीदन्तः ।

यथैवान्धोऽनुकर्षकं निषेवते, रुग्णो यथा वैद्यमाराधयति, निर्धनो यथा धनवन्तं पर्युपास्ते, भीतश्च यथा महानायकं शरणीविधत्ते, तथा सेवनीयानि कल्याणमित्राणि ।

यथा कश्चिदन्धो नष्टो भीमे कान्तारे । तच्च कान्तारं व्याघ्रादिश्वापदपर्याकुलम्, अनेकोन्मार्गजटाजटिलं च । तत्र चेत् कश्चित् प्राप्यते नायकः । सोऽपि चेन्निपुणः कृपालु-र्निःस्वार्थश्च, तदा स अन्धस्तं समुपसम्पद्य तदुक्तं सम्यगनुसरेत् । न च तमनुसरन् विचारयत्येष दीर्घं लघुं वाऽध्वानम् । नापि चिन्तयति विश्राममविश्रामं वा । एवं भवाटव्यां प्रनष्टेनापि जीवेनानुसर्त्तव्य कल्याणमित्रम् । प्रत्येयमेतद्वचनम् । गन्तव्यम् ।

न विचार्यं प्रियोऽप्रियो वैष मार्गः, दीर्घो लघुर्वा, सकष्टोऽकष्टो वेति ।

गोविन्दभूदेवगृहिण्याः समुत्पन्नं जातिस्मरणम्, दृष्टो निजो रुक्मीभवः, प्राप्ता परमसंवेगम्, ज्ञापितस्तया पतिप्रभृतीनां सच्चारित्रसञ्चरः । तैरपि कल्याणमित्रमित्यनुसृतैषा ।

चेत् कश्चिद्रोगी स्यात्, स च रोगपीडयाऽत्यन्तमुद्विग्नस्सन् स्वजीवितादपि निर्विण्णश्चेत् कञ्चित् कुशलमाप्नोति वैद्यम्, तदा सेवते तं भावसारम् । श्रद्दधाति तदुक्तं हृदयेन । शृणोति तद्वचनं दत्तावधानम् । अनुसरति तदभिहितां रुगपनयनक्रियां प्रयत्नतः । एवं भवरोगनिर्विण्णेन समुपसम्प्रतिपत्तव्यं कल्याणमित्रम् । विचिन्त्यमत्र श्रीसुधर्मस्वामिलक्षणकल्याण-मित्रसमुपासनमं श्रीजम्बूस्वामिकृतम् ।

एवं कश्चिन्निर्धनो गृहादिवर्जितो राज्यदण्डितः क्षुधानि-पीडितकुटुम्बकः केनचिच्छ्रेष्ठिना दत्तहस्तावलम्बस्सन् परमबहुमानेन तं निषेवते । न गणयति तत्सेवापरिश्रमम् । एवमेवात्मसम्पदं प्रतीत्य निर्धनेन जीवेनानुसर्त्तव्यं कल्याणमित्रम् । यथाऽनुसृतं गुणसेननृपेण विजयसेनाचार्याऽऽख्यं कल्याणमित्रम् ।

तथा कस्मिंश्चिन्महाभयस्थाने यदि प्राप्यते समर्थाश्रयप्रदाता । भवति चात्मनः शरणम् । तदा परमादरेण स्वीकृत्य तत्पारतन्त्र्यं तं निषेवते जनः । एवमेव सेवनीयं कल्याणमित्रम् । भावनीयमत्र जिनदासश्रेष्ठिसत्कबलीवर्दद्वयदृष्टान्तम् । यैः प्रतिपन्नः स श्रेष्ठी कल्याणमित्रतया । कृता जिनधर्माराधना । कम्बलशम्बल-देवभूयमुपगताभ्यां निवारित उपसर्गः श्रीवीरस्य ।

एतदेव कल्याणमित्रोपासनफलम्, यदनेन प्राप्नोत्यन्धश्चक्षुः। अपगच्छतिरुग्णस्य रुक् । अधिगच्छतिनिर्धनो धनम्, पलायते भीतस्य भयम् । दुर्लभो हि जगति कल्याणमित्रयोगः । सुलभस्तु यत्र तत्राप्यकल्याणमित्रसमागमः । प्रेरयन्ति स्वजना अप्यकार्ये । उपदिशन्ति पापं दुःखविगमोपायत्वेन । एवं च प्रापयन्ति दारुणां दुर्गतिम् । श्रीऋषभदेवजीवमहाबल-राजसत्कविषयान्धमन्त्रिगणवत् । स्तोका एव भवन्ति सुबुद्धिमन्त्रिवत्कल्याणमित्राणि । यथा नागकेतुना कल्याणमित्रं प्राप्य विहिताऽऽत्मन उन्नतिः, तथा कल्याणमित्रयोगे यतितव्यम्। न ह्येतत्सेवातोऽप्यधिकं सुन्दरमस्ति जगति किञ्चित् अतः (१) उदारधनिकवदादृतव्यं कल्याणमित्रम् । (२) भवितव्यं तदाज्ञाकाङ्क्षिणा । यथैतन्न किमप्यभिधत्ते, तदाऽपि विचिन्त्यं कदा न्वेष मां किमप्यज्ञापयेदिति । (३) यदा चैष आज्ञापयति किञ्चित्, तदापि सम्यक् तत्प्रतिपत्तिः कर्त्तव्या । यथा कश्चिद् बुभुक्षितो द्रमको बहुकालभ्रमणेनापि किञ्चिदलयमानः कथञ्चित् केनचिदन्नं लभमान आदरातिशयेन तत् स्वीकुरुते, तथा कल्याणमित्राऽऽज्ञास्वीकारः कर्त्तव्यः (४) ततोऽपि यथा न स्यात्तदाऽऽज्ञाविराधना, तथा यतितव्यम् । यस्तु प्रतिपद्याप्याज्ञां तद्विरुद्धां चेष्टां सेवते, स आज्ञाविरोधी । नैवंविधेन भाव्यम् । कल्याणमित्राऽऽज्ञाविरोधो हि विधत्तेऽनेकदोषपोषम् । दूरीभवन्त्यनेन सद्गुणाः । प्राप्यते दुर्गतिर्भवान्तरे । सुदुर्लभा च भवति पुनर्भवान्तरेऽपि कल्याणमित्रस्याऽऽज्ञा । (५) अपि चौचित्येनानुष्ठातव्या कल्याणमित्रस्याऽऽज्ञा । न च तदनुष्ठानं

राजविष्टिवत् कर्त्तव्यम्, अपि तु भावसारं रुचिपुरस्सरम् । मन्तव्य एतदधिगमेन धन्यः स्वात्मा । तथा यथावदाज्ञानुसरणं कर्त्तव्यम् । यद्यपि तत्पालनं दुष्करं प्रतिभासेत, तथापि विचारणीयं यन्महागुणमाज्ञानुपालनम् । न ह्यतोऽप्यन्तरेण जन्मान्तरार्जितकुवासनाविगमः ।

कल्याणमित्रमेव निषेव्यमत्र संसारे एवं सुदृढमवधारणीयम्। एतदवधारणेनैवोरीकरोति जीव आज्ञापारतन्त्र्यं सन्त्यज्य कर्मपारतन्त्र्यम् ।

एवञ्च निःशेषतया कर्मबन्धनविमुक्तेरुद्घाट्यते द्वारम् । बाढमादृतस्य कल्याणमित्राऽऽज्ञायां न हि मोहस्यापि सामर्थ्यं चालयितुं चेतः ।

## (९) धर्मगुणयोग्यगृहस्थाऽऽचारः

**सूत्र : पडिवन्नधम्मगुणारिहं च वट्टिज्जा, गिहिसमुचिएसु गिहिसमाचारेसु, परिसुद्धाणुट्ठाणे, परिसुद्धमणकिरि, परिसुद्धवयकिरिए, परिसुद्धकायकिरिए ।**

प्रतिपन्नधर्मगुणार्हं मनोवाक्कायवृत्तमप्यावश्यकम् । आस्तां विशेषचेष्टितम्, सामान्यमपि वृत्तं धर्मिजनशोभास्पदं यथा स्यात्तथा यतितव्यम् । भवितव्यं विविधेषु गृहियोग्य-समाचारेषूचितवृत्तिना । शास्त्रविहितवृत्तविशुद्धिरपि सम्यगवगम्योपादेया । कायाशल्यादिशून्या चान्तःकरणपरिणति-रावश्यका । निरोध्यो मनसि ऋद्धिरससातगौरवसञ्चारः । निराकर्त्तव्यः कृष्णलेश्याप्रसरः । अपाकरणीय आर्त्तरौद्रध्यान-

कचवरः । अपनेतव्याः क्रोधादिकषायाः । एवं वचनवृत्तं कायचेष्टितं च पवित्रीकर्त्तव्यम् । परिहार्याऽनृता परुषाऽप्रियाऽपरिमिता च वाक् । त्याज्यो बीभत्सत्व-क्रौर्यलक्षणो वपुर्दोषः।

मनोवाक्कायवृत्तं सज्जनत्वेनाऽऽलिङ्गितं शास्त्रविहितत्वालङ्कृतं च यथा भवेत्तथा यतनीयमित्याशयः । परिणतिं प्रापणीया आत्मनि गाम्भीयौदार्याकृत्रिमस्नेहादयो गुणाः । धारणीयमौचित्यदयासहिष्णुतादिलक्षणं गुणकदम्बकम् । भाव्यं दीर्घदृशा । विचिन्त्यमत्राऽऽचारप्रदीपाभिहितं वैद्यदृष्टान्तम् । येन गृहस्थानुचितेन कर्मणाऽवाप्तं वानरत्वम् । पुनरपि सद्वृत्तोरीकारेण प्राप देवत्वमिति ।

**सूत्र : वज्जिज्जाणेगोवघायकारगं, गरहणिज्जं, बहुकिलेसं, आयइविराहगं समारंभं । न चिंतिज्जा परपीडं । न भाविज्जा दीणयं । न गच्छिज्जा हरिसं । न सेविज्जा वितहाभिनिवेसं। उचिअमणवत्तगे सिआ ।**

**न भासिज्जा अलिअं, न फरुसं, न पेसुन्नं, नाणिबद्धं । हिअमिअभासगे सिआ ।**

**एवं न हिंसिज्जा भूआणि । न गिण्हिज्जा अदत्तं । न निरिक्खिज्जा परदारं । न कुज्जा अणत्थदंडं । सुहकायजोगे सिआ ।**

प्राक् सामान्येन शुद्धं वर्त्तनमभिधायाधुना विशेषरूपेण कीदृशो मनोवाक्कायव्यापारस्त्याज्य इत्युच्यते । न हि साधुधर्मपरिभावनायामहिंसाद्यणुव्रतपालनमात्रं पर्याप्तम्, अपि तु मनोवाक्कायवृत्तविशुद्धिरपीत्यवधेयम् ।

तत्र (१) मानसविशुद्धिः - येनानेकजीवविनाशतदपायकृत् कार्यं स्यात्, तथाविधमारम्भं समारम्भं च न विचारयेत् । तन्दूलमत्सो हि मानसपापेनैव गच्छति सप्तमां नरकावनिम् । कोणिकोऽपि मानसयुद्धपरिणतो जगाम षष्ठीं नरकमहीम् । अतो यत्किञ्चिद्विमर्शात् प्रागेव निभालनीयम्, यथाऽत्रानेक-जीवविनाशोऽस्ति, न वेति ।

(२) लोकेऽतिनिन्दनीयमपि न विचारणीयम् । तच्च चौर्यं परवञ्चनमात्मसम्भावनं वा । रूपसेनो राजपुत्रीसुनन्दारूप-विभावनपरिणतो मृत्वा सर्प-काक-हंस-मृगभवेषु रूपलोलीभूय मृतः कुमारेण ।

(३) यच्चातिक्लेशप्रदं भवति परस्य, यतस्तत् पापोपार्जनद्वारेणाऽऽत्मन एव पीडाप्रदं भवति । परपीडाविचारो हि बलान्नयति नरकदे रौद्रध्याने । श्रावकेण तु मैत्रीभावसम्भृतेन कृपापरेण च भवितव्यम् । कथन्नामैष परपीडनं विचिन्तयेदपि। अपि च स्वमारके रिपावपि क्षमापरेणैव भाव्यम्, एवं कुर्वाणस्य स्वप्नेऽपि क्व क्रौर्यावकाशः ? विभावनीयमत्र यशोधरमुनिवृत्तम् येन राजभवे मातृतोषार्थं मारितः षिष्टकुक्कुटः । भ्रान्तश्च तथाविधकलुषितचित्तपरिणामेन दुःखयुक्तेषु तिर्यग्भवेषु ।

(४) आत्मनोप्यतिक्लेशनिबन्धनं परिहार्यं कलहादि । अत्रार्थे निदर्शनमग्निशर्मा । यद्वैरानलं प्रज्वाल्य प्रतिभवं गतो निरयम् । त्याज्याश्च निर्लाञ्छनादिकाः कर्मादानव्यापाराः । अभव्यजीवोऽङ्गारमर्दकाचार्ये । जीवव्यापादनपरिणामेन करभतयोत्पन्नः । सागरचन्द्रश्रेष्ठिना यद्यपि किमप्यनिष्टं

सञ्जातम्, तथापि न भावनीयं दैन्यम्, न गन्तव्यं रङ्कभावम्। न हि परद्रव्यापायेऽनुशोचनं सङ्गतिमङ्गति सचेतसः । नाभाव्यं भवति, नापि भाविनोऽस्ति नाशः, अतो न परद्रव्यहानादौ कर्त्तव्यं दैन्यम् । नापीष्टप्राप्तौ हर्षः कर्त्तव्यः । इन्द्रियनन्दी हि भ्राप्यत्यपारे संसारपारावारे । दुर्गतिदुःखप्रदं हि विषयसौख्यम् । कस्तत्र रज्यति विचक्षण इति । एवमनिष्टविगमेऽपि न चातुरन्तसंसारबम्भ्रमणविगमः, अतो न तत्राप्यनुरक्तव्यं सुमेधसा। न हि श्रावक इष्टानिष्टगोचरौ हर्षशोकौ कुर्यात्, अपि तु धारयेत् समभावम् ।

तथा परिहरेदसदभिनिवेशम् । यत्र हि न विद्यते किमपि तत्त्वम्, नापि कश्चित् सारः, तद्दुराग्रहस्त्याज्यः । दुराग्रहत्यागार्थमस्त्येतन्मानवजीवनम् । किञ्चात्यन्तमल्पकालीनमेतज्जीवनम्, तदत्र को व्यर्थासद्ग्रहावकाशः ? तत्त्वाभिनिवेशार्थो ह्ययमवसरे न युक्तोऽतत्त्वाग्रहादिना मोघीकर्तुमिति।

अतोऽतत्त्वाऽऽग्रहमुत्सृज्य तत्त्व एव मनो योग्यतया प्रवर्त्तनीयम् । यादृशं च सद्वृत्तं सद्भाषणं च, तादृशं चित्तं धारणीयम् । यथा दानं विधाय न भूयो निन्दति याचकान् । योग्यं मनःप्रवर्त्तनम्, यथा नाप्राप्यवस्त्वाकाङ्क्षायां मनः प्रवर्त्तयेत्। प्रतिकूले दैवे वाणिज्यादौ साहसं वितरति दरिद्रताम् । वक्रप्रकृतिकस्य स्वजनस्यानुनयनं प्रत्युताधिकवक्रभावनिबन्धनं भवति ।

किञ्चानर्थदण्डविचारोऽप्यनुचितमनःप्रवृत्तिः । सर्वमपि स्वस्वकर्मणः विपाकानुसारेण भवतीति मत्त्वा न यत्किञ्चिदर्थमपि

कर्त्तव्यमार्त्तध्यानम् । न हि मत्प्रयत्नशतान्यपि प्रत्यलानि काल-कर्म-भवितव्यता अन्यथाकर्त्तुम्, अतो न युक्तं मम व्यर्थं तत्साध्यार्थानुचिन्तनम्-इति विभावनीयम् । एवं नाटक-प्रेक्षणक-युद्धादिविषया अपि विचारास्त्याज्याः । नाप्यन्येभ्योऽधिकरणदानं ददामीत्यादि विचिन्त्यम् । स्वयमसत्यस्तेयानीति-दुराचारपरिग्रहसक्त्यादिकं करोमीत्यादिर्विमर्शोऽपि त्याज्यः। नापि विशिष्टधनलाभहेतुको हर्षविमर्शः परसम्पद्विलोकन-निबन्धनो वेर्ष्याध्यवसायोऽपि कर्त्तव्यः । एतद्सर्वगोचरमपि विचारणीयं यथा न ह्येते विकल्पा जीवनार्थमावश्यकाः । किञ्च निरर्थकपापप्रवृत्तिरूपा एवैते । कथं महार्घ्योऽपि मत्समय एतत्तुच्छविचारेषु नियोक्तुं न्याय्यः । वरमेतस्मात्पञ्च-परमेष्ठ्यादिध्यानेनैवैष सफलीकर्तुम् ।

एवं दानादिकं कृत्वा तदनुशयात्मकमपि मनसोऽनुचिता प्रवृत्तिः । धर्मानुष्ठानं कृत्वा क्रियमाणः सन्तापो भस्मसात्कुरुते तत्सुकृतम् । एतेन हि विपरीताध्यवसाय उदेति धर्मानुष्ठानं प्रति । ततोऽपि विमोहाभिवृद्धिः । धर्मस्तु मोहनिकाराय, न तु तत्पोषाय । उत्तममपि धर्मानुष्ठानं व्यर्थतामुपयाति मनसोऽनुचितप्रवृत्त्येति ध्येयम् ।

अत एतस्मिन् सुन्दरे भवे मनसोऽसौन्दर्यं मा भूदित्येतदर्थं दृढं यतनीयम् । एतद्यतना च मनस उचितवृत्तिमन्तरेण दुर्घटा। अतो नियोज्यं चित्तं सत्त्वमात्रगोचरस्नेहे, दुःखिगोचरदयाभावे, गुणानुरागे, अनित्यादिभावनाद्वादशके, महापुरुषसच्चरित्रचिन्तने, पापसाध्वसाध्यवसाये, परलोकचिन्तायाम्, देवगुरुधर्म-

विषयकान्तरप्रीतिसचिवश्रद्धायाम्, तीर्थस्मरणे, धर्ममनोरथे, स्वदुष्कृतनिन्दायां च । अधमा अपि जीवा उत्तमा बभूवुरेतन्नियोजनेन ।

द्वितीया विशुद्धिर्वाक्प्रवृत्तेः । तदर्थं न वाच्यमसत्यम् । प्राग् द्वितीय महाव्रतेऽपि प्रोक्तमिदम् । तथापि पुनरभिधानमेतन्माहात्म्यख्यापनार्थम् । असत्यभाषणे हि भवेद्धृदयं मायाकलुषितम् । पुष्यतेऽहङ्कारः सन्मानाऽऽकाङ्क्षा च । यद्वा भयेनाऽऽपाद्यत आत्मनो निःसत्त्वता । यद्वा हृदये भवति व्यर्थरागद्वेषाद्याकुलता । एतदर्थमुच्यतेऽनृतवचनम् । न ह्यसत्यवादी प्राप्नोति भवान्तरे जिह्वाम् । यद्वा रुद्रयातनाप्रयुक्ताऽऽराटिरावणपरामेवाप्नोति रसनाम् । असत्यवृजिनेन हि पतितो वसुराजा नरके । अन्यस्मायालदानेनाऽपि पुष्यते निष्ठुरो मृषावादोऽधमभावश्च । क्षुद्रहृदयेनैवोद्भवत्यन्यानधमतया ख्यापयितुमिच्छा । सा च भवाभिनन्दित्वपिशुना मुक्तिरुच्यभावमेव ज्ञापयति । किमतोऽपि परं दारुणकर्मबन्धनिबन्धनम् ? विचिन्त्याऽत्र समरादित्यावान्तरकथा, यस्यां भ्रातृपत्न्योरालदानेन भवान्तरे श्रमणीभूताऽप्यवाप्नोति कलङ्कम् ।

उत्सूत्रभाषणेन तु महामृषावादो मिथ्यात्वं च पुष्यते, अतो हि प्रभूतेष्वपि जन्मसु नावाप्यते जिनदर्शनम् । जमालि मरीच्यादयोऽनेनैव भ्रान्ताः संसारकान्तारम् । अत एभ्यः सर्वेभ्योऽप्यनर्थेभ्य आत्मानं रक्षयितुं त्याज्यो मृषावादः ।

एवं सत्यमपि परुषवचनं परिहार्यम्, परमर्मविघातहेतुत्वात् । न ह्यन्धोऽपि तत्त्वेनाभिधातव्यः, माता वा पितृपत्नीतया वा ।

न हि सुवर्णमुद्राऽपि बाढं तप्तयाऽग्निवर्णा परहस्ते दातुमुचिता। मृदुवचनमेवाऽऽदेयं भवति, न तु कर्कशम् । अवधिज्ञानेन पत्न्या नरकगतिं विज्ञाय महाश्रावकेन शतकेन-नरकगामिनी त्वमसि-इत्यभिहितम्, तदपि निषिद्धं भगवतेति विभावनीयमत्र। उद्धतं मदान्धवचोऽपि परिहार्यम्, कर्कशत्वादेव ।

न च परमर्मोद्घाटनमपि कर्त्तव्यम्, दारुणदोषरूपत्वात्तस्य। एतेन हि पुष्यतेऽहङ्कारः परगोचरन्यक्कारभावश्च । अपि चैतद्भावतो हि परदोषान् पर्वतीकृत्य ब्रूते जनः । न चैवं भाषणेन परापायो भविष्यतीत्यपि चिन्तयत्येषः । किञ्च परनिन्दामुक्त्वा परकषायोदीरणं कृत्वा हृष्यत्यसौ । एषोऽपि महाननर्थः । भावनीयमत्र विजयश्रेष्ठिकृतं पत्नीकृतस्वकूप-पातनलक्षणमर्मोद्घाटनं विपाकदारुणम् । नाप्यनिबद्धम् - असङ्गतं वाच्यम् । असङ्गतमित्यसम्बद्धम्, निष्प्रयोजनम्, हिताप्रयोजकम् । तच्च विकथारूपम्, दर्शनभेदिनी - चारित्रभेदिनीत्यादिलक्षणपापकथात्मकं च । यच्छृण्वानस्य हीयते देवगुरुधर्मश्रद्धा तत्त्वरुचिः शुभभावना व्रताद्यनुष्ठानं च। अत्यनुचितमेतत् । श्रद्धादिवृद्धिर्यथा स्यात्तथा यतनीयं मतिमता । तद्धानिसर्जने तु भवेद्धर्मस्यावगणना, सा च विपाकदारुणा । किञ्च बाह्यभावमाहारादिसञ्ज्ञाः कषायाँश्च पोषयन्ति विकथाः । परनिन्दाऽपि पोषयति तद्गोचरस्वरसं तत्त्वनिर्वेदं च । तदेते सर्वेऽप्यशुद्धवाक्प्रकारास्त्याज्याः ।

भाव्यं हितमितभाषिणा । हितभाषा नाम स्वपरकुशलजननी सत्यवाक्, यथा परगुणानुवादः, परमात्मस्तोत्रम्, शास्त्रस्वाध्यायः,

तत्त्वकथा, महापुरुषचरित्रम्, सुकृतप्रशंसा, हितोपदेशः, साधर्मिकोपबृंहणा, धर्मविषण्णस्थिरीकरणम् । एतेष्वेवाक्षणिकस्य कुतो निन्दाविकथाद्यवकाशः ।

मितभाषा नाम प्रमाणोपेतोद्गारः । विचिन्त्य परिमितमेव वक्तव्यम्, यन्नेङ्गितेन निर्वहति, तदेव वक्तव्यम् । एवञ्च प्रायो मौनभावेन सुखेन परिह्रियतेऽसत्योच्चारः । विचिन्त्योच्चरणेनापि त्यज्यते कर्कशभाषणासम्बद्धवचःप्रभृतिः । प्रमाणातीत उच्चारस्तु निःसारं कुरुते चित्तम् ।

माता सरस्वती हि मानवजिह्वा । तत्सम्बन्धस्तु पित्रा परमात्मना तदाज्ञयैव च सह न्याय्यः, न तु येन केनापि । असत्यादिना सह तत्संयोजनं तु मातुर्वेश्याभावापादनं स्पर्द्धते। बहुपुण्यव्ययेनावाप्ताऽस्तीयं जिह्वा । अत एषा हितभाषण एव नियोक्तव्या । हितभाषणमपि प्रियवचनसचिवं दुःखसन्तप्तजनस्योपरि सुधावर्षासङ्काशम् । हितं परिमितं च वचः प्रतिबध्नाति मलिनवृत्तिप्रसरम् ।

प्रायोऽन्तर्वृत्तिरेव प्रयोजिका भवति वचनोच्चारे । यदि तु हितमेवोच्चर्यते तदा क्षयं प्राप्स्यत्यसद्वृत्तिः ।

किञ्चासत्यादहिताच्च वचस इह भवेऽपि प्राप्यन्तेऽपयशोविरोधदुर्भावादयः विपदः । परभवेऽपि जिह्वा रहित एकेन्द्रिय भवेद् भवः । यद्वैडमूकत्वेनोत्पद्येत । भावनीयमत्र मातापुत्रवृत्तम् । यथा दुर्वचसैकेनैव माता करच्छेदमाप, पुत्रश्चारोपितः शूल्यामिति ।

अथ तृतीयायां कायिकशुद्धौ - हिंसां न कुर्यात् । नादत्तादानं

विदधीत । न निरीक्षेतापि परस्त्रियम् । न सेवेतानर्थदण्डम् । हिंसादेश्चतुष्टयस्यापि दारुणफलत्वात् ।

तत्रानर्थदण्डश्चतुर्धा भवति - (१) आर्त्तरौद्रध्यानम् रागानुचिन्तनं रागपात्रवियोगजनितशोकपरिणतिरपि च दुर्ध्यानम्। (२) प्रमादाचरणम् । यथा घृतदुग्धादिभाजनानामसंवृततया स्थापनम्, भूतिकर्मादिकम्, व्यसनसप्तकसेवनम्, नाटकादि-प्रेक्षणम्, कामचेष्टा, नद्यादिस्नानम्, मुखरता चेत्यादि । (३) पापोपदेशः । येनोक्तेन मिथ्यात्वहिंसादि पुष्येत्, विषयतृष्णा वृद्धिमाप्नुयात्, कषायोदीरणं स्यात्, कलहोदयो वा भवेत् । (४) अधिकरणप्रदानम् । यथा कलहोदीरणम्, हलमुशलादि-वितरणम्, विषयतृष्णासञ्जीवनसदृशपुस्तकादिप्रदानम् ।

हिंसास्तेयपरदारदर्शनानर्थदण्डेभ्यो रक्षयित्वाऽऽत्मानं नियोज्य एष शुभप्रवृत्तौ । सा च जीवदयादानशीलतपोदेव गुरुभक्तिजिनवाणीश्रवणशास्त्राध्ययनतीर्थयात्रासामायिक-पौषधप्रतिक्रमणपरमेष्ठिस्मरणादिरूपा । प्रवर्तितव्यं तस्यां प्रयत्नतः ।

## (११) लाभोचितदानभोगादिः

**सूत्र : तहा लाहोचिअदाणे, लाहोचिअभोगे, लाहोचि-अपरिवारे, लाहोचिअनिहिकरे सिआ ।**

साधुधर्मपरिभावनार्थमहिंसादिगुण-तद्गोचरोपादेयबुद्धि-जिनाज्ञाग्रहणचिन्तनपारतन्त्र्या-ऽकल्याणमित्रपरिहारलोक-विरुद्धत्याग - कल्याणमित्रसेवनादिकं यथाऽऽवश्यकम्, तथा

वित्तस्य योग्यं नियोजनमप्यावश्यकम् । तच्च चतुष्के भवति - दाने भोगे परिवारे सङ्ग्रहे च ।

न चात्र साधुधर्मपरिभावनायाः किमायातमिति वाच्यम्, (१) लाभोचितदानविरहे सर्वत्यागसत्त्वानुल्लासात्, अहिंसा-प्रयोजकपरार्थकरणविकासानापत्तेः, स्वार्थैकलाम्पट्य-प्रसक्तेः, धर्मं प्रति कृतज्ञभावानुदयात्, पूज्यपूजा-दुःखितदयादिप्रारम्भ-दशायोग्यगुणानधिगमाच्च । न ह्युक्तसत्त्वादिकमन्तरेण साधुधर्म-योग्यतामुपयाति जात्वात्मा । यत्किञ्चिदपि वित्तं धर्मदत्त-मेवावाप्यते । तं प्रति कृतज्ञभावाभावे कुतः श्रामण्यार्हतेति ।

तत्र दानं द्विविधम् - (१) भक्तिदानम् (२) अनुकम्पादानम् । अत्राद्यं गुणपूजारूपत्वेन गुणसमर्थकम् । द्वितीयं दुःखिदया-रूपत्वेनाऽऽत्मपरिणाममार्दवप्रयोजकतया गुणग्रहणयोग्यतां वितरति । लाभोचितदाने यतितव्यमेवेत्यत्र तात्पर्यम् ।

(२) एवं लाभोचितो भोगः स्वनिर्वाह आवश्यकः । तदभावे कार्पण्यक्षुद्रताधनमूर्च्छादिदोषपोषयोगेन श्रामण्ययोग्यत्वनिराकृतेः । अनुचितव्ययवशादुल्बणभोगेन्द्रियलाम्पट्यादिप्रसक्तेश्च । किञ्चै-वमृणित्वस्यापि प्रसङ्गः, अत उचित एव भोगो न्याय्यः ।

(३) तथा लाभोचितपरिवारेण भाव्यम् । तावानेव परिकरो धारयितव्यः, यावान्निर्वोढुं शक्येत । न ततोऽप्यधिककर्मकरादि-परिग्रहो विधातव्य इति भावः । एवं परिवारार्थमप्युचितव्ययेन भाव्यम् । न हि स्वार्थं मुक्तहस्तः परार्थे च कृपणः समाधिं प्रयच्छति परिवाराय, नाप्यसावादेयतां व्रजति परिजनस्य । एवञ्च कदाचित् प्रविव्रजिषुरपि नानुस्त्रियतेऽनुज्ञायते वा

परिवारेण। किञ्चाधिकपरिजननिर्वाहचिन्ताऽपि जनयति चित्ते सङ्क्लेशम् । स च प्रयाति प्रतिबन्धकभावं चारित्रेऽपीत्यतो लाभोचितः परिवारः सङ्गतः ।

(४) लाभोचितो निधिरपि श्रेयान्, भाविनि काले रोगादिविपदि ते निर्वाहसम्भवात्, अन्यथा तु क्रियेतर्णम्, भवेच्चित्तसङ्क्लेशः, ततोऽप्यसमाध्याद्यनर्थः । अपि च निधिविरहेऽग्रे प्रविव्रजिषुरपि कुटुम्बनिर्वाहार्थं वित्तं दातुं न शक्नुयात्, ततश्च सीदन् परिवारः कुर्याद्दुर्ध्यानम् । अत्यन्तमरुचिं गच्छेद्धर्मे । भवेच्च दुर्लभबोधिः । तं च सीदन्तं दृष्ट्वा लोकोऽपि धर्मनिन्दां विदध्यात्, यथा - पश्यैतान् बुभुक्षितान् विमुच्य प्रवव्राज । कीदृश एषां धर्मः - इत्यादि । ततश्च तेषामपि भस्मसाद् भवेद् बोधिबीजम् । मा भूदेतद्दोषनिकुरम्बमिति लाभोचितनिधिकरणं श्रेयः । तच्च चतुर्भागाद्यपेक्षया, उक्तञ्च लौकिकैः - पादमायान्निधिं कुर्यात्, पादं वित्ताय वर्द्धयेत् । धर्मोपभोगयोः पादं, पादं भर्त्तव्यपोषणे - इति । अन्यत्रापि - आयादर्द्धं नियुञ्जीत, धर्मे यद्वाऽधिकं ततः । शेषेण शेषं कुर्वीत, यत्नतस्तुच्छमैहिकम् - इति ।

## (१२) परिवारस्यासन्तापः, ममत्वं बन्धहेतुः

**सूत्र : असंतावगे परिवारस्स, गुणकरे जहासत्तिं, अणुकंपापरे, निमम्मे भावेणं । एवं खु तप्पालणे वि धम्मो, जह अन्नपालणे त्ति ।।**

पूर्वोक्तगुणविभूतिसम्पन्न आत्मा परिवारं प्रति कीदृश-

स्स्यादित्याह - नासौ परिवारस्य सन्तापको भवति, शुभ-प्रणिधानेन । निरन्तरं प्रशस्तभावनाशुभनिर्णयसुन्दरमनोरथ-रमणप्रवणत्वात्स्वार्थभावनाविरहितो वर्जितपरपीडापरिणामश्चासौ भवति । किञ्च परार्थतत्परतया कथन्नामापरेषां सौख्यसम्पत् स्यादित्येतदेवैष समीहते । न चासावहङ्कारकदर्थितो भवति। नाप्यदीर्घदृष्टिक्षुद्रविमर्शादिदोषदुष्टो भवति, दीर्घदृग्विभूषितत्वात्, गभीरोदाराशयालङ्कृतत्वाच्च । न चैष परिवारस्य पीडाकारी भवति, अपि तु गुणकृत् । दर्शयत्यसौ परिवारस्य संसारनिर्गुण-स्वभावम् । प्रेरयत्येनं धर्मे । तदबोधे भावयत्यनुकम्पाम् । चिन्तयति कर्मवशवर्त्तितां सर्वजीवानाम् । भवति निर्व्याज-वात्सल्यः परिवारं प्रति । नापेक्षते कृतप्रतिकृतम् । न स्मारयति स्वकृतोपकृतिम् । परिहरति द्वेषोदयप्रसङ्गम् । अपि चोपशमयति कथञ्चिदुदीर्णं तेष्वसमाधिम् । इत्थञ्च तस्मिन्नादृतो भवेत् परिवारः । स्वयमपि तदनुरागेण विरज्येत्त संसारात् ।

किञ्चानुकम्पागोचरीकुर्वन्नपि परिवारं स्वयं ममकाररहितो भवेत् । एतदर्थं भवस्थितिमालोचयेत् । विभावयेदनन्त-संसरणावर्त्तम् । निभालयेदनित्यत्वमात्रनित्यताम् । चिन्त-येत्प्रत्येकजीवेन सह सञ्जातं मात्रादिप्रत्येकसम्बन्धम्, उक्तञ्च - संसाराम्बुनिधौ सत्त्वाः कर्मोर्मिपरिघट्टिताः । संयुज्यन्ते वियुज्यन्ते, तत्र कः कस्य बान्धवः-इति । तथा - अत्यायतेऽस्मिन् संसारे, भूयो जन्मनि जन्मनि । सत्त्वो नैवास्त्यसौ कश्चिद्, यो न बन्धुरनेकधा - इति । किञ्च ममत्वगोचरजीवो जनयत्यात्मनि सङ्क्लेशशतानि । उद्भावयति विरहे

शोकसन्तापातिशयम् । विचिन्त्यमत्र स्वयम्प्रभानुरक्तस्य ललिताङ्गदेवस्यानुशोचनम् ।

ममत्वभावो हि रङ्कं कुरुते जनम्, अतो परिवारविषयमपि विमुच्य ममकारमनुकम्पा-साधर्मिकवात्सल्यसचिवं कर्त्तव्यं तदनुपालनम् । यद्यपि परिवारो मोहान्धः षट्कायोपमर्दनपरश्च, अतस्तत्पोषणं पापम्, तथाप्युक्तरीत्या तदनुपालने क्रियमाणे सम्भवति धर्मः, यथा दीनदुःखिजनोपकारे क्रियमाणे । न हि जीवविशेषप्रतिबद्धो धर्मः । अतोऽमुकानुपालने धर्मः, अमुकानुपालने तु नेति विभागो न विद्यते । नवरं ममकारविगमोऽत्रावश्यकः । यतः -

**सूत्र : सव्वे जीवा पुढो पुढो । ममत्तं बंधकारणं ।**

ननु कथमात्मीयेऽपि परिवारे ममकारो न स्यादित्यत्राऽऽह- जगतः सर्वेऽपि जीवाः पृथक् पृथक्, नानाविधभव्यत्वक्रमोपेतत्वात् । एवञ्चाविशेषेणान्यजीवाः परिवारगताश्च जीवाः स्वात्मनो भिन्नाः। पृथक्प्रदेशेभ्य आयाता यान्ति पृथक्प्रदेशेषु, उक्तञ्च-दिग्देशेभ्यः खगा एत्य, संवसन्ति नगे नगे । स्वस्वकार्यवशाद्यान्ति, देशे दिक्षु प्रगे प्रगे - इति (इष्टोपदेशे.....) अतोऽयुक्तमेषु ममत्वविभावनम् । दयया तदनुपालने धर्मः, किन्तु ममकारस्तु बन्धैकहेतुः, लोभरूपत्वात् । रागप्रकारश्चैषः । अनेन हि बध्यत आत्मा कर्मबन्धेन कुसंस्कारपाशेन संसारगतिततिनिगडेन च । अतस्त्याज्यं पर्यन्तदारुणं ममत्वम् । विलोकनीयमत्र सुरेन्द्रदत्तनृपवृत्तम्, यो ममकारेण परिवारगोचरेण भ्रान्तो महाभीमां भवाटवीम् । मरुदेवी तु सर्वजीवपृथग्भावं विभावयन्ती परिहृत्य

ममत्वमवाप कैवल्यं मुक्तिं च ।

ममता हि समताविद्वेषिणी, अत एवैषा सुखपरिपन्थिनी । भावनीयं यथा - यत्परिवारकृते मदीयो ममत्वातिशयप्रसरः, यत्स्नेहविवशता मम, यद्विरहे च ममाकुलत्वम्, स परिवारः समुद्रकल्लोलवशान्मिलितं मत्स्यसङ्घातमनुकुरुते । त्वं मदीयोऽहं त्वदीय इत्युचाना न जानीमो वयम्, यथाऽपरेण केनचित् प्रबलेन कल्लोलेन सर्वेऽपि प्राग्वत् पृथक् पृथग् भविष्यामः । पश्यत्सु एव तेषु स्वजनेषु गमिष्यति मदात्माऽपार-संसारपारावारापरकोणं विवशतया । एवञ्च सर्वमपि ममत्वं व्यर्थमेव भविष्यति । अतो दुर्लभेऽस्मिन् भवे प्रेक्षावताऽपास्य ममकारं सर्वत्र समदर्शिना भाव्यम् - इति ।

किञ्च नैष जीवः, योऽनादौ संसारेऽस्मत्सम्बन्धीभूय न बभूवाऽसम्बन्धी । अतः परमार्थतः स्वजन एव न । तथापि गृहवासवर्त्तितया न विस्मर्त्तव्यं परिवारं प्रत्युचितं कर्त्तव्यम् । आधेया परिवारेऽपि निर्ममभावभाविततता । प्रयोक्तव्या एतदर्थं युक्तयः । तत्प्रतिबोधासम्भवे तु भावनीया कर्मगतिविचित्रता, विमृश्या मोहान्धदशा, विचार्यं वराकानां बोधदौर्लभ्यम् । ततश्च तेष्वनुकम्पापरस्स्यात् । न तु द्वेषं सन्तापं वा कुर्यादिति ।

ननु च परिवारपालने धर्मः कथं सम्भवतीति चेत् ? उक्तरीत्या तदनुपालने क्रियमाण आत्मोपकारयोगादिति गृहाण । न ह्येवं सन्तापप्रसूतिः, अपि तु गुणोदयः । एवं हि भवनिर्गुणस्वभावभाविततता । इत्थं हि धर्माभिलाषोद्भवः, आर्त्तरौद्रध्यानपरिहारश्च । न चैवमुपकारनिमित्ततया ममकारो-

ऽप्यत्रोचितोऽस्त्विति वाच्यम्, सर्वे जीवा पृथक् पृथगित्यादि-प्रागुक्तनीत्या ममकारस्य मिथ्याभावनारूपत्वात् । अत एवैष बन्धहेतुः । तस्मात् साधुधर्मपरिभावनापरेण प्रथमत एव यतितव्यं ममकारपरिहारे, अन्यथा पश्चात्तस्य श्रामण्यबाधकत्वयोगात । विचिन्त्यमत्राऽऽर्द्रकुमारज्ञातम् ।

## (१३) स्वात्मनिरीक्षणम्

**सूत्र : तहा तेसु तेसु समाचारेसु सइसमण्णगए सिआ, 'अमुगेऽहं अमुगकुले, अमुगसिस्से अमुगधम्मट्ठाणट्ठिए । न मे तव्विराहणा, न मे तदारंभो, वुढ्ढी ममेअस्स, एअमित्थ सारं, एअमायभुअं, एअं हिअं, असारमण्णं सव्वं, विसेसओ अविहिगहणेणं । एवमाह, तिलोगबंधू परमकारुणिगे सम्मं संबुद्धे भगवं अरिहंते' त्ति ।**

न हि गृहियोग्येष्वाचारेषु वर्त्तमानोऽप्ययं लक्ष्यं विना गतानुगतिकप्रवृत्तिर्भवति । किन्तु सावधानीभूय विचारयति, यथा - कोऽहम् ? किं मे कुलम् ? कस्याहं शिष्यः ? कानि मम व्रतानि - इति । अत्रोत्तराणि - अहं देवदत्तादिनामा गृहस्थ आर्यमानवः । उत्पन्नोऽस्म्यहममुक उत्तमकुले । अमुकस्याचार्यस्य शिष्योऽहम् । अमुके सद्दृष्टिदेशविरत्यादिके धर्मस्थाने स्थितोऽस्म्यहम् । किं मया गृहीतव्रतविराधना विहिता? न वा ? किञ्चाऽऽरभेऽहं तद्विराधनाम् ? न वा ? किमस्ति मदीयं धर्मस्थानं वृद्धिं गच्छत् ?

स्वस्यार्यमानवभवभावोपयोगः, उत्तमकुलोद्भवत्वसंवेदनम्,

श्रेष्ठगुरुशिष्यत्वप्रतीतिः, गृहीतव्रतप्रतिजागरभावश्च रक्षति जीवं पतनात्, विधत्ते चात्मसमुन्नतिम् । विचिन्त्यमत्र धर्मरत्न-प्रकरणोदितमङ्गर्षिवृत्तान्तम् । येनासदभ्याख्यानं प्राप्तेनोक्तो-पयोगेनावाप्तं कैवल्यम् ।

यस्मिन्नात्मनि विद्यते व्रतपालनदार्ढ्यम् । यश्चोत्तम-भावनारमणप्रवणोऽप्रमत्ततया विधत्ते व्रतानुपालने प्रयत्नम् । रक्षति शास्त्रोक्तद्रव्यक्षेत्रकालभावमुद्राः । स एवैवं वक्तुमर्हति, यथा - न मे तद्विराधना - इति । एवं ब्रुवाणोऽपि सम्प्रधारयति, यथा रागद्वेषप्राबल्येन सम्भवति धर्मभावनाशैथिल्यं प्रमादनिपातो धर्मप्रासादविशकलीभावश्च । अत एवासदालम्बनाद्दूरीभूय परिहृत्य विराधनामनुपालनीयानि व्रतानि - इति ।

न हि जगति सम्यक्त्वादितो धर्मस्थानादधिकं किमप्यस्ति सारम् । किञ्चैतदेवात्मीयम्, आनुगामिकत्वात्, सद्विपाकत्वात्, कल्याणरूपत्वाच्च । धनसम्पद्विषयस्वजनमित्रपरिवारविभवादि त्वसारम्, निरर्थकं च । तेष्वपि यदन्यायेनावाप्तम्, तत्तु परिणामदारुणम्, उक्तञ्च - पापेनैवार्थरागान्धः फलमाप्नोति यत् क्वचित् । बडिशामिषवत्तत्त-मविनाश्य न जीर्यति - इति। क्षणसुखानि वितीर्यानीत्यवाप्ता सम्पत् विनाशयत्यात्मानम् । अपनयन्ति तत्पावित्र्यम् । संहरति तत्सौन्दर्यम् । तिरस्कुर्वति तत्तेजः । विशसति तत्सामर्थ्यम् । आपादयत्यात्ममालिन्यम्।

ज्ञातान्यत्र त्रिपृष्ठ-ब्रह्मदत्त-मन्मनादयः ।

क एवमवगमयति ? क आत्मानमतिसुन्दरत्व-महा-सुखित्वादिगुणोपेतं कर्तमुपदिशति मार्गमित्याह - एवमाह

त्रिलोकबन्धुः समुपचितपुण्यसम्भारः परमकारुणिको विशिष्ट-तथाभव्यत्वबलोपार्जिततीर्थकृन्नामपुण्यो विश्वविश्वसत्त्व-गोचरागण्यकारुण्यपुण्यः सर्वश्रेष्ठसम्यक्त्वादिलक्षणबोधिविभूषितः सम्यक् सम्बुद्धो भगवानर्हन् सत्त्वविशेष इति ।

## (१४) भावमङ्गलम्

**सूत्र : एवं समालोचिअ, तदविरुद्धेसु समायारेसु सम्मं वट्टिज्जा, भावमंगलमेअं तन्निप्फत्तीए ।**

एवं सम्यग् विचार्य तीर्थकृद्वचनं सत्प्रणिधानपुरस्सरं यथा सम्यक्त्वादिधर्मस्थानान्यविरुद्धानि स्युस्तथा यतितव्यम् । अविरुद्धानीति जिनवचनाबाधकानि तदनुगुणानीति यावत् । विधिसचिवं हि धर्माचरणमुपयाति भावमङ्गलताम् ।

ननु च शुभाध्यवसायो भावमङ्गलमित्युच्यते । अत्र त्वहिंसादिसत्कसविधिप्रवर्त्तनस्य तत्त्वमुक्तम्, अतः किमत्र वस्तुस्वरूपमिति चेत् ? अत्रोच्यते । साधुधर्मपरिभावनासत्कं सविधि प्रवर्त्तनमुत्तमाचारोघैर्निषेव्यते । तत्सिद्धौ च सिध्यति प्रशस्तपरिणामः । अतस्तदात्मके भावमङ्गलेऽवन्ध्यनिबन्धनतां व्रजत्युक्ताचारप्रवृत्तिः । इत्थञ्च तस्यामपि तद्व्यपदेशो न्यायानपेतः । यद्यप्यन्तरं विद्यत एव दुग्धघृतयोः । तथापि पारम्पर्येण हेतुफलभावोऽविगानेनाभिमतस्तयोर्विदुषाम् । एवम्प्रकृतेऽपि दृष्टव्यम् ।

विध्यादृतिस्त्वत्रात्यन्तमावश्यकेति ध्येयम् । न हि व्रतानुपालनमात्रं पूर्वोक्ताऽऽगमग्रहणाधर्ममित्रत्यागकल्याण-

मित्रसेवनलोकविरुद्धत्यागमनोवाक्कायविशुद्धिपरिवारासन्तापन तद्गुणकारिता दयानिर्ममत्वादि विधिविकलं शुभाध्यवसायप्रसूतौ प्रत्यलम् । न हि तपस्व्यपि पारणके परिमिताभ्यवहरणादि विधिविकलो रसगृद्धश्चावाप्नोति तपःफलम् । नापि गृहे कलहं कृत्वा जिनालये गत्वा जिनपूजाप्रवृत्तस्योदेति शुभाध्यवसायः, प्रतिबन्धकप्रतिबद्धत्वात् तस्य । विधिविकलत्वमेव प्रतिबन्धकं प्रकृतेऽपीति परिहार्यं तत् । यावत्प्रमाणा हि व्यवहारविशुद्धिः, तावत्प्रमाणं धर्मस्थानविशुद्धत्वम् । तन्मालिन्ये धर्ममालिन्यं च। अत एव प्रागनन्तानि चारित्राणि गृहीतानि, किन्त्वाऽऽज्ञाभावनाद्यभावेन वैफल्यं गतानि, भावमाङ्गल्यरूपतानवाप्तेः। विचिन्त्यमत्र सुदर्शनश्रावकज्ञातम्, यस्याणुव्रतान्यप्याज्ञाभावनादिसचिवान्यभूवन् । ततश्च प्रापुस्तानि भावमङ्गलरूपताम् । तदनुभावेन पलायितमर्जुनमाल्यधिष्ठायकेन यक्षेण । प्रतिबुद्धश्चानेन श्राद्धेनार्जुनमाली । एवं नागकेतुश्राद्धस्यापि विधिसचिवं व्रतानुपालनं व्यन्तरमपि चकार निजवशम् । रक्षितं समग्रमपि नगरं तेन शिलानिपातजन्यविध्वंसात् ।

## (१५) धर्मजागरिका

**सूत्र : तहा जागरिज्ज धम्मजागरिआए ।**

साधुधर्मपरिभावनापरस्सदा धर्मजागरिकां विदध्यात् । सा च भावनिद्रापरिहारेण सम्भविनी । एषा च मोहमयी दृष्टिरतत्त्वचिन्तनं रागद्वेषकेलिर्मिथ्यात्वविलसितं बाह्यभावताण्डवं प्रमादपरवशता च । धर्मजागरिका नाम ज्ञानमयी दृष्टिः

समभावाभ्यासः संवेगवैराग्यवृद्धिः सत्तत्त्वविमर्शः सत्पुरुषार्थाभिलाषोऽन्तर्मुखभावश्च । सैव परमां काष्ठां प्राप्ता वितनोति श्रमणधर्माभिलाषातिशयम् । रत्नोपमस्य मानवभवस्य महाफलमवाप्तुमेतज्जीवनोचितपरिणामं प्राप्तुं विषयसौख्यतृष्णैकलक्षिणीं प्रवृत्तिं परिहर्तुमात्ममुखप्रवृत्तौ लयभावमधिगन्तुं पौनःपुन्येन जन्ममृत्युजटिलजालादात्मानं रक्षयितुं कर्मव्याधिमपनेतुं च निःशेषतया निषेवणीयं धर्मौषधम् । विज्ञातव्य एष दुरापोऽवसरः । परिचिन्तनीयमेतत्पारमर्षम्-खणं जाणाइ पंडिए - इति (आचाराङ्गे.....) एतदेव साक्षादाचष्टे -

**सूत्र : 'को मम कालो किमेअस्स उचिअं ?'**

विचिन्तयेद्धर्मजागरिकायाम्, यथा - कीदृशो महामूल्योऽवसरो मयाऽवाप्तः । किञ्चैतदवसरस्योचितम् ? मम प्राक्तन्यां स्थितावनन्ताः पुद्गलपरावर्त्ता व्यतीता अनन्तजन्ममरणकरणेन। परावर्त्तितानि ममानन्तशरीराणि । अधुना त्वेषोऽवसरः, येन तत्पुनरावर्त्तपरिहारः सम्भवी । तथापि कथमेनं कालं नयाम्यहम्? किमद्याप्यज्ञाने मोहवासनायां गृहादिकार्यजाल एवाटाम्यहम्? न हि भवान्तराभ्यस्तस्यैवाभ्यासार्थमेष भव इति विभावनीयम्।

अतः कर्त्तव्यः प्रतिप्रभातमात्मनस्त्याज्यविचारो विधातव्यविमर्शश्च । स्मर्त्तव्यानि महापुरुषाणां भव्यवृत्तानि । भावयितव्यं जिनोदिततत्त्वं तदाराधनाप्रकारनिकुरम्बं च । अपनेयाः कुवासनाः। भस्मसात्कर्त्तव्यं कर्मकाष्ठं धर्माराधनानलेन । प्रक्षालनीयं विशुद्धभावनाजलेनाऽऽत्ममालिन्यम् । कर्त्तव्याऽऽत्मतेजोऽभिवृद्धिः । तदेतदवसरसाफल्यापादनमेवमेव ।

उक्तविपर्यासे तु बाढं कालानुचितानुसेवनमेवेति निपुणं निभालनीयम् ।

न हि सञ्ज्ञानिराकरणार्थमवाप्तेऽत्र भवे सञ्ज्ञापरिपोषानुगुणा प्रवृत्तिः सङ्गतिमङ्गति । अतो निराकर्त्तव्या आहारादिसञ्ज्ञाः। एतदर्थं ह्ययं कालः । देवकालेऽवाप्ताः परमर्द्धयः । अन्यपरिश्रममन्तरेण दिव्योद्गारमात्रोपशाम्या तत्र क्षुत् । उत्कृष्टविषयसौख्यसाधनोपलब्धिः । अनेककोट्यप्सरउपभोगः। यदपि तत्रावाप्तम्, तत्सर्वमपि सञ्ज्ञापुष्टिप्रदमेव । न हि तत्र सञ्ज्ञाविषधरीविषस्य लेशतोऽपि बभूव हानिः । नापि तद्धानिप्रयोजकसामर्थ्यमपि बभूव तत्र । अत्र तु तथाविध-सामर्थ्यानुगुण्यमपि विद्यते । न ह्यत्र दिव्यस्वादुभोज्यानि, नापि महाविभवाः, किन्नामात्र भोगाभिलाषिणामपि भोक्तव्यं वस्तु ? प्रत्युत सम्भवन्त्यत्र तपस्त्यागप्रवृत्तयः । अत उत्तमोऽयमवसरः ।

किञ्च तिर्यग्भवकालोऽतिदारुणः, यथोक्तम् - गिम्हाय-वसंतत्तो रण्णे छुहिओ पिवासिओ बहुसो । संपत्तो तिरयभवे मरणदुहं बहु विसूरंतो ।। वासासु रण्णमज्झे गिरिनिज्झरणदगेहिं वज्झंतो । सीयानिलडज्झविओ मओऽसि तिरियत्तणे बहुसा ।। एवं तिरियभवेसु कीसंतो दुक्खसयसहस्सेहिं । वसिओ अणंतखुत्तो जीवो भीसणभवारण्णे - इति (वैराग्यशतके) । अपि च - बन्धोऽनिशं वाहनताडनानि, क्षुत्तृड्हिमात्युष्ण-भयार्दितानि । निजान्यजातीयभयापमृत्यु-दुःखानि तिर्यक्ष्विति दुःषहानि - इति । (अध्यात्मकल्पद्रुमे........) न हि तथाविधे

तिर्यग्भवेऽप्यवाप्तो धर्मावसरः । न तत्र दारुणं दुखं विषहमानेनाप्यवाप्ता जीवेन समता । केवलं क्रोधाऽऽध्मातस्सन् गतो दारुणां नरकगतिम् । अत्र हि मनुजभवे समता-परिपाकावसरः । अत्र हि समाध्यवकाशः । अत्र सहिष्णुभावसम्भवः ।

किञ्च प्रागसंयमकालः, साम्प्रतं तु संयमावसरः । पूर्वं रागानुरक्तत्वकालः, अधुना तु विरागपदवीप्रसरणावसरः । अपि च प्राङ् मनोवाक्कायदण्डकालः, इदानीं तु मनोवाक्काय-गुप्तेरवसरः । व्याघ्रादिभवेषु विधृतानि मायादिशल्यानि, साम्प्रतं तु तत्समुद्धारावसरः । अनार्यत्वाध्वनि विहितानि बहूनि निदानानि, नाधुना तत्त्वं निषेव्यम् । जिनधर्मविरहकाले निषेवितः कुमतः, नेदानीं तन्निषेवणं शोभास्पदतामृच्छति ।

प्राप्तकाल इदानीमृद्धिरससातगौरवनिरोधः । एतत्त्रितय-गोचरसक्तिर्हि शिलाजतुसङ्काशा । यथा हि पिपासुर्वानरः शिलाजतु जलं मत्वा तत्पानाय यतते । श्लिष्यते तत्र तन्मुखम् । तन्मोचयितुं न्यस्यति तत्र हस्म् । सोऽपि तत्र श्लिष्यते । क्रमेण कृत्स्नः स्वयमपि तत्रैव श्लेषबन्धनेन बद्धस्तृषितः क्षुधितश्च सन् म्रियते । एवमेवर्द्धरससातगौरवश्लिष्टा अपि पुनः पुनरनुभवन्ति मरणादिदुःखसन्दोहम् । अपि चायं श्लेषः सुलभो देवादिभवेषु । इह तु भवे तन्मोक्षसाधनसौलभ्यम् । अत परिभावनीयम् - को मम कालः ? किञ्चास्योचितम् ।

किञ्च प्राक्काले श्रीमतः साम्प्रतं दारिद्र्योपहतस्य तुच्छभोगे कदाचिदपि नानुरज्यते चेतः । मन्यते च तेनासावात्मविडम्बनाम् ।

एवमुपभुक्तदिव्यकामस्य मानुषकामभोगोऽपि विडम्बनामात्रपर्यवसायीति सूक्ष्ममीक्षणीयम् । अत एव पारमर्षम् - जहा कुसग्गे उदगं समुद्देण समं मिणे । एवं माणुस्सगा कामा देवकामाण अंतिए - इति (उत्तराध्ययने.......) न ह्येतत्तुच्छभोगेन तृप्तिरपि सम्भविनी जातु, अपि तु तत्तृष्णापरिहारेणैव, तत्परिहारप्रत्यलत्वप्रदोऽवाप्तोऽयमवसर इति भावनीयम् ।

न ह्येष विकथाकालः, अपि तु सत्कथावसरः । नैष दुर्ध्यानाध्वा, अपि तु शुभध्यानसमयः । अतः सफलीकर्त्तव्य एष समयः । किञ्च -

**सूत्र : असारा विसया, निअमगामिणो, विरसावसाणा । भीसणो मच्चू, सव्वाभावकारो, अविन्नायागमणो, अणिवारणिज्जो, पुणो पुणोऽणुबंधी ।**

यद्यप्यापातरमणीयाः स्पर्शादयो विषयाः, तथाप्यसाराः, विनश्वरत्वात्, दारुणोदयत्वाच्च, अभिहितं च-बडिशामिषवत्तुच्छे कुसुखे दारुणोदये । सत्कास्त्यजन्ति सच्चेष्टां धिगहो दारुणं तमः - इति (योगदृष्टिसमुच्चये.........) । कथन्नामानन्तसुखसन्दोहहेतुरयं मानवदेहस्तुच्छसुखार्थं व्यर्थतां नेतुमुचितः ?

किञ्चावश्यम्भावी भयङ्करश्च मृत्युः । एष एव जनयत्यगण्यानि भयानि । करोत्ययं सर्ववस्तूनामभावम् । वियोजयत्यात्मानं सर्ववस्तुभ्य इत्यर्थः । न हि मरणानन्तरं धनादिकं किमप्यन्वेति जीवम् । अपास्यते तदाश्रयं जीवस्वामित्वं मरणेन । अविज्ञाताऽऽगमश्च मृत्युः । नैष प्रतीक्षते कालम् । न पश्यत्यकालम् । न च चक्रीन्द्रोपेन्द्रतीर्थकृदादयोऽपि

प्रभवन्त्यस्मिन्, अनिवारणीयत्वात् । नैष शृणोति कस्यचित् क्षणप्रतीक्षाविज्ञप्तिम् । हसतीव सहसा धर्मकरणाभिलाषम् । अपहरति विवशतया रुदन्तम् । न च सकृदेवागच्छत्यसौ, अपि तु प्रतिभवम्, अतः पुनः पुनरनुबन्धी मृत्युः । जातस्य हि ध्रुवो मृत्युरिति । यावद्धि रागरोषौ मनोवाक्कायप्रवृत्तिश्च, तावज्जन्म, तावच्च मृत्युः । अतस्त्रोटनीया रागद्वेषतन्तवः । विजेतव्यं च मरणम् ।

**सूत्र : धम्मो एअस्स ओसहं, एगंतविसुद्धो, महापुरिस-सेविओ, सव्वहिअकारी निरइआरो परमाणंदहेऊ ।**

धर्मो हि पुनः पुनर्मृत्युभावनिरोधकः । अत एव धर्मो मृत्युलक्षणदारुणरोगोपशमनौषधम् । अतोऽभीक्ष्णं सेवनीय एषः। अव्रतैर्विषयैश्च मोहितोऽयं जीवः । अत एव क्षीणं तन्निकारगोचरमात्मसामर्थ्यम् । तदत्र धर्माराधनैवोपायः । नवरमेकान्तनिर्मले धर्मे यतनीयम् । धर्मोऽपि कषच्छेदताप-परीक्षोत्तीर्ण एव मृग्य इति हृदयम् । धर्मेण हि परमनिवृत्तिरूपेण भाव्यम् । यत्र हिंसाद्यविरतेः सर्वथा परिहारः, स धर्मः परमनिवृत्तिरूपः । यो धर्मस्तीर्थकर-चक्र्यादिमहापुरुषनिषेवितः, मैत्रीकारुण्यादिवासितः, सर्वहितः, परमानन्दप्रदः, प्रशमसुख-हेतुश्च, स आराधनीयः सर्वातिचारपरिहारेण । एष एव भवति मरणरुगौषधम् ।

**सूत्र : नमो इमस्स धम्मस्स । नमो एअधम्मपगासगाणं । नमो एअधम्मपालगाणं । नमो एअधम्मपरूवगाणं । नमो एअधम्मपवज्जागाणं ।**

तदेवंविधाय धर्माय नमस्करोम्यहम् । वन्दे चैनम् । एतद्धर्मप्रकाशकेभ्योऽर्हद्भ्यो नमः । एतद्धर्मं मद्धृदयसात्कृत्य तदनुपालनापरेभ्यो मुनिभ्यो नमः । एतद्धर्मोपदेशकेभ्य आचार्य-भगवद्भ्यो नमामि । एष एव धर्मो मोक्षहेतुः सत्यधर्मश्चेत्येवं प्रतिपत्तृभ्यः श्राद्धादिभ्यो नमः ।

**सूत्र : इच्छामि अहमिणं धम्मं पडिवज्जित्तए सम्मं मणवयणकाय-जोगेहिं । होइ ममेअं कल्लाणं परमकल्लाणाणं जिणामणुभावओ ।**

इच्छाम्यहमेतद्धर्मं प्रतिपत्तुम्, तदेकपक्षपातत्वान्मम । अभिलषामि सम्यङ्मनोवाक्काययोगैरेतद्धर्मनिषेवणम् । सर्वाङ्गसम्पूर्णधर्माधिगतये करोमि प्रणिधाम् । भवतु मैतद्धर्मावाप्तिलक्षणं कल्याणम् । न च तदवाप्तौ विद्यते मम किमपि सामर्थ्यम् । तथाप्यधिगतानन्तकल्याणानां जिनानामनुभावतोऽस्तु मम तत्प्राप्तिरित्यभिलषाम्यहम् ।

ननु चात्मविशुद्धाध्यवसायमात्रप्राप्य इति चेत् ? तदध्यवसायस्य तदनुभावप्रसूतत्वात् तद्धेतोरेवास्तु किन्तेनेति नीत्या तत्र तद्धेतुव्यपदेशस्य न्यायानपेतत्वादिति गृहाण ।

**सूत्र : सुप्पणिहाणमेवं चिंतिज्जा पुणो पुणो । एअधम्म-जुत्ताणमववायकारीसिआ । पहाणं मोहच्छेअणमेअं । एवं विसुज्झमाणभावणाए कम्मापगमेणं उवेइ एअस्स जुग्गयं । तहा संसार-विरत्ते संविग्गो भवइ अममे, अपरोवतावी, विसुद्धे, विसुद्धमाणभावे ।**

**इति साहुधम्मपरिभावणासुत्तं समत्तं ।**

एवमेकाग्रतया विशुद्धहृदयेन पुनः पुनश्चिन्तयेद् भावयेच्च। एतत्त्वत्रावधेयम् - श्रमणधर्मलक्षणौषधस्यातिमहत्त्वं विचिन्त्य कर्त्तव्यस्तदभिलाषः । स च प्रागुक्तार्हदादिनमस्कारपुरस्सरमेव विधातव्यः । अत एव सूत्रकारेणैतत्क्रमेणैवाऽऽशंसाऽभिहिता। तन्नमस्कारस्य मङ्गलरूपत्वादौचित्यानु-पालनार्थमावश्यकत्वाच्च । अतो हि प्रतिबन्धककर्मविगमम् । ततश्चाशु प्रार्थनासाफल्यम् ।

एतत्साधुधर्मप्राप्तानामवपातकारी स्यात्, तत्पादप्रणाम-परस्स्यात्, सबहुमानं तान्नमस्कुर्यात्, तद्विनयं विदध्यात्, तदुपासनां तनुयात्, तदाज्ञाकारी च स्यादिति भावः । धनार्थ्यप्येतद्विधिपुरस्सरमेव धनिनं निषेवमाणोऽवाप्नोति धनम्। भावनीयमत्र- सुव्रतश्रेष्ठिज्ञातम्, येनैतद्विधिना श्रमणोपासनेन क्षपयित्वा चारित्रमोहनीयमवाप्तं श्रामण्यम् ।

एवं तीव्रप्रणिधानपूर्वकमभीक्ष्णं धर्मजागरिकाकारणं साधुसेवनं च मुख्यो मोहच्छेदोपायः, सर्वविरत्यध्यवसायभूमिका-स्थानीयसुन्दराध्यवसायजनकत्वात्, तदध्यवसायस्य चारित्रमोहनीयशिलोच्चयवज्राशनिसङ्काशत्वाच्च ।

ततश्च विशिष्टेन कर्मक्षयेनावाप्यते श्रमणधर्मयोग्यता । संसारस्य भयङ्करदोषमयी स्थितिरित्यालोक्यावाप्नोति जीवः श्रमणधर्मस्य मोक्षस्य चाभिलाषम् । भवत्यत्यन्तं विरक्तः संसारावारपारात् । न चास्य सञ्जायते यत्किञ्चिद्वस्तुगोचरो ममकारः । अत एव नास्य परद्रव्यतप्तिलक्षण उपजायते सन्तापः । सर्वत्राप्यप्रतिहतो भवत्यस्यानुकम्पापरिणामः । मुच्यतेऽसौ रागद्वेषग्रहात् । वर्द्धते शुभाध्यवसायात् ।

उल्लसत्यस्य कण्डकस्थानम् । प्राप्नोत्येष उत्तरोत्तरं विशुद्ध-मध्यवसायस्थानम् । एवमाराधयत्यसौ साधुधर्मपरिभावनाम् ।

**इति द्वितीयं साधुधर्मपरिभावनासूत्रम्**

## अथ तृतीयं सूत्रम्

## प्रव्रज्याग्रहणविधिः

### (१) परपीडापरिहारयत्नः

**सूत्र : परिभाविए साधुधम्मे जहोदिअगुणे, जइज्जा सम्ममेअं पडिवज्जित्तए अपरोवतावं परोवतावो हि तप्पडिवत्तिविग्घं । अणुपाओ खु एसो । न खलु अकुशलारंभओ हिअं ।**

पूर्वसूत्रोक्तविधिना विधाय साधुधर्मपरिभावनामधिगत-यथोदितगुणश्चारित्रधर्मावाप्त्यर्थं यतेत । अत्र यथोदितगुण इति संसारविरक्तो मोक्षाभिलाषी निर्ममो परानुपतापी निर्मलहृदय उत्तरोत्तरविशुद्ध्यमानभावश्च । परोपतापो हि धर्मप्राप्त्यन्तराय-भूतः, नैष धर्माधिगमोपायः । धर्मप्राप्तिप्रयत्नोऽपि चेत् परपीडा-जनकस्तदा सोऽकुशलः । आस्तां गृहादिप्रयोजनेन परोपतापः, धर्मार्थमपि परोपतापोऽशुभ इत्याकूतम् । न चाशुभयत्नेन हितमभूत्कस्यापि । अतः परिहर्त्तव्यः परसन्तापः ।

### (२) मातापितृप्रतिबोधः

**सूत्र : अप्पडिबुद्धे कहिंचि पडिबोहिज्जा अम्मापियरे । उभयलोगसफलं जीविअं, समुदायकडा कम्मा समुदायफलत्ति । एवं सुदीहो अविओगो ।**

अथ साधुधर्माभिलाषिणामपरस्तु परोपतापो दुर्घटः, किन्तु सम्भवति कथञ्चिदप्रतिबुद्धानां पितॄणां मनसि वियोगजन्यसन्तापः । तमपनेतुं बोधयितव्यौ पितरौ । कथञ्चिदप्रतिबुद्धानित्येतज्ज्ञापयति यन्न महासत्त्वस्य प्राय एतावप्रतिबुद्धौ भवतः । साधुधर्मपरिभावनाचर्यां महागुणाँश्च तस्यावलोक्य प्रतिबुध्येते तन्मातापितराविति ।

महासत्त्वो हि स यस्य दिव्यभोगावलोकनेऽपि न भवति हर्षोन्मादः । नानिष्टप्रसङ्गैरप्युत्पद्यते ग्लानिभावः । उपशान्ता भवन्त्यस्य कषायाः । आवर्ज्येते एतद्गुणविभूत्या मातापितरौ, चकिताश्चासेते । एवं तत्त्वानुसारित्वाख्यगुणोऽपि महान् । येन सर्वत्रान्वेषयति वस्तुतत्त्वम् । न च बहुमन्यते वराकजीवैर्विधीयमानामतत्त्वकथामेषः । प्रतिपदमेव प्रादुर्भूयतेऽस्य तत्त्वपक्षपातः । एवञ्च प्रतिबोधमन्तरेणैवोदेत्यस्य पित्रोरपि चारित्राभिलाषः, जम्बूकुमारमातापितृवत् । तथापि यद्यप्रतिबुद्धौ मातापितरौ कर्मवैषम्यात् तदा तौ प्रतिबोद्धव्यौ, यथा - यदस्माभिरुत्तमायुर्लक्षणो निधिरवाप्तः, स ऐहिकपारलौकिकोभयप्रयोजनसिद्ध्या सफलीकर्त्तव्यः । एतज्जीवनं तु सुकृतिनामेव फलेग्रहिर्भवति । तच्च सुकृतं सर्वजीवगणाभयदानप्रदानेन परलोक उत्तमस्थानस्थिति सुसंस्कारसन्दोहानुगमानुगुणानुष्ठानाच्च सम्भवति । द्वयमप्येतदसम्भवति शुद्धचारित्रधर्माऽऽराधनादेव । तदनाराधनायामपि मृत्युस्त्ववश्यम्भावी । चारित्रधर्मोरीकाराभावेनैव वैफल्यं गतान्यनन्तानि जीवितानि। अत एतदङ्गीकारेण सफलीकार्यमिदं जीवितम् ।

अपि च भवतोर्ममोपर्यतीव स्नेहः । इच्छथः सदाप्यवियोगं नः । तच्च दुर्घटम् । मरणान्तत्वादेतत्संयोगस्य । मरणानन्तरं हि गम्यते स्वस्वकर्मानुसारेण पृथक् पृथग् गतौ । किन्तु सम्भूय चरणोपासनेन तु सुदीर्घकालं यावदेष्यद्भवेऽपि भविष्यत्यस्माकमवियोगः, समुदायकृतकर्मणां समुदायफलत्वात्। भवति ह्यग्निप्रभृत्युपद्रवकृत् समुदायो भवान्तरेऽपि तादृशोपद्रवतो मरणयोगी, एवं धर्माराधनाकृत्समुदायस्य प्रशस्तफलाधिगमोऽपि दृष्टव्यः । सम्भवत्येवमामुक्ति सदातनः संयोगः । अङ्गारमर्दकाचार्यशिष्याणां भवान्तरेऽपि समुदायफलयोगित्वं प्रसिद्धम् ।

## (३) विरागसरसीलहरी

**सूत्र : अण्णहा एगरुक्खनिवासिसउणतुल्लमेअं । उद्दामो मच्चू, पच्चासण्णो अ । दुल्लहं मणुअत्तं समुद्दपडिअरयण-लाभतुल्लं ।**

अन्यथा - भवतोश्चारित्राप्रतिपत्तौ, समुदायकृताऽऽराधना-विरहात्तादृशफलस्याप्यभावः । एवञ्च पारलौकिकसंयोगस्याप्य-भावः । ततश्चैकवृक्षनिवासिपक्षिगणतुल्यं स्यादेतत् । प्रगे स्वस्वकार्यवशात् पृथक् पृथग् गमनसाधर्म्यात्, यथोक्तम् - वासवृक्षं समागम्य, विगच्छन्ति यथाऽण्डजाः नियतं विप्रयोगान्त-स्तथा भूतसमागमः - इति ।

किञ्च मृत्युरपि सकृदवश्यमागमिष्यति, उद्दामत्वात्, अनिवारितप्रसरत्वाच्च । न हि चतुर्दशरज्जूमितेऽत्र लोके तत्स्थानमस्ति यत्रासम्भवागमो मृत्योः । अपि चाल्पतरं

साम्प्रतकालीनमायुष्यम्, अयं हि धर्मसाधनावसरः, एतद्विगमे तु क्व पुनरेष संयोगः ? दुर्लभत्वान्मानुष्यस्य, समुद्रपतितरत्न-लाभोपमत्वात्तल्लाभस्य ।

## (४) मनुजजन्म यानपात्रम्

**सूत्र : अइप्पभूआ अण्णे भवा दुक्खबहुला, मोहंधयारा, अकुसलाणुबंधिणो, अजुग्गा सुद्धधम्मस्स । जुग्गं च एअं पोअभूअं भवसमुद्दे, जुत्तं सकज्जे निउंजिउं संवरठइअच्छिद्दं नामकण्णधारं तवपवणजवणं ।**

दुर्लभो हि मनुजभवः । यद्यत्र न विहिता शुद्धधर्माऽऽराधना, तदा पशु-पक्षि-कीटादिभवप्रायोग्यममकारदिवशवर्त्तिता स्यात्, ततश्च तादृशभवावाप्तिरेव स्यात् । तत्रापि तादृशसंस्कारान्वयेन तिर्यग्भवपरम्पराप्रसूतिः । एवं तीव्रमूर्च्छादिदोषेणैकेन्द्रियादि-भवावतरणमपि सम्भवति, तथा चार्षम् - जया मोहोदओ तिव्वो अण्णाणं खु महब्भयं । पेलवं वेयणीयं तु तया एगिंदियत्तणं - इति (बृहत्सङ्ग्रहण्याम्) । एकेन्द्रियेषु त्वतिदीर्घकाय-स्थितिसद्भावात् क्व पुनर्मनुजभवाधिगमः ? पृथ्वीकायादि-कायस्थितिर्ह्यसङ्ख्यकालीना । सोऽसङ्ख्यकालोऽप्यसङ्ख्यो-त्सर्पिण्यवसर्पिणीप्रमाणः । तेष्वपि साधारणवनस्पतिकायस्थिति-स्त्वनन्तकालचक्रप्रमाणा । इत्थञ्च तत्र गतस्य क्व पुनरेतदव-सरप्राप्तिः ?

किञ्चैता दुर्गतयो दुःखबहुलाः । प्रायस्तास्वसातवेदना भवति । तासु निबिडो भवति मोहान्धकारः । प्रकृत्या

भवत्यसच्चेष्टा । अतश्चाऽऽस्वकुशलानुबन्धसामान्यम् । न ह्यत्रोदेति शुद्धा बुद्धिः । नावाप्यते विनयविधाविसरः । दुष्प्रापमत्र मनःप्रभृतिपावित्र्यम् । नापि तत्र दुःखक्षयोपायाऽऽदृतिः । अत एवैते भवा अयोग्याः शुद्धधर्माऽऽराधनार्थम् । योग्यवस्तु मनुजभव एव ।

मनुजभवो हि संसारावारपारपारगमनैकयानपात्रम् । देवानामपि मुमुक्षूणामावश्यको मनुजभवाधिगमः । धर्मास्त्रेण कर्मसङ्ग्रामे कृत्स्नकर्मक्षयसम्भवो मनुजभव एव । अत एव धर्मः परमकर्त्तव्यो मनुजानाम् । एतदाराधनायामेव मनुजजीवन-विनियोगो न्यायाः । संसारसागरे पोतभूतमिदं मनुजजीवनम्। स्थगितव्यान्यत्र हिंसाद्याश्रवद्वाराण्यहिंसादिसंवरैः । अन्यथा तु कर्मजलपूरितस्य निमज्जनमेवैतत्पोतस्य । तरणार्थमिहायं भवः । नैनं निमज्जननिबन्धनं कर्तुमुचितम् ।

तथाऽत्र पोते ज्ञानकर्णधार आवश्यकः । यथैव कर्णधारोऽभीक्ष्णमुपयोगेन नयति पोतं सन्मार्गेण, तथा पुनः पुनः शुभोपयोगेन ज्ञानमपि नयति जीवं भवोत्तारमार्गेण । ज्ञानोपयोगविरहे तु संवरप्रवृत्तस्याप्यज्ञानाऽऽलस्यप्रमादादि-नोन्मार्गगमनं सम्भवेत् । सम्भवेच्च रागद्वेषशैलाऽऽस्फालनेन शतधा विशकलीभावो गुणस्थानकस्य । अत एव सूक्तं परमर्षिभिः **उपयोगे धर्मः**, न च प्रतिज्ञामात्रेण, अपि तु तत्पालनावधानेनः सम्भवति धर्मः - इति ।

तथा तपोरूपोऽनुकूलः पवनोऽप्यावश्यकः । अन्यथा पोतस्य विसंस्थुलभावयोगात्, लक्ष्यं प्रति गत्यभावाच्च । अनशनादि-

बाह्यतपःषट्कं प्रायश्चित्ताद्याभ्यन्तरतपःषट्कं च विधत्ते विशिष्टां कर्मनिर्जराम् । तपो ह्यनुकूलपवनस्थानीयं करोति भवोत्तारोद्देश्यां गतिं वेगवतीम् ।

## (५) दुर्लभः सिद्धिसाधकः क्षणः सिद्धिस्वरूपं च

**सूत्र : खणे दुल्लहे सव्वकज्जोवमाई, सिद्धिसाहग-धम्मसाहगत्तेण । उवादेआ य एसा जीवाणं । जं न ईमीए जम्मो, न जरा, न मरणं, न इट्ठवियोगो, नाणिट्ठसंपओगो, न खुहा, न पिवासा, न अण्णो कोइ दोसो । सव्वहा अपरतंतं जीवावत्थाणं असुभरागाइरहिअं संतं सिवं अव्वाबाहंति ।**

भवसमुद्रतरणात्मके निजकार्य एव नियोक्तव्यं मानवजीवनम्, दुर्लभत्वादेतदवसरस्य । निरुपमः खल्वयमवसरः, अतिशायी च । अत्रैव सम्भवति मोक्षमार्गस्य सम्यग्दर्शनज्ञान-चारित्ररूप-स्याऽऽराधना । अन्येषु तु भवेषु विषोढं बहु कायकष्टम्, विहितोऽनल्पप्रयत्नः प्रयोजनान्तरेषु । न च किमपि सिद्धमात्मकार्यम् । अद्यापि न निष्ठितं संसरणम् । अतः सिद्धिरेव प्राप्तव्या, जन्मजरामरणादिपीडाविरहितत्वात्सिद्धेः ।

ननु च भोज्यादिविरहात्किन्नाम सिद्धौ सौख्यमिति चेत्? मरणाद्यपायविगमेनाविर्भूतस्वभावभूतमिति गृहाण । तथाहि गणकाभिहितं मृत्युं श्रुत्वाऽपि कम्पते जनः । जन्मदुःखं स्मारयति नरकयातनाम् । इष्टवियोगो दन्दहति हृदयम् । अनिष्टसंयोगो दारयति मनः । निपीडयन्ति क्षुधापिपासादयः पीडाः । पराभूयते पारतन्त्र्यतः । उद्विज्यते रोगजरादिकृतपराभवैः । अत

एवैतत्सर्वशून्ये मोक्षे निरुपमं सुखम् । नात्र शरीरकारावास-निरोधलक्षणो जन्म । अत एव न प्राणनाशसङ्काशं मरणम्। न वयोहानिरूपा जरा । नेष्टवियोगः, शश्वत्सौख्यसम्पत्तेः । अपि चेच्छाया एवाभावः, अत इष्टस्याप्यभावः, ततश्च प्रकृत्या परमानन्दप्रसूतिः, अपेक्षाया एव दुःखरूपत्वात्, वक्ष्यते च पुरस्तात् - अविक्खा अणाणंदेइति (पञ्चसूत्रके पञ्चमसूत्रे । किञ्च शरीरेन्द्रियमनसामप्यभावः । न तत्र क्षुद्विडम्बना, नापि पिपासापीडा, न व्याध्यपयशोऽसातविष्ट्यादिकम् । न हि शरीराभावे भवति व्याधिः, नापि निन्दकादिविरहे निन्दाद्यपि।

न चैवं सर्वशून्यत्वमेव मुक्ताविति वाच्यम्, निरूपमसुखसम्भूति रूपत्वान्मुक्तेः, तदाहः - अपरायत्तमौत्सुक्यरहितं निष्प्रतिक्रियम्। सुखं स्वाभाविकं तत्र नित्यं भयविवर्जितम् ।। परमानन्दरूपं तद् गीयतेऽन्यैः - र्विचक्षणैः । इत्थं सकलकल्याणरूपत्वात्साम्प्रतं ह्यदः ।। संवेद्यं योगिनामेतदन्येषां श्रुतिगोचरः । उपमाभावतो सम्यगभिधातुं न शक्यते - इति (अष्टकप्रकरणे)

अधिगम्यत एतदवस्थाविशेषोऽशुभरागाद्यभावात् रागादिभिरेव क्रियते जीवो विषयपरतन्त्रः । एभिरेव च पीड्यत एषः । सिद्धभावे तु वीतरागतानुभावात् परमं स्वातन्त्रयम् । उपशमश्च परमः । न च शक्तिरूपेणापि तत्र कषायाः, तद्विरहात । अतः शान्तमिदं पदं शक्तितोऽपि, आस्तां व्यक्तित इति । एव सर्वोपद्रवाणां शश्वदन्तभावेन नित्यमत्र शिवम् । किञ्च नात्र गमनागमनप्रयुक्तमाकुलत्वम्, सर्वथाप्यक्रियत्वात्, अत एवात्राऽव्याबाधस्थितिः । क्रियैवानेकबाधायोनिः, तद्विरहे कुर्ताबाधाया गन्धोऽपीति ।

अतो न विफलतां नेय एष मोक्षसाधनावसरः । विरक्तव्यं संसारात् । विचारणीयमत्र हनुमद्वैराग्यवृत्तान्तम् ।

## (६) संसारस्वरूपम्

**सूत्र : विवरीओ अ संसारो इमीए, अणवट्ठिअसहावो । इत्थ खलु सुही वि असुही, संतमसंतं, सुविणुव्व सव्वमाल-मालंति । ता अलमित्थ पडिबंधेणं ।**

मोक्षस्वरूपादत्यन्तं विपरीतमेतत्संसारस्वरूपम् । मोक्षे निरुपद्रवता, संसारस्तूपद्रवैकनिलयः । आस्तामन्योपद्रव-गणवार्त्ता, जन्मोपद्रवोऽपि विडम्बनैव, अत एवोक्तम् - जरामरणदौर्गत्यव्याधयस्तावदासताम् । मन्ये जन्मापि धीरस्य, भूयो भूयस्त्रपाकरम् - इति ।

किञ्च स्थिरैकस्वभावो मोक्षः । संसारस्त्वनवस्थितस्वभावः। तथा ह्यत्र संसरन् जीवो मनुजो भूत्वा पशुर्भवति । नीरुग् भूत्वा रुग्णो भवति । बालो भूत्वा युवा वृद्धश्च भवति । परावर्त्ततेऽत्र वयः । परावर्त्ततेऽत्र स्वजनः । परावर्त्ततेऽत्र स्वभावः । प्राङ् मिष्टान्नाभ्यवहरणस्वभावः शूकरीभूय विष्टादनप्रकृतिर्भवति । परावर्त्ततेऽत्र हर्षादिर्भावोऽपि ।

किञ्च संसारे सुख्यप्यसुखी परमार्थतः, दुःखात्मकत्वा-त्तत्सुखस्य, चलत्वाच्च सुखपर्यायस्य, उक्तञ्च - परिणामाच्च तापाच्च संस्काराच्च बुधैर्मतम् । गुणवृत्तिविरोधाच्च, दुःखं पुण्यभवं सुखम् - इति (अध्यात्मसारे १८ -) दृश्यत एव दुःखपरिणामः सुखस्य, तथाहि - अस्तमेत्यारोग्यमुदेति च

रोगः । अपगच्छति विभव आगच्छति च दारिद्र्यम् । विलयमेति स्नेह उद्भवति च विरोधभावः ।

किञ्च कलहेनेर्ष्यादिना चोदेति संसारे दुःखम् । अपि च वध्यतया राज्ञाऽऽदिष्टो जन इत्वरकालीनमनोज्ञविषयसंयोगेऽपि नेति रतिम्, एवं गृहीतजन्मतया वध्यतयाऽऽदिष्टा एव सर्वेऽपि संसारिणो जीवाः । किञ्च वध्यो वेत्ति मृत्युदिनम्, न तु संसारिणो जीवाः । तदत्र संसारे किन्नु सुखम् ? सर्वस्योपरि लम्बमानैवाऽऽस्ते मृत्युतरवारिः सदाऽप्यत्र । तथा संसारे सदप्यसत्, पर्यायात् । न हि पर्यायपरावर्त्ते विलम्बो भवत्यत्र। उक्तञ्च - आयुर्वायुतरत्तरङ्गतरलं लग्नापदः सम्पदः, सर्वेऽपीन्द्रियगोचराश्च चटुलाः सन्ध्याभ्ररागादिवत् । मित्रस्त्री-स्वजनादिसङ्गमसुखं स्वप्नेन्द्रजालोपमं, तत् किं वस्तु भवे भवेदिह मुदामालम्बनं यत् सताम् ? - इति (शान्तसुधारसे १-) अतो हे पितरौ ! नात्र कुत्रापि प्रतिबन्धः श्रेयान् ।

## (७) पितृप्रार्थना

**सूत्र : करेह मे अणुग्गहं । उज्जमह एअं वुच्छिंदित्तए । अहंपि तुम्हाणुमुइए साहेमि एअं निव्विण्णो जम्ममरणेहिं । समिज्झइ अ मे समीहिअं गुरुप्पभावेणं ।**

हे पुत्रवत्सल ! तात ! कुरुत ममोपर्यनुग्रहम् । उद्यततमेतत्संसारोच्छित्त्यै । अहमपि युष्माकमनुमत्या साधयामि संसारोच्छेदम् । उद्विग्नोऽस्म्यहं जरामरणादिदुःखमयात्संसारात्। स्वीकरोम्यधुना सद्गुरुचरणशरणम् । भवतु ममाभिमतसिद्धि-

र्भवतोः सद्गुरोश्चानुभावेन । नियोगत भविष्यति मत्समीष्टं भवाभावलक्षणम् । ततोऽप्यवश्यमनन्तसंसारपरिभ्रमणपर्यवसानम् ।

**सूत्र : एवं सेसेवि बोहिज्जा । तओ सममेएहिं सेविज्ज धम्मं करिज्जोचिअकरणिज्जं निरासंसो उ सव्वदा । एअं परममुणिसासणं ।**

एवं पितरौ भार्यादिस्वजनाँश्च प्रतिबोधयेत्, राजपुत्र-वज्रबाहुवत् । ततश्च तैः सहाऽऽराधयेच्चारित्रधर्मम् । तदाराधनाऽपि कथमित्याह - निराशंसभावेन । विमुच्य ऋद्ध्यादिगौरवं परिहृत्य विभवादिलोभं सन्त्यज्य च सन्मानाद्याकाङ्क्षां कुर्यादुचितं कर्त्तव्यम् । भावनीयं निराशंसभावोपलब्धये शोफपोषाद्यौपम्यम्, भवितव्यमात्म-मात्रतृप्तेन, यथाऽऽह - यथा शोकस्य पुष्टत्वं, यथा वा वध्यमण्डनम् । तथा जानन् भवोन्माद - मात्मतृप्तो भवेन्मुनिः - इति (ज्ञानसारे १३ - ६) ।

## (८) अप्रतिबोधे कर्त्तव्यम्

**सूत्र : अबुज्झमाणेसु अ कम्मपरिणईए, विहिज्जा जहासत्ति तदुवकरणं आओवायसुद्धं समईए । कयण्णुआ खु एसा, करुणा य, धम्मप्पहाणजणणी जणम्मि । तओ अणुण्णाए पडिवज्जिज्ज धम्मं ।**

अथ तथाविधकर्मपरिणत्या यदि मातापितरौ न प्रतिबुध्येते, तदा स्वशक्त्या तज्जीवननिर्वाहचिन्तां कुर्यात् । स्वमत्या शुद्धाऽऽयोपायोपार्जनं विदध्यात् । तत्रापरेभ्य उत्पाद्यमानमायः।

वृद्ध्यादिना नियतो लाभ उपायः । पटहवादनपूर्वकं घोषितं कृष्णेन, यथा-यद्येवंविधो महर्द्धिकोऽपि थावच्चापुत्रः प्रव्रजति, तदा यः कोऽपीच्छति प्रव्रजितुम्, स प्रव्रजेत् । तत्कुटुम्ब-निर्वाहादिचिन्तां कृष्णः करिष्यति - इति ।

न चान्यसहायेन दीक्षाग्रहणमनुचितमिति वाच्यम्, अनिवार्य-संयोगयोगे गृहादिकार्येष्वपि तद्ग्रहणस्य सार्वजनिकत्वात् । न च मुमुक्षुणा स्वजनार्थं धनोपार्जनमनुचितम्, तत्त्वादेवेति वाच्यम्, संसारत्यागासमर्थयोः सत्योः पित्रोर्निर्वाहाभावे दुर्ध्यानसम्भवात्, लोकनिन्दाप्रसक्तेश्च तच्चिन्ताकरणस्याऽऽवश्यकत्वात् । नैतत्पापम्, अपि तु मातापितृसेवा कृतज्ञतागुणः कारुण्यं च ।

कृतज्ञता हि मोक्षमार्गोपयोगी प्रथमो गुणः । लिङ्गमेतन्मोक्ष-साधकयोग्यतायाः । अत एव लोके करुणा प्रधाना धर्ममातेत्युदितम् । तत्प्रसूतत्वाद्धर्मस्य । अपि च शासनोन्नति-प्रयोजिका करुणा । तीर्थकरा अपि प्रव्रज्याग्रहणात् प्राक् प्रवर्त्तन्ते सांवत्सरिकदाने । यदि चापरेष्वप्यनुकम्पा विधेया, तदा मातापितृगोचरे तु किं वाच्यम् ? वस्तुतस्त्वनुकम्पाऽप्येषा न भवति, अपि तु कृतज्ञता भक्तिश्च ।

एवं मातापितृनिर्वाहप्रबन्धं विधाय, तदनुज्ञां प्राप्योरी-कुर्याच्चारित्रधर्मम् ।

## (९) अपवादमार्गः

**सूत्र : अण्णहा अणुवहे चेव उवहिजुत्ते सिआ । धम्माराहणं**

**खु हिअं सव्वसत्ताणं । तहा तहेअं संपाडिज्जा । सव्वहा अपडिवज्जमाणे चइज्जा ते अट्ठाणगगिलाणोसहत्थचागगनाएणं ।**

यदि तु मोहवशात्पितरौ नानुज्ञापयतः प्रव्रज्याग्रहणार्थम्, तदा हृदयेन निर्माय एव मुमुक्षुरनुज्ञाधिगमार्थं मायाप्रयोगं कुर्यात् । कथयेन्मम दुःस्वप्नमाऽऽगतम् । ततश्च तेनाल्पायुः पुत्रस्यानुमीयानुज्ञापयेतां पितरौ । न च कथं कल्याणार्थी मायां कुर्यादिति वाच्यम्, यत उक्तम् - निर्माय एव भावेन, मायावाँस्तु भवेत् क्वचित् । पश्येत् स्वपरयोर्यत्र सानुबन्ध-हितोदयम् - इति । एवञ्च धर्माराधनमेव हितं सर्वसत्त्वानामिति । परमार्थतस्तु मायैवैषा न भवतीति विभावनीयम् ।

यथा हि प्राज्ञो पितरावन्तरुल्लसन्तमपि स्नेहसागरकल्लोलं न व्यक्तीकुर्वन्ति शिशोः पुरस्तात् । आसेते च गभीरमुद्रौ । तथा चान्तर्बहिरसदृशवृत्तिभावेऽपि न सा माया दोषरूपा, सुतहितार्थत्वात् । यथा च सुदीर्घं चिकित्साकालं विदन्नपि वैद्यः प्रतिपादयति रुग्णाय - शीघ्रमेव नीरुग् भविष्यसि - इति । यतो रुग्णमनःप्रसन्नभाव उल्लसेत्, यतेत चौषधपथ्या-दावेषः, प्राप्नुयाच्चाऽऽरोग्यम् । एषोऽपि न दोषः, रुग्णहितार्थत्वात् एवं प्रकृतेऽपि द्रष्टव्यम् ।

मोहप्रचुरसम्बन्धनिर्वाहेणैव व्यतीता अनन्ता भवा भवाटव्याम् । साम्प्रतं तु परित्यज्य तत्सम्बन्धं रत्नत्रयीसाधनावसरः, यतो भवभ्रान्तिपर्यवसानं स्यात् । अतस्तदर्थं दुःस्वप्नादिकथनलक्षणा मायाऽपि न्याय्या । आदिना गणकमुखेनात्मनो भाव्यनिष्ट-कथनपरिग्रहः ।

ननु चैवं सत्यबाधा स्यादिति चेत् ? न स्वपरयोः परिणामहितस्यैव सत्यत्वात्, सद्भ्यो हितं सत्यमित्युक्तेः । यदि त्वेवमपि नानुज्ञापयतः पितरौ, तदाऽस्थानग्लानौषधनीत्या तौ परिहृत्याङ्गीकुर्याच्चारित्रम् । सा च नीतिरेवम् -

(१०)

**सूत्र : से जहानामए केइ पुरिसे कहंचि कंतारगए अम्मापिइसमेए, तप्पडिबद्धे वच्चिज्जा । तेसिं तत्थ नियमघाई पुरिसमित्तासज्झे संभवओसहे महायंके सिआ । तत्थ से पुरिसे तप्पडिबंधाओ एवमालोचिअ 'न भवंति एए नियमओ ओसहमंतरेण, ओसहभावे अ संसओ, कालसहाणि अ एआणि' तहा संठविअ संठविअ, तदोसहनिमितं सवित्तिनिमित्तं च चयमाणे साहू । एस चाए अचाए चेव चाए । फलमित्थ पहाणं बुहाणं। धीरा एअदंसिणो । स ते ओसहसंपायणेण जीवाविज्जा। संभवाओ पुरिसोचिअमेअं ।**

अस्थाने - वनादौ, ग्लानः - सञ्जातरोगप्रयुक्तग्लानिभावः, तदर्थं ग्रामादेरौषधमानेतुं तस्य त्यागः - परिहारः, यथा कश्चित् पुरुषः याति स्माटव्यां मातृपितृसमेतः । अटवी ह्यस्थानम्, यत्र न प्राप्यत औषधादिकम्, तत्र तन्मातृपित्रादेः सञ्जातः कश्चिद्रोगः । स चातिदारुणतया सम्भवति प्राणघातकः । किञ्चाशक्ततयाऽन्यत्र गन्तुमशक्तौ पितरौ । किञ्चित्कालं यावज्जीवितुं तु समर्थौ । नान्यो विद्यते रोगोपशमोपायः । आवश्यकं वर्त्तते रोगोपशमनौषधम् ।तच्च ग्राम एव प्राप्यम् ।

तदानयाम्यहमनुज्ञापयतं माम् - इति विज्ञपयति पुत्रः । न च मोहवशादनुज्ञापयतः तौ । अस्तु मरणं मा भूत्तव वियोगः - इति । ततः किं कुर्यात् प्राज्ञः पुत्रः ? गच्छेदेवौषधार्थम् । एवं मातापितृपरिहारकृदप्येष वस्तुतस्तदत्यागी तत्प्रतिपालकश्च । औषधाऽऽनयनेनापनीय तद्रोगं तज्जीवनप्रयोजकभावात् । एवञ्च तत्त्याग एव पारमार्थिकोऽत्यागः । परमभक्तश्च पित्रोः स पुत्रः । अत्यागस्तु भवेत्तत्त्वतो त्यागः, पित्रोर्मरणनिबन्धनत्वात् । अपि च स्वयमपि म्रियेत वने क्षुधातुरः । परिणामेन हि निर्णीयते प्रवृत्तेः सदसद्भावः । परिणाममेव प्राधान्यमर्पयन्ति सूक्ष्मदृशः । सम्भवत्यत्रौषधाऽऽनयनेन मातापितृरक्षा, कालसहत्वात्तयोः । औषधार्थमगमने तु निश्चय एव मृत्योः । अतस्ताभ्यां वस्त्रादिजीविकां दत्त्वा तदौषधार्थमात्मनिर्वाहार्थं च गच्छेत् । एवं मातापितृपरिहारकोऽपि प्रशंसनीयः । औषधमानीय ताभ्यां जीवनमपर्येदिति सम्भवतीत्यत एवंविधमाचरणमेवोचितम् ।

## (११) दृष्टान्तोपनयः

**सूत्र : एवं सुक्कपक्खिए महापुरिसे संसारकंतारपडिए अम्मा पिइसंगए धम्मपडिबद्धे विहरिज्जा । तेसिं तत्थ निअमविणासगे, अपत्तबीजाइपुरिसमित्तासज्झे, संभवंत सम्मत्ताईओसहे, मरणाइविवागे कम्मायंके सिआ । तत्थ से सुकपक्खिए पुरिसे धम्मपडिबंधाओ एवं समालोचिअ - "विणस्संति एए अवस्सं सम्मत्ताइओसहविरहेण । तस्स संपाडणे विभासा । कालसहाणि अ एआणि ववहारओ" ।**

एवं ये शुक्लपाक्षिकाः - उत्कर्षतोऽप्यपार्धपुद्गल-परावर्त्त-मात्रकालीनसंसाराः क्रियारुचयो जीवाः, ते संसाराटवीपतिता मात्रादिसमेता जीवा धर्मानुरागमङ्गीकृत्य विहरेयुः । ते च निर्मलदृक्तया पश्यन्ति वस्तुतत्त्वम् । पर्यालोचयति परिणामम्। चिन्तयन्ति यथा - संसारमहारण्यपतितौ मम पितरौ कर्मरोगेण ग्लानीभूतौ । स च रोगो नियोगेन मारकः । न च सकृदेवापि तु प्रतिभवमनेन मरणभयम् । न चायं रोगो धर्मबीजादिलक्षण-मौषधमन्तरेण शक्योपशमः । सम्भवति च कर्मरोगशमन-सम्यक्त्वा-द्यौषधाऽऽनयनम् । ततश्च नीरुग्भावसम्पादनेन भावजीवनाधिगमस्स्यात् । स्याच्च भवाटवीविलङ्घनम् - इति।

स्यादेतत्, यावज्जीवनं प्रतिपाल्य पितरौ ततश्चारित्रं गृह्णीयादिति चेत् ? न, तन्मृत्युप्रतीक्षायाश्चारित्र-परिणामोच्छेदकत्वात्, मैत्रीभावनिर्नाशकत्वात् । मैत्रीभावस्तु चारित्रगुणमूलमिति विभावनीयम् । एवं जीवतोरेव पित्रोः प्रव्रजितव्यम्, न तु विलम्बो विधेयः । अल्पं ह्यायुः तदपि सोपक्रमम् । अत एवाऽऽगमः - कुसग्गे जह ओसबिंदुए थोवं चिट्ठइ लंबमाणए । एवं मणुआण जीवियं समयं गोयम ! मा पमायए - इति (उत्तराध्ययने १० -) अतः शीघ्रमेव ग्राह्यं चारित्रम् ।

**सूत्र : तहा संठविअ संठविअ इहलोगचिंताए, तेसिं सम्मत्ताइओसहनिमित्तं, विसिठ्ठगुरूमाइभावेण सवित्तिनिमित्तं च, किच्चकरणेण चयमाणे संजमपडिवतीए, साहू सिद्धीए । 'एस चाए अचाए' तत्तभावणाओ । 'अचाए चेव चाए**

**मिच्छाभावणाओ । तत्तफलमित्थ पहाणं । परमत्थओ धीरा एसदंसिणो आसन्नभव्वा ।**

एवं विचार्य मुमुक्षुर्मातृपितृजीवननिर्वाहस्य यथाशक्त्या चिन्तां कुर्यात् । एवं तौ स्वस्थीकृत्य सम्यक्त्वादिप्रापणार्थं रत्नत्रयावाप्तिहेतोस्त्यजेत् । गृह्णीयाच्चारित्रम् । ततः सद्गुरुसमुपासनसम्प्राप्तशास्त्रज्ञानः पुत्रो वितरेत्तयोः सम्यक्त्वाद्यौषधम् । स्वयमपि तपःसंयमस्वाध्यायाऽऽराधनयाऽऽत्मपोषकज्ञानाद्यात्मक भावप्राणनिर्वाहं कुर्यात् । एतदर्थं हि तस्य प्रव्रज्याग्रहणम् !

अत एतदाशयेन पितरौ त्यजन् साधुः - सिद्धिगोचर प्रयत्नशीलः । इतरस्त्वसाधुः - अधर्मशीलः ।न हि स्वधर्मशीलतामन्तरेण जातु स्वहितसाधकत्वं परहितप्रयोजकत्वं वा सम्भवेत् । दृश्यन्तेऽद्यापि तथाविधा मुमुक्षवः, ये मात्राद्यनुरागवशेन न निष्क्रान्ताः । न तैः स्वयं चारित्रं गृहीतम्। नापि मात्रादिका अपि विशिष्टं धर्मपदं प्रापिताः, अतस्तान् परिहृत्य चारित्रग्रहणमेव हितावहम् ।

न च चारित्रलक्षणपुनितवस्तुसम्प्राप्त्यर्थं निष्ठुरतया मात्रादित्यागोऽनुचित इति वाच्यम्, उक्तविधौ पारुष्याभावात्। प्रोक्तनीत्याऽत्यागरूपत्वाच्च त्यागस्य स एष तत्त्वभावनानुभावः विपर्यासे तु भवेत्तत्त्यागः, मिथ्याभावनात् । न हि स्वस्यैव गृहवासभावे मात्रादेःसम्यक्त्वादिप्रापणं सम्भवि । ततश्च नियतं मात्रादेर्दुर्गतिबम्भ्रमणम् । तदेतदेव पित्रोर्निष्ठुरतया त्यजनम्। न ह्यवाप्तसम्यक्त्वाः कस्यचित्प्रव्रज्यायामन्तरायतांयन्तीति विभावनीयम् । प्रव्रज्यान्तरायकृत्त्वे तु तयोर्भवेद् भवभ्रमणम्।

अतो परमार्थदृशा शुभानुबन्धजनकं सम्यक्त्वाद्यवस्था-परम्परास्रष्टृ च शुभं फलमेव मुख्यम् । यत्तु वर्तमानकाले शुभतया प्रतिभासमानमपि परिणामेऽशुभं फलं ददाति, तच्चेष्टितं प्रत्यपायावहं त्याज्यं च । धीरा निकटकाले मुक्तिगामिनो हि पुरुषाः परमार्थतो मुख्यं फलं पश्यन्ति । दीर्घदृशाऽऽलोच्य हितप्रवृत्तिर्हि विचारकत्वसाधिका । एवं हि निकटीभवेन्मुक्तिः। भावनीयान्यत्र ऋषभकुमार - वज्रस्वामि - कलिकालसर्वज्ञ-हेमचन्द्रसूरि-अवन्तिसुकुमालवृत्तान्तानि । दृश्यन्तेऽद्यापि पुत्रदीक्षानन्तरं पित्रादेरपि दीक्षा ।

## (१२) दुष्प्रतिकारेषूपकारः

**सूत्र : स ते सम्मत्ताइओसहसंपाडणेण जीवाविज्जा अच्चंतिअं, अमरणावंझबीअजोगेणं । संभवाओ सुपुरिसोचिअमेअं । दुप्पडिआराणि अ अम्मापिईणि । एस धम्मो सयाणं। भगवं इत्थ नायं परिहरमाणे अकुसलाणुबंधि अम्मापिइसोगंति ।**

एवं विमुच्य मातापितरौ शुक्लपाक्षिकः पुरुषः प्रयच्छति ताभ्यां सम्यक्त्वाद्यौषधम् । एवञ्च वितरत्यसौ शश्वज्जीवनम्। मृत्युञ्जयस्यामोघोपायभूतत्वात्सम्यक्त्वादेः । अतो हि चरणावाप्तिक्रमेण कृत्स्नकर्मसङ्क्षयः । ततश्च परमसौख्य-संवित्तिलक्षणो मोक्षः । न ह्येतत्कल्याणं सम्भवति पित्रोस्तदत्यागे। अतो युक्तः सतां तत्परिहारः, दुष्प्रतिकारत्वान्मातापित्रोः, एवमेव तत्प्रतिकृतिसम्भवाच्च । अतो न वैफल्यं नेयस्ताभ्यां धर्मौषधदापनस्यैषोऽवसरः । तद्वैफल्यं च स्वयं प्रव्रज्यानुपादानात्। एवञ्च मात्रादीनां धर्मवञ्चना । ततोऽपि तेषां दारुणं दुर्गतिदुःखम्,

सैषा क्रूरतैव परमार्थतस्तेषाम्प्रति । अत एवैष धर्मः सतां यत् प्रत्युपकर्त्तव्यौ मातापितरौ ।

ज्ञातमत्र त्रिलोकनाथो भगवान् महावीरः । विज्ञातमनेनातिशयज्ञानेन यथा मत्प्रव्रज्यातो मातापितॄणां दारुणो भविष्यत्यकुशलानुबन्धी शोकः । अतो गर्भगतेनैवाभिग्रहं गृहीत्वा कृतस्तच्छोकनिरोधः । स चाभिग्रह, एवम् - न पित्रो र्जीवतोः प्रव्रजिष्याम्यहम् - इति । एतत्त्वत्रावधेयम् - अवधिज्ञानमता भगवता विज्ञातम्, यथा - भवान्तरे सद्गतिः शुभपरम्परा चैवमेव पित्रोः स्यात्, यदि तयोः शोकनिमित्तं न दीयते । अन्यथा त्वशुभानुबन्धिशोकविह्वलानामकाल-मृत्युयोगादशुभपरम्परैव स्याद् भवान्तरे । एवञ्चानेकभवान् यावद् दुर्लभा स्यात्तयोः सद्गतिः । ततश्च न तयोः प्रत्युपकारः कृतस्स्यात् - इति । एवं यदि भगवताऽपि पित्रोर्भावदया विचिन्तिता, ततोऽपरैः कथं न चिन्तयितव्या सा ?

अत्राप्येतदवधेयम्, यच्चरमतीर्थकृताऽवधिज्ञानेन तथाविधां मात्रादिस्थितिं दृष्ट्वा तादृशमुचितमाचरितम् । भिन्नप्रकारां च तां दृष्ट्वा श्रीऋषभदेवेन भिन्नविधमाचरितमुचितम् । अस्माकं तु भगवदाज्ञाया दीक्षाग्रहणविधिरूपाया अनुपालनमेवोचितम् । एवमेव मात्रादिं प्रति कृतज्ञत्वनिर्वाहः, तत्प्रत्युपकारसम्भवात् ।

## (१३) प्रव्रज्याविधिः

**सूत्र : एवमपरोवतावं सव्वहा, (१) सुगुरुसमीपे (२) पूइत्ता भगवंते वीअरागे (३) साहू अ (४) तोसिऊण विहवोचिअं**

**किवणाई, (५) सुप्पउत्तावस्सए, (६) सुविसुद्धनिमित्ते, (७) समहिवासिए, (८) विसुज्झमाणो महापमोएणं सम्मं पव्वइज्जा लोअधम्मेहिंतो लोगुत्तरधम्मगमणेण ।**

एवं भावतः कस्यापि कमपि सन्तापमनुत्पाद्य, सद्गुरु-समीपमागम्य सम्यगङ्गीकुर्याच्चारित्रम् । न हि गुरु-मन्तरेणाधिगमो ज्ञानस्य । गुरुर्हि मुक्तिमार्गदीपकः । गुरुः प्रत्यक्षं दैवतम् । न हि सद्गुरुं विना क्षणमपि स्थातव्यम् । दीक्षा शिक्षा च सद्गुरुभाव एव सम्भवति, प्रव्रज्याया ग्रहणाऽऽसेवनशिक्षयोश्च गुरुभाव एव भावात् । मा भूत् स्वैरविहारेणोन्मार्गगमनम्, मा भूदनाद्यभ्यस्तमोहप्रयुक्तं छलनम्, एतदर्थमावश्यका विशिष्टसंयमादिगुणालङ्कृतस्य विदितमोह-चिकित्साशास्त्ररूपजिनागमस्य गीतार्थस्य सद्गुरोर्निश्रा । चरणोरीकारस्य प्राक् स्वशक्त्या श्रीवीतरागतीर्थकराणा-मष्टाह्निकादिपूजां कुर्यात् । सत्कारयेत् श्रमणानाहारवस्त्र-पात्रादिवितरणेन । सन्तोषयेद्विभवानुसारेण धनदानेन कृपणादीन् । ततः कायिक्यादिबाधापरिहार-लक्षणमावश्यकम् । ततो मुण्डनं मङ्गलस्नान-मुचितवेषपरिधानमेवंविधमन्यदप्यावश्यकम् । ततः प्रशस्तनिमित्त-योगादीन् प्राप्य प्रव्रजेद् गुरुसमीपे । प्रतिक्रियं गुरुमन्त्रेण गुरुणा समभिवासितोऽत्युत्साहेनानन्देन च विशुद्ध्यमानचित्त उत्तरोत्तरवर्द्धमानशुभभावोल्लासो लोकोत्तर-सम्यग्भाववन्दनादि विशुद्धिपुरस्सरं महता प्रमोदेन लोकधर्मेभ्यः सबलेभ्यो लोकोत्तरधर्मगमनेन प्रव्रजेत्, प्रकर्षेण व्रजेदित्यर्थः।

सहेतुकानीमानि विधानानि । तत्र सामाचार्याद्यनभिज्ञस्य

मुमुक्षोर्गुरोः सकाशादेव तद्विज्ञानयोगः, अतः प्रथमं गुरुसान्निध्याभिधानम् । किञ्च गुरुर्वेत्त्युत्सर्गानपवादाँश्च । अतो तन्निश्रायामेव सम्भवि चारित्रपालनम्, तस्यैव गुरुलाघवालोचनप्रत्यलत्वात् । मा भूदनादिकुवासनाप्रबोधः सहसा कदाचित्, अतः गुरुनियन्त्रणमावश्यकम् । उपबृंहणया संशोधनेन चाराधनास्थैर्य-शुद्धि-वृद्धयो गुरुणैव सम्भवन्ति ।

किञ्च महागभीरमनुष्ठानमिदं प्रव्रज्योरीकारलक्षणम् । यदि चेतरमपि शुभकर्मेष्टदेवतानमस्कारादिरूपमङ्गलपुरस्सरमेव क्रियते, तदा प्रकृते तु किं वाच्यम् ? अतोऽर्हत्पूजाकरणमुपदिष्टम् । तथा गुरावात्मसमर्पणं क्रियते, अतः प्रथमं तत्सत्कारः कर्त्तव्यः, अतस्तदुपदेशः । तथा सर्वजीवगोचरकारुण्यपुण्यता हि चारित्रम् । अतस्तद्ग्रहणात् पूर्वं दीनादिभ्यो दद्याद्दानम् । एतेन हि तादृशानां शुभेच्छायोगात्प्रशस्तभावोल्लासोदयः ।

मा भूद्वर्त्तमाने दीक्षाविधौ कायिक्यादिबाधा, अतः प्रथमत एव तत्परिहरणं न्याप्यम् । मुण्डनं केशोच्छेदः । स च स्मारयति रागादिक्लेशोच्छेदलक्षणं कर्त्तव्यम् । स्नानमपि स्मारयति भावस्नानम् । वेत्ति मुमुक्षुर्यथाऽहं रागाद्युच्छेदपुरस्सरं भावमालिन्यप्रक्षालनाय प्रव्रजामीति । वेषपरिवर्तनं सूचयति हृदयपरिवर्त्तनम् । विस्मारयत्येतत् संसारम् । गृहिवेषो ह्यारम्भसमारम्भपरिग्रहादिभिः सह बाढं सम्बद्धः । तं परिहृत्य मुनिवेषधारणेन सर्वविरतिसंवेदनोदयः । एतदेव संवेदनमनेकधा रक्षति श्रामण्यम् । मुनिवेषेणैव रक्षितः प्रसन्नचन्द्रो राजर्षिः सङ्क्लिष्टादध्यवसायात् । किञ् सुखेनैव परिह्रियन्तेऽनेका

गृहिजीवनकल्पना मुनिवेषमात्रदर्शनेन । एवं साभिप्रायाणि प्रव्रज्याविधौ प्रोक्तान्यावश्यकानि ।

अथ दीक्षाग्रहणे प्रशस्तनिमित्त-तिथि-वासर-नक्षत्र-करण-योग-लग्नादयो द्रष्टव्याः । तेषां शुभभावोल्लासप्रयोजकत्वात् । ततश्च साफल्यसंयोगः । अशुभनिमित्तेष्वारब्धमपि न निष्ठां याति कार्यमिति दृश्यते लोकेऽपि । अतः प्रशस्तनिमित्त-प्रतिपत्तिपुरस्सरं प्रव्रज्याविधिरनुसर्त्तव्यः ।

गुरुहस्तेन ह्यहं दीक्षितोऽस्मीति संवेदनेन प्रह्वीभावयोगः । अतो विध्यादृतिर्न्याप्या । अतः खल्वाज्ञाप्रतिबद्धता । अर्हदादिसाक्ष्यनुभावेन प्रतिज्ञानिर्वाहसूपयुक्तता । किञ्च कल्याणगुरुहस्तदीक्षितत्वे पावित्र्ययोगः प्रवचनप्रभावनासंयोगश्च । नैते लाभा 'संन्यस्त'मित्येतावदुच्चारमात्रप्राप्येति विभावनीयम् ।

मन्त्रिता वासाः पतन्ति मन्मस्तके - इत्येतदवगमेन विशेषत उज्ज्वलः सोत्साहश्च स्याच्चित्ताध्यवसायः । अकल्पनीय-श्चानुभावो मन्त्राणाम् । तथा गुरुणाऽभिमन्त्रिता वासा इत्यवगम उल्लासयति गुरुगोचरं गौरवभावम् ।

प्रव्रज्याप्रतिपत्तिकालीनो हि हृदयभावोल्लासातिशयः समग्रेऽपि संयमजीवने प्रभवति । ततश्च चरितार्थ्यते - सिंहोत्थितः सिंहविहारचारी - इति ।

प्रव्रज्याप्रतिपत्तिर्नाम सम्यग् लौकिकसम्बन्धकर्त्तव्यप्रवृत्ति-व्यवहारादिलोकधर्मपरिहारपुरस्सरं प्रव्रजेल्लोकोत्तरधर्मे । यावज्जीवमङ्गीकुर्याल्लोकोत्तरं धर्ममिति भावः । व्रजेदौदयिकाद् भावात् क्षायोपशमिके भावे । सन्ततमपि भवेद् गुरुप्रतिबद्धः ।

प्रतिपालयेन्महाव्रतानि । सञ्युज्येत् समितिभिः । गुप्तीभूयाद् गुप्तिभिः । परिणमयेदात्मनि क्षमादिधर्मान् । यापयेन्निर्दोषेणैव पिण्डेन । भावयेज्जिनागमान् । सुस्थो भवेत्स्वाध्यायेन । परिपालयेत्पञ्चाचारान् । इत्थञ्च सर्वथाऽपि परस्तात् स्याल्लौकिकजीवनात् । एवं प्रविशेच्छ्रमणधर्मे।

सर्वविरतिप्रतिज्ञया मनोवाक्कायैः कृतकारितानुमोदितैश्च सर्वसावद्ययोगप्रत्याख्यानं क्रियते । तयाऽनुप्रविशति समत्वे। त्यजति सावद्ययोगसक्तिम् । परिहरति रागादिप्रयुक्तं वैषम्यम्। त्रोटयति धनादिना सह सम्बन्धम् । अनुसन्धत्ते गुरुणा जिनाज्ञया संयमेन स्वाध्यायेन त्यागेन तपसा साध्वाचारेण च सह प्रतिबन्धम् । ततोऽपि पञ्चमहाव्रतोच्चारपुरस्सरं विशेषेण कुरुते पञ्चमहाव्रतसम्बन्धम् । तदेतस्मिन् जीवनेऽनुप्रवेशो नाम लोकोत्तरधर्मप्रव्रजनम् ।

## (१४) अनुल्लङ्घनीया जिनाज्ञा

**सूत्र : एसा जिणाणमाणा महाकल्लाणत्ति न विराहिअव्वा बुहेणं महाणत्थभयाओ सिद्धिकंखिणा ।**

**।। इति पव्वज्जागहणविहिसुत्तं समत्तं ।।**

आज्ञा ह्येषा जिनेश्वराणां यदुतैवं प्रव्रजितव्यम् । महाकल्याणकारिणी चैषा । अतो मोक्षाभिलाषी बुधः पुरुषो न विराधयेदेनाम्, महानर्थभयात् । जिनाज्ञाविराधनाद्धि दीर्घदुर्गतिभ्रमणाख्यमहाऽनर्थजन्म । न हि जिनाज्ञाविराधनादपि परः कश्चिदपराधः । नाप्यतः परः कश्चिदनर्थोऽपि ।

जिनाज्ञाऽऽराधनमेव परं हितम् । मोक्षरूपश्रेष्ठकल्याणाभिलाषिणावगन्तव्यमेतद् यन्न जिनाज्ञाराधनादपरः कश्चित्तात्त्विको मोक्षमार्गः । अत एषैवाराधनीया, परिहर्त्तव्या च तद्विराधना । एवं तत्त्वतः प्रव्रज्याग्रहणविध्यर्थसूचकं सूत्रं समाप्तम् ।

## इति तृतीयं सूत्रम्

## अथ
## प्रव्रज्यापरिपालनाभिधं
## चतुर्थं सूत्रम्

### (१) विधिफलम्

**सूत्र : स एवमभिपव्वइए समाणे, सुविहिभावओ किरिआफलेण जुज्जइ । विसुद्धचरणे महासत्ते न विवज्जयमेइ ।**

पूर्वोक्तप्रव्रज्याविधेः सम्यगनुपालनाच्चारित्र्यवाप्नोति सत्क्रियाऽऽत्मकं फलम् । सर्वमप्येतत्प्रागुक्तक्रमेणैवावाप्यते । न हि विधिपूर्वकप्रव्रज्याग्रहणमन्तरेण सम्यक्प्रव्रज्याक्रियावाप्तिः । विधिग्रहणं हि कारणम् । तच्च जनयति स्वकार्यं विधिपालनरूपम् । मुमुक्षुरभूदद्य यावद् गृहिक्रियाविशुद्धिमान् । साम्प्रतं स विशुद्धश्रमणाचारो भवति । यततेऽसौ गुरुनिश्रायाम् । पराक्रमति तपः संयमयोः । सन्निमज्जति स्वाध्याये । परिपालयति सामाचारीम् । धारयति परमं बहुमानं चारित्राराधने । अभिलषति तद्विशुद्धिम् । परिहरति तन्मालिन्यनिबन्धनम् ।

निष्कलङ्कचारित्रो ह्यवाप्नोति स्वास्थ्यसौख्यम् । अलङ्क्रियते नवनवश्रद्धासंवेगसंवेदनैः । मलिनशीलस्तु समापद्यते शङ्काम् । आस्ते दूनचित्तः । भवति हीयमानपरिणामः कलङ्कितताचारश्च । ततश्च भवत्यसौ मन्दश्रद्धः । पतति दुर्ध्यानावर्त्ते । अतो विभावनीयम्, यथा- किमशेषसंसारं परिहृत्य दुष्परिहारश्चारित्रातिचारः ? - इति । एवं विभाव्य प्रयतेत चारित्रविशुद्धौ ।

सुविधिभावतः क्रियाफलेन युज्यत इति यदुक्तम्, तत्रैतदवधेयम् - त्रिविधो ह्यवञ्चकः, योगावञ्चकः क्रियावञ्चकः फलावञ्चकश्च । तत्रासौ मुमुक्षुर्विधिपुरस्सरं गुरुणा गुणेन वा सह योगप्राप्त्या योगावञ्चकः सञ्जातः । अवञ्चको नाम स यो न परं वञ्चयति यश्च न निष्फलतामृच्छति । नियोगतः साफल्यसंयोगीत्यर्थः । क्रिया च प्रकृते फलम् । अतोऽसौ क्रियाऽवञ्चकोऽपि भवति । यदि ह्यस्य गुरुणा सहाद्वेषादिगुणेन वा सह सञ्जातस्तात्त्विको योगः, तदाऽसौ गुरुविनयादिकया तत्त्वश्रवणादिरूपया वा क्रियया संयुज्यत इति भावः ।

न हि गृहादिव्यापारेऽत्यन्तं सक्तस्य गुरुसंयोगो भवति । एवं योगावञ्चकत्वविरहे क्रियाऽवञ्चकत्वस्याप्यसम्भवः । चारित्रगुणप्रतिपत्तिरपि यद्यविधिना विहिता स्यात्, तदा समीचीनयोगावञ्चकत्वविरहात् क्रियाऽवञ्चकत्वस्याप्यभावः । सुविधिप्राप्तचारित्रयोगो हि तत्फलतया प्राप्नोति क्रियाऽवञ्चकत्वम् । ततश्चैकायनतां व्रजत्यस्यात्मा चारित्रानुष्ठानेन सह । एतदवस्थान्तराधिगमार्थमुपायमाह

सूत्रकारः -

वर्द्धमानसमुल्लासो भवति चारित्रप्राप्त आत्मा । वर्द्धन्तेऽस्य जिनाज्ञानुपालनगोचराभिलाषाः, तत्स्पर्द्धयैव च चित्तविशुद्धिः। एवं हि तदैव सम्भवति, यदा कुत्रापि नानादरो भवेत्तस्य, नाप्यश्रद्धा स्यात् । न हि चित्तमालिन्ये सति सम्भवत्यखण्डं चारित्रपालनम् । तन्मालिन्यं च सम्भवति (१) चरणाचरणोत्साह-मान्द्यात (२) स्वजनादिगोचरस्नेहोदयात (३) धनाद्यभिलाषयोगात् (४) सुखशीलत्वपोषणार्थ-मारम्भसमारम्भोदयात् (५) क्रोधादि-वशेनासत्यभाषणात् (६) कथन्नामाभीक्ष्णमवग्रहो याच्यते - इति विचिन्त्यादत्ता-दानाभिलाषकरणात् (७) स्त्रीरूपा-वलोकनाद्यभिलाषात् (८) पूर्वक्रीडितानुस्मरणात् (९) उपकरणबकुशत्वादिदोषानुषङ्गात् (१०) इत्थञ्च विस्मृत्य सर्वविरतिपरिणाममंशेनापि पञ्चमहाव्रतोल्लङ्घनेच्छोदयात् (११) जिनाज्ञाभिहित-प्रवृत्तिनिवृत्तिगोचरवचउल्लङ्घनाभिलषणात् (१२) सामाचार्यां शैथिल्यप्रतिपत्तेः (१३) अन्यतरनिषिद्ध-कार्यप्रवृत्त्यभिलाषाच्च एवं हि मलिनीभवन्ति चारित्रपरिणामः। अतो परिहार्याण्येतन्मालिन्यनिबन्धनानि । वृद्धिं नेया भावविशुद्धिः। उद्यतितव्यं दोषपङ्कप्रक्षालने । त्याज्यमन्यदपि चित्तमालिन्यनिबन्धनम् । तच्चेर्ष्याऽसहिष्णुताऽसद्विषय-जिज्ञासाऽऽकुलताऽहङ्कारेन्द्रियवशवर्त्तिता-क्रोधादिकषाय-आर्त्तरौद्रध्यान-गौरव-शल्याऽऽहारादिसञ्ज्ञा-राजकथादिविकथा-स्वार्थान्धता-कृतघ्नता-ऽनौचित्य-रागादिसङ्क्लेश-परसङ्क्लेशोपेक्षा-अविनय-पवित्रक्रियागोचरानादरखेद -

उत्सूत्रभाषणादि-दोषनिकुरम्बरूपम् । एतत्परिहारेणैव सम्भवत्युत्तरोत्तरचित्तविशुद्धिः ।

किञ्च धारणीयं महासत्त्वम् । तदभावे हि तथाविधकष्टोदये सम्भवेच्चित्तसङ्क्लेशः । एवं विशिष्टत्यागतपोवैयावृत्यप्रत्यलं सामर्थ्यं नोपयुज्येत धर्माराधनायाम् । विघ्नेषु हतोत्साहं भवेच्चित्तम् । नोद्भवेदप्रशस्तविकल्पनिरोधसामर्थ्यम् । न सहनत्वं स्यात्कटुवचनश्रवणे । समुदयस्स्याद्दैन्यस्य । यत्किञ्चिद्गोचरेणापि लोभेन भवेत्प्रतिज्ञातभङ्गः । अत आविर्भावयितव्यं सत्त्वम् ।

एतदर्थमप्यालम्बनीयानि महापुरुषवृत्तानि । विचारणीयम् - लोकेऽपि सात्त्विकेनैव जीयते परवाहिनी । उद्धूलिकोऽपि नान्येषां दृश्यतेऽह्नाय नश्यताम् । लोकोत्तरान्तरङ्गस्य मोहसैन्यस्य तं विना । सम्मुखं नापरैस्स्थातुं शक्यते नात्र कौतुकम् - इति (योगसारे ४ -) । ततश्च यस्यां कस्याञ्चि-दप्यापदि धारणीयं सत्त्वम् । न वशे गन्तव्यं रागद्वेषयोः। अवलम्बनीयं माध्यस्थ्यम् । परीषहसहनं तु धर्म एव श्रमणसिंहानाम्, अत एवार्षम् - मार्गाच्यवननिर्जरार्थं परिषोढव्याः परीषहाः - इति (तत्त्वार्थसूत्रे)

यथा च चरणाराधनागोचरे न विपर्यासमेत्यात्मा तथा यतितव्यम्। मा भूदस्योन्मार्गे मार्गभ्रान्तिः । अत एव पारमर्षम् - जाए सद्धाए णिक्खंतो तमेव अणुपालिज्जा - इति (आचाराङ्गे) तथा विजहित्ता विसोत्तियं - इति (आचाराङ्गे) सन्त्यज्य विस्रोतिकाम् - मार्गस्खलना-मिति ।

एतत्सन्त्यागार्थं विचारयेद्यथा सर्वज्ञोपदिष्टः खल्वयं मार्गः। स्वयमाचरितश्च सर्वज्ञैः । कारिताश्च तैस्तदनुपालनं गणधरादयः । न ह्यत्रान्यथाभावलेशोऽपि सम्भवति । न ह्येतदितरदर्शनवदसर्वज्ञशासनम् । अतो नात्र फलसंशयः कर्त्तव्यः । तथोत्सर्गापवादगोचरमश्रद्धानमपि परिहार्यम् । अहा! बाढं सूक्ष्म उत्सर्गः ! किमेष एवमेव भविष्यतीत्याद्याशङ्का न कार्येत्यर्थः । एवमेतादृशोऽपवादः कथन्न कुर्याद्व्रतभङ्गमेवमपवादगोचरोऽप्रत्ययोऽपि त्याज्यः । मेतार्यमुनिना प्राग्भवेऽस्नानगोचरा जिनाज्ञा न श्रद्धानविषयीकृता । ततश्च चण्डालकुलेऽवाप्तं जन्म । एवं शिवभूतिमुनिनाऽपवादे कृताऽऽशङ्का, ततश्च भ्रान्तेनोद्भावितो दिगम्बरमतः ।

बहुमानाभावेन हि विपर्ययलक्षणा भ्रान्तिर्भवति । अतो धर्त्तव्यो बहुमानप्रकर्षश्चारित्रे । श्रूयते सौगतेन प्राग्गृहीता जिनदीक्षा । ततश्च तपःपरीषहसहनादावबहुमानात्त्यक्ता सा। स्वच्छन्दं भुक्त्वा पीत्वा च ध्यानं करणीयमित्याद्याचारमयो मध्यममार्गो माध्यमिकबौद्धधर्मः प्रवर्त्तितः । न तु ज्ञातमनेन यत्त्यागतपःप्रभृत्यभ्यासमन्तरेण दुर्घटमिन्द्रियमनोनियन्त्रणम्, तदन्तरेण चासम्भवी शुभध्यानोदयः ।

रागोद्रेके सति तथा भवति विपर्ययः, यथा प्राप्नोति जीवश्चारित्रभ्रंशम्, अरणिकमुनिवत् । अतो निराकर्त्तव्यो रागः प्रयत्नतः ।

किञ्चानेकप्रकारो भवति विपर्ययः । (१) यथेन्द्रिय-विषय-कुमत-सत्कारादिकेषूपेक्षणीयेष्वप्युपादेयमतिः (२) कर्मक्षयोपाय-

भूतेष्वपि साध्वाचारेषु कष्टबुद्धिरनिष्टा एत इतिमतिश्च ।

न च सम्प्राप्तचारित्र आत्मा विपर्यमेति । न प्रहृष्यत्यसौ मनोज्ञविषयादिकं प्राप्य । नोद्विजति प्राप्याप्रियम् । न सन्त्रस्यति परीषहादितः । न स्मरति गृहिभावानुभूतं सौख्यम् । न गणयति मानापमाने । विचिन्तयत्यसौ - यथेन्द्रियसुखं दुःखसन्दोह-निबन्धनम् । समग्रदुःखान्तकरं तु चारित्रमेव । तत्प्राप्य किन्नु ममानुशोचनम् ? - इति । जानात्यसौ नरकनिगोदादिभवं दारुणं दुःखम् । वेत्ति च तदुद्धारोपायतया चारित्रम् । प्रत्येति सारणादिकं मुनिजनवात्सल्यत्वेन । न स्पृश्यत एष मिथ्याविकल्पेन । भावनीयानि विपर्यासविगमे मेघकुमारार्द्र-कुमारप्रभृतिवृत्तान्तानि । यद्वाऽनतिपुष्टालम्बनेऽपवादसेवनमति-रूपोऽप्यवगन्तव्यो विपर्यासः । यथा - यदि सन्मत्यादिशास्त्रा-ध्ययनार्थमाधाकर्माहारोऽनुज्ञातः, तदाऽस्माकमप्यस्त्वेषोऽध्यय-नार्थम् - इत्यादि । भावनीयमत्र विकृतिलाम्पट्यलक्षणविपर्यास-वृत्तमार्यमङ्गोः ।

यद्वा विपर्यास एवम् (१) किमेतच्चारित्रं मोक्षकारणं भविष्यति? परे तु - ज्ञानवैराग्याभ्यां मोक्ष इत्याऽऽस्थिताः अतो नैतानि चरणाचरणकष्टानि सहितव्यानि - इति । (२) यद्वाऽहो चरणक्रियाविस्तरः । अगण्याः खल्वत्र सूक्ष्मतरा। मुद्राः। सुदीर्घः पञ्चाचारप्रपञ्चः । तदेनं विमुच्यापवादमार्ग एव निषेव्यः, तस्यापि शास्त्रोक्तत्वात् - इति । (३) यद्वा कातराणां स्वल्वयमपवादमार्गः । मोक्षस्त्वेकान्तोत्सर्गमार्गमात्रप्राप्य इति ।

नैनमपि विपर्यासमेति चारित्री । (१) सम्यग्दर्शनज्ञान-चारित्राण्येव मोक्षमार्गः, ज्ञानक्रियाभ्यां मोक्षः, इति सिद्धान्त-संवेदनसम्पन्नत्वात्तस्य । यदि त्वसंयमसञ्ज्ञावशत्वादिकं विद्यमानं स्यात्, तदैकाकी विरागः किं कर्तुं शक्नुयात् । प्रतिज्ञाप्रयुक्त-चारित्रे सति संयमक्रियासु सत्सु च विरागवृद्धिक्रमेण वीतराग-भावोदयसम्भवः, नान्यथा । किञ्च तात्त्विको विरागस्त्याजय-त्येवाचारित्रमयं गृहवासम् ।

(२) स्वरसानुभावेन हि गृहादिक्रियासु न प्रतिभासते कष्टम् । अतो विपुलेन स्वरसेन कर्त्तव्याश्चारित्रक्रियाः । न ह्यसत्क्रियासत्काः प्रबलाः संस्कारा विशिष्टस्वरससचिवां सत्क्रियामन्तरेणापनेतुं शक्याः । सूक्ष्मतराश्चरणमुद्रा अपि महाव्रतसंरक्षणार्थाः । पञ्चाचारप्रपञ्च आत्मानं ज्ञानादिभावितं विधत्ते । न ह्यनेन विना ज्ञानाद्येकायनीभावः सानुबन्धतां प्रापयितुं शक्यः ।

(३) अपवादस्तूत्सर्गरक्षार्थं भवति, न तूत्सर्गोन्मूलनार्थम् - इतिविभावनेनापगच्छत्यपवादमात्रपक्षपातः । एवमुत्सर्गमात्रा-ऽऽग्रहोऽप्यसन्, तथाविधद्रव्यादौ सर्वभ्रंशप्रसक्तेः, असमाधि-प्रसङ्गाच्च । तत्रापवादसेवनमुत्सर्गाऽऽचरणसमानोद्देशं भवति। रत्नत्रयीसमाधिर्ह्यपवादोद्देश इति हृदयम् । अत एवोच्यते लोकेऽपि - सर्वनाशे समुत्पन्ने, अर्धं त्यजति पण्डितः । अर्धेन कुरुते कार्यं, सर्वनाशो हि दुस्सहः - इति ।

शास्त्रज्ञान - सद्गुरु-मार्गानुसारिसन्मतिलक्षणं त्रितयं सर्वत्रापि विपर्यासज्वरशमनीयम् । विपर्यासविरह एवेष्टसिद्धि-

रिति यदुक्तं तत्सामान्यतोऽवगन्तव्यम् । विशेषतस्तु सामग्र्य-पीष्टसिद्धेरावश्यका । किन्तु तत्र प्रवृत्तिरपि विपर्यासविगम एव सम्भवतीति ध्येयम् ।

**सूत्र : एअअभावे अभिप्पेअसिद्धि उवायपवित्तिओ । नाविवज्जत्थोऽणुवाए पयट्टइ । उवाओ य साहओ नियमेण । तस्स तत्तच्चाओ अण्णहा, अइप्पसंगाओ । निच्छयमयमेवं ।**

उक्तरीत्या प्रव्रज्यापरिपालनकाले यदि विपर्यासं न गच्छति, प्रवर्त्तते च चरणोपायेषु, तदा परमार्थचरणपालनं मोक्षलक्षणं च तदिष्टफलं सिध्यति । यत्किञ्चिद्विपर्यासभावे तु बाह्य चरणमात्रं स्यात्, न तु परमार्थोपाये प्रवृत्तिः, यथा विधिविपर्यासे विनयविकलत्वादिलक्षणे सति शिक्षाग्रहणमपि न भवति परमार्थ-चारित्रोपायः । अतस्तस्यां शिक्षायामुपायत्वायोगः । तामासेव-मानश्च पुरुषो विपर्यस्त इत्युच्यते ।

अविपर्यस्तस्तु न प्रवर्त्तत उपायाऽऽभासरूपेऽनुपाये, सत्साधनमात्रप्रवृत्तत्वात्तस्य । अभिमतफलसदुपायमवगम्य तत्र प्रवृत्तिरेवाभ्रान्तत्वलक्ष्म, त एवेष्टफलनिष्पत्तिश्चेत्याकूतम् ।

उपायस्तु साधयत्येवेष्टकार्यम् । परमार्थोपायेन नियोगतः फलप्रसूतिरिति भावः । यदि तु नास्य विद्यते कार्यजननसामर्थ्यम्, तदोपायत्वमेवास्यानुपपन्नम्, उपेयसाधनत्वलक्षणस्वान्वर्थविकल-त्वादस्य । एवं सत्यपि चेदसावुपायत्वेनाभिधीयते, तदाऽति-प्रसङ्गः, यत्किञ्चिद्-वस्तुन उपायत्वप्रसक्तेः, अभिमता-साधकत्वाविशेषात् । एवं च विकथादेरपि चारित्रोपाय-त्वमभ्युपगतं स्यात् । न चैवमभ्युपेयते, अतोऽविधिकलङ्कित-

शिक्षाग्रहणादेरपि चारित्रानुपायत्वमवगन्तव्यम् ।

ननु चाभ्यासदशायामविधियुक्तमपि शिक्षाग्रहणमुपादीयते, तत्रोपायत्वभिमतमेवेति चेत् ? सत्यम्, किन्तु व्यवहारदृशा, प्रकृतवक्तव्यता तु निश्चयनयमता, सूक्ष्ममतिगम्या चैषा । न हि फलानुत्पादक उपायः, परेषामपि तत्त्वप्रसक्तेः, न हि साध्यमसाधयत् साधनमुच्यते । यथा न रागदशा वीतरागावस्था-हेतुतामृच्छति, असक्तदशाया एव तत्तालङ्कृतत्वात् । न च प्रीतिभक्तिवचनानुष्ठानान्यप्युपायभूतानि, रागदशात्मकत्वात् । अपि त्वसङ्गानुष्ठानमेवोपायभूतं वीतरागत्वस्य । रागस्तु प्रतिबध्नाति वीतरागभावम् । कथमेष तत्कारणतया वक्तुमुचित इति ।

नन्वेवं प्रीत्याद्यनुष्ठानान्यनाराधनीयानीत्यायातमिति चेत्? न, व्यवहारनयेन तदाराधनाया अप्युपयुज्यमानत्वात् । न हि वीतरागत्वप्रयोजकः सर्वरागोच्छेदो धनादिगोचररागापगममन्तरेण सम्भवी । अतस्तदपगमार्थं जिनादिगोचररागप्रतिष्ठाऽऽवश्यका। एवं हि तदुपासनयोच्छिद्यतेऽप्रशस्तरागः सम्पूर्णतया । ततोऽपि क्रमेण वीतरागप्रणिधानप्रकर्षप्राप्तेरुदेत्यसङ्गानुष्ठानम् । ततश्च करतलगतं वीतरागपदम् । इत्थञ्च प्रीत्याद्यनुष्ठानानि निबन्धन-भावं प्रतिपद्यन्तेऽसङ्गानुष्ठाने । अत उपादेयान्येतान्यपि ।

ननु चैवं निश्चयनयेनाप्येतान्युपायतयैव मन्तव्यानीति चेत्? न, तस्य सूक्ष्मदृक्त्वात् । एष हि तदेव कारणतया मन्यते, यन्नियोगतः कार्यकृत्स्यात् । एवं निश्चयदृष्टिं सम्प्रधार्य व्यवहाराऽऽदरेण प्राप्यते निश्चयाभिमत उपायः । तत्प्रापको व्यवहार एव तात्त्विकः । अतो विमुच्य विपर्यासं विधिपुरस्सर-

माराधना कर्त्तव्या ।

नन्वेवमविधिलेशलक्षणविपर्यासयोगेन प्रतिलेखनादिक्रिया-वैफल्यं स्यादिति चेत् ? न, यद्यपि निश्चयदृशा सा क्रिया नोपायभूता, नापि शुद्धव्यवहारदृशा । तथापि प्रथमत एव शास्त्रोक्तं सर्वथा शुद्धं विधिपालनं दुर्लभम् । तत्तु क्रमेण सिध्यत्यभ्यासवशात् । अतो निर्दम्भेन प्रगुणेन हृदयेन लक्षीकृत्य शुद्धव्यवहारं तथाविधशक्तिबोधविकलत्वेनाशुद्धव्यवहारप्रवृत्तिः क्रियते, सापि शुद्धव्यवहारप्रवृत्तिकारणं भवति, उक्तञ्च - अशुद्धाऽपि हि शुद्धायाः, क्रिया हेतुः सदाशयात् । ताम्रं रसानुवेधेन स्वर्णत्वमधिगच्छति - इति (अध्यात्मसारे)। एवमेव सिद्धिं गता अनन्ता जीवाः । अतो व्यवहारनयेन शुद्धानुष्ठान-कारणभूतमशुद्धमप्यनुष्ठानमुपाय एवोच्यते । विधिपालनपक्ष-पातोऽविधिगोचरहेयमतिरविध्यनुशयस्तु तत्राप्यावश्यक इति ध्येयम्, इत्थमेव तत्र शुद्धक्रियाहेतुत्वनिर्वाहात् । विपर्यासोदये त्वविधिलक्षणं हेयमेव प्रतिभासत उपायतया । ततश्चोपाया-ऽऽभासप्रवृत्तैर्वैफल्यमृच्छति तत्क्रिया ।

अथ (१) कार्यजननं यतो भवति, तच्चरममेव कारणमस्तु, न तु पूर्वतनम् । (२) यद्वोपायोऽपि कश्चित्सामग्रीविरहे न साधयत्युपेयम्, ततश्च तदुपायत्वायोगः । (३) यद्वा शुद्ध्य-नुभावेनैव कार्यजननाच्छुद्धिरेवोच्यतां कारणतया, न तूपाय इति ।

अत्रोच्यते । (१) तज्जनकजनकत्वेन प्राक्तनान्यपि व्यवहारेण तत्कारणानि व्यपदिश्यन्ते । यथा गृहादिरागापगमे

प्रयोजकतया वीतरागरागः सर्वथाऽनासक्तभावहेतुः । विलोकनीयमत्र नागकेतुवृत्तान्तम् । (२) यद्यपि सुक्षेत्रादिसामग्रीवैकल्यादनिष्पत्तिर्धान्यस्य, नैवं बीजस्य धान्योपायत्वमपास्यते, सामग्रीयोगे तस्यैवोपेयसाधकत्वात्, एवं प्रकृतेऽपि द्रष्टव्यम्। किञ्चोपायसम्पादकोऽप्युपायतयैव व्यपदिश्यते । यथा मङ्गलं विघ्नविनाशहेतुतया कार्यसिद्ध्युपायोऽभिधीयते । (३) तथा गुरुयोगश्चारित्र-शुद्धिनिबन्धनम्, गुरुविनयवाचनाग्रहणाऽऽसेवनशिक्षादिहेतुत्वात्, तदन्तरेण तदसम्भवात् । न हि श्रमणभगवान्महावीरयोगेन विनेन्द्रभूतेश्चारित्रप्राप्त्यादिकमभविष्यदिति विचारणीयम् ।

शुद्धो ह्युपाय उपेयसाधकः, अतो न शुद्धिमात्रम्, अपि तु शुद्धोपाय एव हेतुतया मन्तव्यः । निराधारायाः शुद्धेरवस्थानासम्भवात् । शुद्धज्ञानेन यथा पण्डितो व्यपदिश्यते, न तु शुद्धिमात्रात् । किञ्चाशुद्धिभावेऽपि व्यवहारतस्तूपाय उच्यतेऽपीति प्रागुक्तमनुसन्धेयम् ।

परिहृत्य विपर्यासमवलम्ब्य महासत्त्वं वर्द्धमानपरिणामेनाऽऽराध्यमानं चारित्रमवश्यं प्रयच्छति प्रव्रज्याफलमित्यत्र निष्कर्षः।

## (१) समत्वादिसाधनम्

**सूत्र : से समलेट्टुकंचणे, समसत्तुमित्ते निअर्त्तग्गहदुक्खे, पसमसुहसमे, सम्मं सिक्खमाइअइ ।**

समभावो भवति श्रमणस्य लेष्ठौ सुवर्णे च । नास्योपादेयमतिरुदेति सुवर्णादौ, नापि हेयमतिर्मृत्तिकादौ । किञ्च

समशत्रुमित्रो भवत्यसौ । न रिपुगोचरो द्वेषोऽस्य, नापि मित्रविषयो रागः ।

ननु वीतरागस्यैव सम्भवतीदं समदर्शनम्, न तु दीक्षितमात्रस्येति चेत् ? न, गुणेषु दोषेषु वाऽवस्थावैचित्र्यसम्भवात्। परमं हि समदर्शनं वीतरागे, इतरत्तु श्रमणेऽपि सम्भवति । एतदभ्यासेनैवावाप्यत उत्कृष्टो गुणः । अत एतद्भ्यासे यतितव्यम्। तद्यत्नतो हि सिध्यत्युत्तरोत्तरविशुद्धः समभावः । अतो भावनीयमनित्यं पुद्गलस्वरूपम् । विचारणीया विष्टायामपि स्वर्णपरिणामपरिणतिः । एतद्विमर्शेनैव न लुब्धः कोटिद्रव्ये वज्रस्वामीति स्मर्त्तव्यम् । समशत्रुमित्रभावेन हि जिगाय मोहं स्कन्दकमुनिः । शत्रुरपि मित्रतां प्रयाति, मित्रमपि च शत्रुतामिति कौ न्वेतयो रागरोषाविति विचिन्त्यम् ।

तथा दीक्षित आत्मा (१) निवृत्ताऽऽग्रहदुःखो (२) निवृत्ताऽग्रहदुःखो (३) निवृत्तग्रहदुःखश्च भवति । तत्र (१) न ह्यसद्गोचर आग्रहो भवति मुनेः । आग्रहो नामाहङ्कारलोभादिप्रसूतोऽतत्त्वाभिनिवेशः । एष एव दुःखम्, आत्मपीडाप्रयोजकत्वात्, दुःखसन्दोहनिबन्धनत्वात् । संवेत्ति श्रमणः, यथा कदाग्रहेण पुष्यते मदः, वञ्च्यत आत्मा सन्मार्गगमनात्, जन्यन्तेऽनेककुविकल्पा दुर्ध्यानविशेषाश्च ।

को नामाल्पपुण्यस्याऽऽग्रहः । सुखं हि पुण्यावाप्यम् । न हि मूल्यदानं विनावाप्यते कुत्रापि क्रयाणकम् । पराधीनो हि वर्तते जीवोऽनन्तकर्मपुद्गलानाम् । न हि परतन्त्रस्य क्वाप्याग्रहः सङ्गतिमङ्गति । न ह्यवशस्य-सम्माननीयमेवाहम्, मन्तव्य-

मेवापरैर्मद्वचः - इत्याद्याकारकोऽभिनिवेशः शोभास्पदतामृच्छति। किञ्चैवमभिनिवेशः पुण्यमान्द्ये सतीष्टासिद्धेः प्रसूते तीव्रं सङ्क्लेशम् । एवं क्रोधमायाद्याग्रहोऽप्यसन् व्यर्थश्च । पुण्योदय-विरहाद्यदा तदाग्रहो मुधा भवति, तदा निन्दति तद्वान् लोकम्, यथा स्तब्ध एषः, न शृणोति कस्यचित् किञ्चिदिति ।

तथा मिथ्याविकल्पाऽऽग्रहणे मार्गभ्रंशोऽपि स्यात्, यथा जमालेरभवत् । संस्तारको हि क्रियमाणः कृत इति न तेनाऽऽग्रहवशतयोरीकृतम् ।

(२) अग्रहोऽज्ञानम् । एतदपि महद् दुःखम्, असद्वि-कल्पोदयव्यर्थव्याकुलत्व-कर्मबन्धादिनिबन्धनत्वात् । अतो मुनिः प्राप्नुयात् सम्यग्ज्ञानम्, विहरेद् गीतार्थनिश्रया । ततोऽस्य न सङ्क्लेशसम्भवः । तथा यावज्ज्ञानं कर्मोदयान्नोदेति, यावानग्रहो भवति, तद्धेतुकमपि न शोकं कुर्यात् । किन्तु सम्यग् विषहेताज्ञानपरीषहम् । जिनाज्ञानुसरणमेव मम कर्त्तव्यम्, पूर्वबद्धज्ञानावरणकर्मोदयतितिक्षा चेति विचारणीयम् । भावनीयमत्र यवराजर्षिवृत्तम्, उत्तराध्ययनतुर्याध्ययनाधीतौ द्वादशसंवत्सरान् यावदाचामाम्लकृन्मुनिदृष्टान्तं च ।

(३) ग्रहः परिग्रहः पूर्वग्रहो व्युद्ग्रहो वा । एषोऽपि महत्कष्टम् । परिहर्तव्य एष श्रमणेन । अर्थानामर्जने दुःख-मर्जितानां च रक्षणे । आये दुःखं व्यये दुःखं धिगर्थं दुःखभाजनम् - इत्यादिना परिग्रहप्रयुक्तं दुःखं प्रसिद्धमेव । विचिन्त्यमत्र रत्नाकरसूरिज्ञातम् । पूर्वग्रहोऽप्युरीकारयति चारित्रशैथिल्यम्। आर्यरक्षितसूरिपितृमुनिवृत्तं ज्ञातमत्र ।

एवं व्युद्ग्रहदुःखमप्यवगन्तव्यम् । केनचिद्व्युद्ग्राहितो ह्यबहुमानं प्रतिपद्यते गुर्वादौ, ततश्च चारित्रशैथिल्यं तद्भ्रंशं वाऽवाप्नोति, चिन्त्यमत्र सिद्धर्षिगणिवृत्तान्तम् ।

तथा प्रशमसुखसमेतो भवति श्रमणः, ग्रहाग्रहग्रहविमुक्ततया विमुक्तमोहत्वेन कषायोदयरहितत्वात् । क्रोधादयो हि दुःखम्। तदभावो हि सुखम् । अहङ्कारतृष्णालक्षणः क्षयरोगः क्षिणोत्यात्मनः प्रशमसुखम् । मारयति भावप्राणापहारेण । क्रोधादिविरहितावस्थाविशेषो हि प्रशमः । उक्तञ्च - क्रोधाद्यबाधितः शान्तः - इति । एतत्परिणतौ न कस्यचिदपि सामर्थ्यं हृदयोदधिक्षोभाऽऽपादने । भावनीयमत्र नमिराजर्षिवृत्तम्। एवंविधगुणसम्पत्सम्पन्नो मुनिः कीदृशो भवेदित्याह -

**सूत्र : गुरुकुलवासी, गुरुपडिबद्धो, विणीए भूअत्थदरिसी, 'न इओ हिअं तत्तं' ति मन्नइ ।**

उक्तगुणो मुनिः सम्यग् गृह्णाति ग्रहणशिक्षामासेवनशिक्षां च । एतदर्थं समुपासते गुरुकुलवासम् । सुविहितगच्छ उषित्वा तन्मुद्रानतिक्रमपरो भवतीत्यर्थः । ततश्च भवत्यस्य ज्ञानादिलाभः, यत् पारमर्षम्-णाणस्स होइ भागी, थिरयरओ दंसणे चरित्ते य । धण्णा आवकहाए, गुरुकुलवासं न मुंचंति - इति नातोऽपि परः कश्चिदाराधनीयः, नातो परं किमपि हितकृत्, अत एवोक्तम् - एसा च परा आणा पयडा जं गुरुकुलवासो न मुत्तव्वो - इति (पञ्चाशके) न हि गुरुकुलवासे स्वैरतावकाशः, ततश्च सुखेन भवति दौर्बल्यं मोहस्य । यद्यपि कदाचित् कर्मवैचित्र्यादुदेति मोहः, तथापि रक्ष्यत आत्मा गुरुकुलवासानु-

भावेन, भावनीयमत्र वंशगहनदृष्टान्तम्, यथा - यद्यपि निर्गतभावस्तथाप्यसौ रक्ष्यते सद्भिरन्यैः । वेणुर्विलूनमूलोऽपि वंशगहने महीं नैति - इति। गुरुकुलवासे हि लज्जया भयेन सदालम्बनेन वाप्युपशाम्यन्ति मोहवृत्तयः । प्राप्यते सम्यज्ज्ञानादिकम् । ततश्च नियोगतो निकटीभवति मुक्तिः ।

गुरुकुलविरहितस्य ह्यष्टावपाया भवन्ति । (१) नासौ विधिपुरस्सरं गुरोः सकाशादवाप्नोति शिक्षाम् । आचारप्रथमसूत्रे सुधर्मस्वाम्यप्याह - सुअं मे आवसंतेण भगवया एवमक्खायं - इति । न हि गुरुकुलवासमन्तरेण सज्ज्ञानयोग इति तात्पर्यम्। (२) नैकाकिनो वैयावृत्यगुणयोगः । (३) नैकस्य विशिष्टतपः प्रभृतिनिरतमुनिसत्कमालम्बनं स्यात् । (४) उपद्रवन्त्यधमपुरुषा एकाकिनम् । (५) एको ह्याकृष्यते महिलागणं प्रति । (६) एकाकिनं सुखेन विलोभयन्ति स्त्रियः (७) सम्भवत्येकाकिनि मिथ्यात्विनामाक्रमणम्, स्वान् प्रति तदाकर्षणं च । (८) अनुचितेनोत्सर्गादिगोचराऽऽग्रहेणात्मविराधनादिकल्मषकलुषितो भवत्येकाकी । एवं रोगादावप्येकाकिनो विराधना द्रष्टव्या । तदार्षम् - कत्तो इक्कस्स धम्मो सच्छंदगइमइपयारस्स ? । किं वा करेउ इक्को ? परिहरउ कहमकज्जं वा ।। कत्तो सुत्तत्थागम पडिपुच्छण सुणणा य इक्कस्स । विणओ वेयावच्चं आराहणया य मरणंते ? ।। पिल्लिज्ज एसणं इक्को पइण्णपमयाजणाओ णिच्चभयं । काउमणो वि अकज्जं न तरिज्ज काउं बहुमज्झे ।। उच्चारपासवणवंतपित्तमुच्छाइ खोहिओ इक्को । सद्दवभायणविहत्थो, णिखिविज्ज करिज्ज

वा उड्डाहं ।। सव्वजिणपडिकुट्ठो अणवत्था थेरकप्पभेओ वा । इक्को सुआउत्तो वि हणइ तवसंजमं अइरा - इति (उपदेशमालायाम्) ।

अषाढभूतिराचार्यो हि गच्छविमुक्ततया दिव्यनाटकप्रेक्षणार्थं षण्मासान् यावत् स्थितः । ततोऽप्येकाकिनं बालं दृष्ट्वा तत्स्वर्णालङ्कारलोभेन तं व्यापदयित्वा गृहीत्वा विभूषणानि चचाल न हि गुरुकुलवासे सति लज्जातोऽपीदृशमकार्यं स्यात् । अतो न मोचनीयो गुरुकुलवासः ।

तथा श्रमणो गुरुप्रतिबद्धस्स्यात् । सर्वथाऽपि तदेकानुस्यूतस्तद्गोचरबहुमानप्रकर्षसमनन्वितश्चेति भावः । यथा - अहो भीमभवोदधितारकोऽयं महोपकारको गुरुः । अहो त्रिलोकीसाम्राज्यादप्यधिकदाताऽयं गुरुः - इत्यादि । एवं विचार्य बहुमानप्रकर्षं विशिष्टपक्षपातं च गुरुगोचरं धारयत्येषः । न च श्वासोच्छ्वासनिमेषोन्मेषादिका अपि क्रियाः करोत्येष गुर्वनुज्ञामन्तरेण ।

गुरुविमुखस्यापायाः - (१) कृतज्ञतागुणच्युतिः (२) गुरुकृतसारणाद्यसहनम् (३) गुर्वाशाताना तदाज्ञोल्लङ्घनादिकं वा (४) आत्मप्रशंसातो गुरोरप्यधिकोऽहमिति प्रदर्शनप्रयत्नः (५) गुर्वभिप्रायामार्गणम् (६) सिंहगुफावासिमुनिवद् दुःसाहससम्भवः (७) बहुमानविरहेणाहङ्कारवृद्ध्या ज्ञानावरणादिकर्मबन्धः । एवञ्च गुरुविमुखस्यान्या विद्यमाना अप्याराधना विफलाः स्युः । गुरुबहुमानतो मृगावती - चण्डरुद्राचार्यशिष्य - पुष्पचूलादयः कैवल्यं प्राप्ताः, अतोऽत्र यतनीयम् ।

तथा विनीतः - अभ्युत्थानादिकायादिविनयपरो भवति श्रमणः । सदाप्येष तत्परस्स्याच्छुश्रूषादौ । हर्षेण स्वीकरोत्येष गुर्वाज्ञाम् । इङ्गितादिनाप्यवगच्छति गुरोरभिलाषम् । संवेत्त्येषः - विणयमूलो धम्मो - इति ।

गुर्वविनयप्रयुक्तमपायषट्कम् - (१) औद्धत्य-प्रयुक्तकालुष्यम् (२) मदपोषः (३) सुखशीलत्वप्रयुक्तः कर्मबन्धः (४) विनयप्राप्य-गुणाभावः (५) प्रवचनहीलना (६) दुर्लभबोधित्वं च । अन्यतीर्थिका अपि कुर्वन्ति विशिष्टं गुरुविनयम्, मुनेरविनयं दृष्ट्वा त उद्भावयन्ति जिनशासनमालिन्यमिति । किञ्च पञ्चाशत्सहस्रकेवलिगुरुर्द्वादशाङ्गीस्रष्टा प्रथमो गणधरो गौतमस्वामी स्वयं ज्ञानचतुष्टयोपेतोऽपि चकार परमं गुरुविनयम्। अतस्तदालम्बनेनास्माभिरपि कर्त्तव्य एवैष शोभनतयेति ।

तथा भूतार्थदर्शी भवति श्रमणः । भूतार्थो नाम तत्त्वरूपः पदार्थः । तद्दर्शीति तदुपासनैकलक्ष्यः, प्रकृते तत्त्वभूतः पदार्थ एषः, यथा - न ह्येनं गुरुकुलवासं विनाऽन्यद्धितकरं वस्तु नामेति । एवंविधदर्शनमप्यस्य जिनाज्ञानुसारित्वात् । जिनाज्ञा च यथोपदिशति गुरुकुलवासम्, तथा प्रागुक्तमेव ।

अपरोऽपि भवत्यर्थोऽयं भूतार्थदर्शिनः, यथा तत्त्वमात्र-विश्रान्तदृष्टिस्स्यान्मुनिः । नैतन्मनस्यनुप्रविशन्त्यतत्त्वकल्पनाः। एकान्तवादः सर्वथा नित्यत्वरूपो ऽनित्यत्वरूपो वाऽतत्त्वम् । आत्मनो जगद्व्यापित्वं हिंसामययज्ञेन स्वर्गसाधनमित्या-द्यप्यतत्त्वम् । तत्त्वभूता हि दानशीलतपःप्रभृतयः । अतत्त्वभूतास्तु

परिग्रहविषयसेवनस्वच्छन्दाहारादयः । परोपकारस्तत्त्वभूतः। अतत्त्वभूता तु स्वार्थान्धता । तत्त्वभूतान्यहिंसादिधर्मस्थानानि। अतत्त्वरूपाणि तु हिंसादिपापस्थानकानि । तत्त्वभूता ज्ञानादिक्षायिका धर्माः । अतत्त्वभूतास्तु ऋद्ध्यादिगौरवप्रभृतय औदयिका धर्माः ।

तदेतानतत्त्वभूतानवगणय्य तत्त्वैकोपासनापरोभवति श्रमणः। विस्मृत्य देहमात्ममात्र विश्रान्तमस्य लोचनम् । आत्मविशुद्धिं मार्गयत्येषोऽनवरतम् । अन्वेषयति ज्ञानादिपर्यायवृद्धिमभीक्ष्णम्। प्रयतते शुभध्यानाय । पराक्रमते तपःकर्मणि । उपेक्षते देहपरिकर्माणि । विचारयत्यङ्गस्यानित्यभावम् । भावयति देहार्थकृतपापप्रवृत्त्याहितकुवासनाभिः प्रतिभवमात्मनो दारुण-दुःखविडम्बनागोचरीकरणम् । एवं विविच्य तत्त्वातत्त्वेऽवलम्बते तत्त्वमेव ।

उदधिनिमज्जितः कश्चिद्यथाऽवलम्बतेऽनन्यशरणतया यानपात्रम्, तथा भूतार्थदर्शी श्रमणः सेवते गुरुकुलवासम् । भवत्यसौ गुरुप्रतिबद्धः । उद्यच्छति तद्विनये । विचारयत्येषः - नेतोऽपि परं किञ्चिद्धितम् - इति ।

**सूत्र : सुस्सूसाइगुणजुत्ते तत्ताभिनिवेसा विहिपरे परमंतोत्ति अहिज्जइ सुत्तं बद्धलक्खे आसंसाविप्पमुके आययट्ठी ।**

गुरुशुश्रूषादिगुणगणालङ्कृतस्तत्त्वैकाऽऽग्रहो विधितत्परः श्रमणोऽध्येति सूत्रम् । ततश्च विजानात्यधिकतरं सर्वज्ञोक्तं तत्त्वं तदुपदिष्टं मार्गं च । तथा श्रुतोपयोगसातत्येन निरुणद्धि पापविकल्पान्, रक्षत्यात्मानं दुर्ध्यानात् । शुश्रूषादयो बुद्धिगुणाः,

यथा -

**शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा ।**

**ऊहोऽपोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ।** इति

तत्त्वज्ञानाधिगमार्थमाराधनीया एते गुणाः । तत्र शुश्रूषा - तत्त्वश्रवणार्थं तीव्र उत्सुकभावः । **श्रवणम्** - जिज्ञासासचिवं गुरुमुखेन तत्त्वश्रवणम् । श्रवणाभावे श्रवणोपयोगाभावे वा तत्त्वाधिगमोऽसम्भवीति । **ग्रहणम्** - प्रयत्नपुरस्सरं श्रुतार्थप्रतिपत्तिः । **धारणा** - प्रतिपन्नार्थस्य मनसि सम्यग् धारणम् । **ऊहः** - धारितार्थवितर्कणपुरस्सरमन्वयदृष्टान्तगवेषणा । **अपोहः** - व्यतिरेकनिदर्शनमार्गणम् । **अर्थविज्ञानम्** - ऊहापोहावधारितार्थस्यासन्दिग्धबोधः । **तत्त्वज्ञानम्** - तत्त्वसिद्धान्तं विनिश्चित्याऽऽदरेण सह तत्पक्षपातः ।

अत्र वृत्तिकृता धारणानन्तरं विज्ञानोपन्यासः कृतः । तत ईहा गृहीता । तत्रेदं तात्पर्यम् - अवधारितविप्रकीर्णपदार्थानां क्रमशः साङ्गोपाङ्गं क्रियमाणाऽधिगतिर्विज्ञानम् । ततश्च तद्गोचरा सम्भवतीहा - अनुकूलविचारणा ।

एवमष्टधीगुणोपयोगेनैव सम्भवति सम्यक् तत्त्वविनिश्चयः। अतः प्रकर्षतस्तत्त्वपक्षपातमवलम्ब्य विधिना विदध्यात्सूत्राध्ययनम् । उपदिष्टो द्वितीयसूत्रेऽसदभिनिवेशत्यागः । अत्र तु तत्त्वाभिनिवेशः प्रतिपादितः । एतदन्तरेणोद्भवत्युत्सूत्रभाषणकल्मषम्, उन्मार्गोपदेशकिल्बिषं च । तत्त्वाभिनिवेशे सति मन्यते जीवः - तत्त्वमेव सारभूतं विश्वेऽपि विश्वे । शिष्टं तु सर्वमप्यसारम्।

तत्त्वमेव विधत्ते भावप्राणपरिपुष्टिम् । विकासयति प्राज्ञभावम्। विशोधयति चेतः । अतो विधेयस्तदधिगमे यत्नः ।

तत्त्वाभिनिवेशविरहे तु (१) कदाचिच्चलितं स्याच्चित्तं तत्त्वमार्गतः । (२) स्यात् क्वचिदविधिसेवनम् । (३) भवेत् कुत्रचित्सूत्रेऽरुचिः । (४) ततश्च न भवेद्धृदि सिद्धान्तोपनिषत्परिणतिः । (५) प्रमाद-स्खलनामिथ्यावस्तु-गोचरोपादेयमति-प्रभृतिदोषसन्दोहतादवस्थ्यम् ।

तत्त्वाभिनिवेशानुभावेनैव न चलिता आनन्दकामदेवादि-श्रावका दिव्योपसर्गेष्वपि । एवं शालिभद्रादिभिरपि योगाराधना कृता तस्या बीजं तत्त्वाभिनिवेशः ।

किञ्च तत्त्वाभिनिवेशेन भवति दार्ढ्यं विध्यनुपालने । ततश्च कालविनयबहुमानयोगोपधानानिह्नवादिज्ञानाचार-परिपालनपुरस्सरं निषद्यास्थापनादिसत्कविधिपालनपूर्वकं सूत्रार्थतदुभयाध्ययनं कुर्यात् ।

सूत्रं हि परममन्त्र इति प्रतिपद्येत । एवं प्रतिपद्य तदध्ययनं कुर्यात् । यथा ह्यपूर्वलाभप्रदस्य श्रेष्ठमन्त्रस्य पाठ एकायनतया भावोल्लासपूर्णेन हृदयेन क्रियते, तथा सूत्रश्रवणे तत्पठने च प्रयतेत । यथा हि मन्त्रोऽपनयति सर्पादिविषम्, तथा सूत्रं परममन्त्रतयोपशाम्यत्यनेकमृत्युनिबन्धनं रागादिविषम् । अत्युच्चेनैकाग्रभावेन कर्त्तव्यं सूत्रस्याध्ययनम् । कर्त्तव्यः शुभभावोल्लासः । स्मर्त्तव्यं सूत्राध्ययने बालवज्रस्वामिज्ञातम्। जिनागमान्मन्त्रवदधीयानो हि हरिभद्रमुनिर्बभूव महान् शास्त्रकार आचार्यः ।

तथा बद्धलक्ष्यो भवति श्रमणः । सूत्राध्ययनेन सममेव निश्चिनोत्यसौ स्वकर्त्तव्यम् । तदभावे तु (१) पाण्डित्य-मात्रप्रयोजनं स्यात्तदध्ययनम् । (२) गतानुगतिकतया लक्ष्य-विकलं वा स्यात् । (३) स्पर्द्धार्थं वा स्यात् । (४) सन्मानाद्यर्थं वा स्यात् । (५) चित्तमालिन्यपोषेण सदनुष्ठानोपेक्षणार्थं वा स्यात् । ज्ञानं तु तदेवोपयुज्यते यत् प्रवर्त्तयति सदनुष्ठाने । अन्यत्तु रासभारोपितभारानतिशायी । तथा च पारमर्षम् - जहा खरो चंदणभारवाही, भारस्स भागी न हु चंदणस्स । एवं खु नाणी चरणेण हीणो, नाणस्स भागी न हु सुग्गइए - इति (आवश्यकनिर्युक्तौ) न हि सदनुष्ठानगोचरां बद्धलक्ष्यतां विना प्रवर्त्तकं स्याज्ज्ञानम् ।

न हि सम्मूर्च्छिमक्रियासदृशं भवति श्रमणस्यानुष्ठानम्, अपि तु लक्ष्यसचिवम् । तल्लक्ष्यं चैतत् - (१) जिनाज्ञानुपालनेन सफलीकर्त्तव्यं मया जीवनम् । (२) कर्त्तव्यो मया मोहान्धकार-निकारेण जिनवचःप्रकाशाधिगमः । (३) प्राप्तव्यं मया कुविकल्पादिपरिहृत्यर्थं सारभूतं तत्त्वम् । (४) विधेयः खलु मया कर्मक्षयः (५) मनोदण्डादित्यागार्थं रन्तव्यं मया श्रुतोपयोगे सन्ततम् - इति । एतल्लक्ष्यसहितं कुर्याच्छास्त्राध्ययनम् ।

तथाऽऽशंसया विप्रमुक्तस्स्याच्छ्रमणः । नास्यैहिकस्य सत्कारादेः पारलौकिकस्य वा बलर्द्धिविभवादेराशंसा भवति आयतः-मोक्षः, तदेकाभिलाषितया सूत्राध्ययनं करोत्येषः । प्रतिपद्यते च सूत्रोदितं कर्त्तव्यम् । ज्ञानं त्वात्मसंशोधनं परमं रसायनम् । तदभ्यास आशंसाकालुष्यं कुपथ्यसेवनसदृशम् ।

न हि ज्ञानमन्तरेणापनयत्यात्मकालुष्यं किञ्चित् । यदि तु तत्प्राप्यापि कचवरस्फातिरेव क्रियते, तदा कथङ्कारं तदपगमः स्यादिति विचारणीयम् ।

अयं चापर आशंसाविप्रमुक्तिप्रयुक्तो लाभः, यदनयाऽध्ययने वर्त्तमाने न पाण्डित्यादिप्रयोजनभाव उदेति । ततश्च न विस्मर्यत आत्महितम् । नोपेक्ष्यते गुरुसेवा । न गौणीक्रियते गुरुसमर्पणम् । न विशिष्टाध्ययनयोगेऽपि जागर्त्ति मदोन्मादः । न दुर्बोधाबोध-हेतुकमुदेति दुर्ध्यानम् । न गुरुसत्कमानुकूल्यं गौणीकृत्य स्वानुगुणतायै समर्प्यते प्राधान्यम् । स एष आशंसाविहानप्राप्या विभूतिः ।

मोक्षाभिलाषा त्वस्य भवति तीव्रा । ततश्च महोल्लासेन धैर्येण च समं क्रियते सूत्राध्ययनम् । न हि भवनिर्वेदप्राबल्ये मोक्षाभिलाषप्रकर्षे च सति शिथिलं भवति श्रामण्यम् । एताभ्यामेव प्रेरितोऽनन्योपायतयाऽधीतेऽसौ जिनागमम् । एवञ्च

**सूत्र : स तमवेइ सव्वहा, तओ सम्म निउंजइ । एअं धीराणं सासणं । अण्णहा अणिओगो, अविहिगहिअ-मंतनाएणं ।।**

सर्वथा - यथावस्थिततया सूत्रस्य बोधं प्राप्नुयात् । ततो विधिपुरस्सरमधीतसूत्रस्य तात्त्विकबोधेन सम्यग् नियोगं कुर्यात् । निश्चितो योगो नितरां वा योगो नियोगः । स च चतुर्धा भवति - (१) निश्चिता प्राप्तिः (२) सदुपयोगः (३) अधिकारः (४) विनियोगो वा ।

यथा (१) विहित आत्मनि सूत्रस्य सम्यग् नियोगः, तस्य

सम्यक् प्राप्तिः कृतेत्युक्तं भवति । (२) सूत्रानुसारिप्रवृत्त्या सूत्रस्य नियोगः - सदुपयोगः कृतः । (३) विधिपुरस्सर-मध्ययनान्नियोगः - अधिकारोऽवाप्तः । (४) अन्येष्वपि सूत्रार्थावतारणान्नियोगः- विनियोगो विहितः ।

एतद्धीराणाम् - गभीराशयानां पुंसां शासनम् - शिक्षावचनम्, यत् पूर्वोक्तविधिना सूत्रमध्येतव्यम्, सम्यग्रीत्या तत्सूत्रस्य नियोगं च कुर्यात् । अन्यथा-अविधिकृताध्ययनेन तु अविधिगृहीत-मन्त्रनिदर्शनेन विपर्यासोऽनियोगलक्षणो भवेत् । न ह्यध्ययन-परिश्रमे कृतेऽपि (१) तत्समीचीनप्राप्तिः कृता स्यात् (२) न सूत्रस्य सदुपयोगो भवेत् (३) न परमार्थतः सूत्राधिकारा-वाप्तिस्स्यात् (४) नान्यत्र विनियोगोऽपि सम्भवेत् ।

यथा ह्यविधिगृहीतमन्त्रस्य वस्तुतोऽग्रहणम् - अप्राप्तिरेव। यद्वा ग्रहपीडादिप्रयोजकतया वैपरीत्येन फलति तन्मन्त्रग्रहणम्। तदप्यप्राप्तिरेव परमार्थतः । एवमविधिगृहीतसूत्रस्य नियोगो न भवति, किन्त्वनियोगः . न हि नीत्युल्लङ्घनेन सम्प्राप्तस्य वित्तस्याधिकारो गण्यते न्यायविदा । न चास्योपयोगोऽपि भवति योग्यः । यत्र हि सूत्रस्य विधिपूर्वकं ग्रहणं न भवति, तत्र जिनागमस्याराधनैव नास्ति, अपि त्वनाराधनेति ध्येयम् ।

## (६) मार्गदेशना

**सूत्र : अणाराहणाए न किंचि, तदणारंभाओ धुवं । इत्थ मग्गदेसणाए दुक्खं, अवधीरणा, अप्पडिवत्ती । नेवमहीअमहीअं, अवगमविरहेण ।**

यस्तूपेक्ष्य विधिं यथातथाऽधीते सूत्रम्, सोऽनाराधकः । न ह्यसाववाप्नोतीष्टमनिष्टं वा फलम् । अत्रेष्टफलं मोक्षः, अनिष्टफलमुन्मादादि । सदनुष्ठानं हि मोक्षफलमेव, यथोक्तम् - श्रामण्यस्य फलं मोक्षः, प्रधानमितरत् पुनः । तत्त्वतोऽफलमेवेह ज्ञेयं कृषिपलालवत् - इति । एवं विराधनाफलमुन्मादादि । यथक्तम् - उम्मादं च लभेज्जा, रोगातंकं व पाउणे दीहं । केवलिपण्णत्ताओ धम्माओ वावि भंसेज्जा - इति । न हि सम्यक्त्वनाशमात्रं विराधनाफलम्, विराधनाकालीनसङ्क्लिष्ट-भावेन निर्मलचित्तनिर्नाशनात्, ततश्च चित्तभ्रमादिलक्षणो-न्मादमेति प्रतिज्ञाभङ्गकृत् । क्लिश्यते दीर्घकालीनरोगातङ्केन । भ्रश्यति वा सर्वज्ञोक्तात् धर्मात् ।

ननु कथमत्रानाराधनायां किञ्चित् फलमिति चेत् ? तत्त्वत-स्तदनारम्भात् । न ह्यनाराधनाभावे प्राप्यत आराधनाफलम् । यदि ह्याराधनासकाशाद्भिन्ना सामग्री जनयत्याराधना-सामग्रीजन्यं फलम्, अन्यथाऽतिप्रसङ्गात्, तन्त्वादेरपि घटप्रसूतिप्रसक्तेः ।

ननु सूत्राद्यर्थे यतमानोऽपि विधिमुपेक्षमाणोऽनारम्भको भवतीत्युक्तम्, कथमेष परिज्ञायत इति चेत् ? अत्रोच्यते, यदाऽनाराधकस्य तात्त्विका मार्गदेशना क्रियते - यथायमुन्मार्गः, इदृशस्तु भवति मार्गः - तदैतच्छृण्वतोऽस्य दुःखमुदेति, अवगणयति वाऽसावेनां मार्गदेशनाम्, न वैतां प्रतिपद्यते ।

अनाराधका हि प्रकारत्रयोपेता भवन्ति ।

(१) गुरुकर्माणः - तेषां हि शुद्धदेशना भयोत्पादिका

भवति । यथा - कथमेवंविधसूक्ष्मसमाचारशतानि परिपालयितुं शक्यन्ते । अपि चामृततुल्यः श्रुतधर्म एकान्ततः कल्याणकृत्, न ह्येकतरविध्यनादृतेरपास्यतेऽस्य कल्याणहेतुत्वम् - इत्यादि। अभिहितं च - शुद्धदेशना हि क्षुद्रसत्त्वमृगयूथसन्त्रासनसिंहनादः - इति ।

(२) कर्मलाघवलेशोपेताः - तेषां नोक्तविधयोदेति दुःखम्, किन्त्ववधीरणा भवति शुद्धमार्गगोचरा । यथा - भवतु या काचिदपि विधिप्रतिपादिका शास्त्रोक्तिः । अस्माभिस्तु यत् क्रियते, तदेव करिष्यामो वयम् - इति ।

(३) कर्मलाघवविशेषोपेतः - नैषोऽवगणयति मार्गम्, किन्तु न स्वीकरोत्यप्येनम् ।

न ह्येतज्जीवत्रितयस्यापि सूत्राध्ययनादिप्रवृत्तिराराधनारूपा, अपि त्वनाराधना, विधिमार्गोरीकारस्यैवासत्त्वात्तदनुपालन-गन्धस्याप्यभावात् । नैवमधीतमधीतं नाम परमार्थतः, सम्यग्बोधानवाप्तेः । स तु पूर्वोक्तसमलेष्टुकाञ्चनदृग् - गुरुप्रति-बद्धभाव - सद्भूतार्थदर्शनशुश्रुषादिगुणाष्टक-तत्त्वाभिनिवेश - मोक्षैकाभिलाषादि - गुणगणप्रतिजागरण-पुरस्सरमेवावाप्यते। न ह्येतद्गुणगणोपेक्षयाऽवाप्तं शुष्कं पाण्डित्यं सद्बोधनिबन्धनं भवति, अपि तु भववृद्धिबीजम् । एवं विधिमन्तरेण मार्गमुपेक्ष्य कृतं सूत्राध्ययनमनाराधनाया-मनुप्रविशति । वज्रस्वामिना बालत्वे एव श्रवणमात्रेणाधीतान्येकादशाङ्गानि, तथापि मा भूदय-मनाराधक इति कृत्वा गुरुणा योगोद्वाहनपुरस्सरं पुनः पाठितानि।

**सूत्र : न एसा मग्गामिणो, विराहणा अणत्थमुहा अत्थहेऊ, तस्सारंभाओ धुवं । इत्थ मग्गदेसणाए अणभिनिवेसो पडिवत्ति-मित्तं, करियारंभो । एवं पि अहीअं 'अहीअं' अवगमलेसजोगओ।**

नोदेति यस्य विधिमार्गं शृण्वतो दुःखम् । नापि योऽवधीर-यत्यनङ्गीकुरुते वैनम् । किन्तु श्रद्धया प्रवर्त्तते मार्गे । तस्य कदाचित्तीव्रश्रद्धाबल-वीर्योल्लास-विशिष्टचित्तोपयोग-वैकल्याद्विधिपालने स्खलना भवति, तथापि नास्यैकान्ततो-ऽनाराधना, मार्गश्रद्धानादस्य सम्यक्त्वभावात्, तद्भावे च सर्वदा सदनुष्ठानभावात् । न हि मार्गानुसारिण्यसदनुष्ठानरूपा सम्भवत्यनाराधना । उन्मादाद्यनर्थानां गुरुदोषहेतुकत्वात्, तेषाञ्च दोषाणां मार्गानुसारिण्यभावात् । एवञ्चोक्तहेतुभि-र्विधिस्खलनाभावेऽपि तत्क्रियाऽर्थहेतुः - मोक्षाङ्गम्, मार्गाराधनया परमार्थतो मुक्तिं प्रति गमनप्रारम्भणात् । एवञ्च मार्गानुसारि-त्वयोगेन मोक्षाभिमुखमेवास्य गमनं विराधनाभावेऽपीत्यर्थः । कण्टकज्वरमोहोपेतमार्गगन्तृवत्, तदाह-मुनेर्मार्गप्रवृत्तिर्या सा सदोषाऽपि सैव हि । कण्टकज्वरसम्मोहयुक्तस्येव सदध्वनि - इति ।

सत्यामपि विराधनायां मार्गगामिनां त्रयः प्रकाराः सम्भवन्ति - (१) तात्त्विकदेशनाश्रवणेन न यस्यैकान्तानाराधकवन्नोदेति दुःखमवधीरणाऽप्रतिपत्तिः, किन्तु विध्यादिजिनाज्ञैव मुख्येत्या-कारकोऽभिनिवेशोऽप्यस्य न भवति । तथाविधपक्षपात-प्रायोग्यामूढदशाया अद्याप्यनेनानधिगमात् । यथा समेऽपि भूभागे स्खलत्यन्धः, स्पष्टेऽपि शब्दे स्खलति च मूकः,

एवमभिनिवेशविरहेण विराधनां करोत्येषः । (२) इतरस्त्वल्पविराधनो धारयति तथाविधं पक्षपातम् । किन्तु वीर्योल्लासाभावान् न तत्र प्रवर्त्तते । (३) तृतीयस्त्वल्पतमविराधनः प्रवर्त्ततेऽपि तत्र । किन्तु प्रमादादिदोषेण क्वचित् क्वचित् विराधयति किञ्चित् ।

एवं सविराधनमपि मार्गानुसारिणाऽधीतं सूत्रं परमार्थतोऽधीतम्, सम्यग्बोधलेशयोगात् । विराधनाविरहे तु विपुलः सद्बोध इति ध्येयम् ।

बोधसम्यक्त्वं ह्यात्मनि तद्बोधपरिणतिमवलम्बते । परिणतिरपि तथाविधमनोवाक्कायप्रवृत्त्या प्रसिद्ध्यति, न तु वैदुष्यमात्रेण । यद्यपि मार्गविराधना स्खलनामापादयति परिणतौ, तथापि मार्गानुसारिभावेन सद्बोधलेशप्रयोजकं भवति सूत्राध्ययनम् । अत एवाधीतमनेन सूत्रं परमार्थतः । ततश्च कुरुतेऽसौ सम्यग् नियोग्यम् ।

## (७) सापायादिवक्तव्यता

**सूत्र : अयं सबीओ नियमेण । मग्गगामिणो खु एसा अवायबहुलस्स । निरवाए जहोदिए सुत्तुत्तकारी हवइ पवयणमाइसंगए पंचसमिए-तिगुत्ते । अणत्थपरे एअच्चाए अविअत्तस्स सिसुजणणीचायनाएण । विअत्ते इत्थ केवली एअफलभूए । सम्ममेअं विआणइ दुविहाए परिण्णाए ।**

मार्गाराधकोऽयं स्खलनाभावेऽप्यवश्यं धारयति मोक्षफलप्रदं

सम्यक्त्वादि बीजम् । नास्य विराधना बाधते मार्गप्रयाणम्, सबीजत्वेनास्य मार्गानुसारित्वात् । अनाराधकस्य तु मार्गदेशना-श्रवणेऽप्युद्भवति सन्त्रासादिकम्, अतस्तस्य न भवति मार्गानुसारित्वम् । नापि तस्य सम्यग्दर्शनादि बीजम् । अधिकृतस्य तु तदुभययोगादबाधितं भवति मोक्षप्रयाणम् । मार्गगामिन एव भवत्येषाऽबाधकविराधना, अवाप्तबीजत्वात्तस्य ।

ननु किं सर्वेषामपि मार्गगामिनामेवंविधा विराधना भवति? नेत्युच्यते । द्विविधा हि मार्गगामिनः । सापाया निरपायाश्च । अपायः - अतिसङ्क्लिष्टमोहनीयान्तरायादि निरुपक्रमकर्मोदयः, स चावश्यं कारयति विराधनाम् । सोपक्रमं तु कर्म पुरुषार्थेन क्षीयते । न दर्शयत्येतत् स्वविपाकम् । एतद्युक्त आत्मा निरपायो व्यपदिश्यते । इदृशो मार्गगामी न विराधनां विधत्ते, अपि तु सम्यगनुसरति शास्त्रोदितं मार्गम् । परिपालयति विधिम् । परिहरति प्रमादप्रयुक्तं शैथिल्यम् ।

द्वावप्येतौ सम्यग्दर्शनादिबीजमन्तौ । यद्यप्येतयोरुभयोरपि पुरुषार्थो मार्गपालनार्थो भवति । द्वावपि यतेते दोषपरिहारार्थम्, तथापि सापायस्य विराधना भवति, तत्त्वादेव । सोपक्रमकर्मा तु निरपायतया प्रतिबध्नाति स्वकर्मविपाकोदयम् । आपादयति क्षयोपशमम् । ततश्च न भवति तस्य विराधना । एतदुक्तं भवति - सबीजस्य दोषपरिहाराय पुरुषार्थस्तु भवत्येव, अन्यथा तु तद्भावस्यैवानुपपत्तिरिति ।

उक्तगुणोपेतः प्रव्रजितः प्रवचनमातृसम्यक्परिपालकस्स्यात् ।

प्रवचनम् - चारित्रदेशकं जिनवचः, जिनाज्ञाभिहितं चारित्रं च। तच्च बालस्थानीयम् । तन्मातृस्थानीयाश्च पञ्च समितयस्तिस्रो गुप्तयश्च । अष्टावप्येताः प्रवचनमातृतया व्यपदिश्यन्ते । एताः सम्यक् परिपालयति श्रमणः ।

सम्यगुपयोगमर्यादासचिवा प्रवृत्तिः समितिः । उपयोगोऽत्र दोषपरिहार आत्मप्रतिजागरभावः । मर्यादा च प्रवृत्तिगोचरा भवति । गुप्तिर्गोपनम् - असतो निवर्तनम्, सति स्थापनं च । प्रवृत्तिरूपा भवति समितिः । गुप्तिस्तु प्रवृत्तिनिवृत्त्युभयस्वभावा। यथाऽऽस्वशुभान्निवर्त्तनं भवति, तथा शुभे प्रवर्त्तनमपि भवति ।

समितिपञ्चकम् - (१) **इर्यासमितिः** - लोकातिवाहिते मार्गे, चुम्बिते भास्वदंशुभिः । जन्तुरक्षार्थमालोक्य, गतिरिर्या मता सताम् । (२) **भाषासमितिः** - अवद्यत्यागतः सर्व-जनीनं मितभाषणम् । प्रिया वाचंयमानां सा भाषासमितिरुच्यते ।। (३) **एषणासमितिः** - द्विचत्वारिंशता भिक्षा-दोषैर्नित्यमदूषितम्। मुनिर्यदन्नमादत्ते ऐषणासमितिः स्मृता ।। (४) **आदानभण्ड-मात्रनिक्षेपणासमितिः** - आसनादीनि संवीक्ष्य प्रतिलिख्य च यत्नतः । गृह्णीयान्निक्षिपेद्वा यत्, साऽऽदानसमितिर्मता ।। (५) **पारिष्ठापनिकासमितिः** - कफविप्रुण्मलप्रायं, निर्जन्तु-जगतीतले । यतनादुत्सृजेत् साधुः, सोत्सर्गसमितिर्भवेत् ।। (योगशास्त्रे १)

गुप्तित्रिकम् - (१) **मनोगुप्तिः** - विमुक्तकल्पनाजालं समत्वे सुप्रतिष्ठितम् । आत्मारामं मनस्तज्ज्ञैर्मनोगुप्तिरुदाहृता ।।

(२) **वचनगुप्तिः** - सञ्ज्ञादिपरिहारेण यन्मौनस्यावलम्बनम् । वाग्वृत्तेः संवृत्तिर्वा या, सा वाग्गुप्तिरिहोच्यते ।। (३) **कायगुप्तिः** - उपसर्गप्रसङ्गेऽपि, कायोत्सर्गजुषो मुनेः । स्थिरीभावः शरीरस्य कायगुप्तिः सतां मता ।। (योगशास्त्रे १)

अत्रेर्यासमितौ निदर्शनं वरदत्तो मुनिः, येन देवकृतपरीक्षायां हस्तिभयेऽपि मण्डूकीरक्षार्थं सम्यक् परिपालितेयं समितिः । भाषासमितौ महानिशीथे रुक्मीकथावर्णितो मुनिर्दृष्टान्तम् । येन सकृदेतत्समितिभङ्गेन सञ्जातानुशयेन प्रतिपन्नं यावज्जीवं मौनम् । ततश्चापरस्मिन् भवे बभूव सुलभबोधी राजपुत्रः । सञ्जातः प्रभावकब्रह्मचर आबाल्यात् । अवाप गृहिभावात्प्रभृतिरेवावधिज्ञानम् । एषणासमितौ ढण्ढणमुनिनिदर्शनं प्रसिद्धम् । आदानसमितौ प्रतीतं वल्कलचीरी दृष्टान्तम् । पारिष्ठापनिकासमितौ धर्मरुच्यनगारवक्तव्यता प्रथिता । मनोगुप्तौ निदर्शनं कुमारपालभूपालः । येन मनसाऽपि ब्रह्मभङ्ग उपवासाभिग्रहो गृहीतः । वाग्गुप्तौ दृष्टान्तं मेतार्यमुनिः । येन क्रौञ्चरक्षार्थं मौनमवलम्बितम् । मा भून्मस्तकस्थाङ्गारनिपातेन महीगतजीवविराधनेति स्थिरतरकायो गजसुकुमालमुनिर्निदर्शनं कायगुप्तौ ।

अनादिकालतो हिंसाप्रमादाभ्यासः सञ्जातोऽस्त्यात्मनः। तं कृपानिधिं कुरुते समितिगुप्त्यभ्यासः । एष हि तनोत्यात्मन्यप्रमादलक्षणं शुभोपयोगम् । विधत्ते आत्मनः पुष्टिं पुण्यतः, शुद्धिं च पापक्षयतः । विरला एव नियन्त्रयन्त्यात्मानं समितिगुप्तिभिः । एतदनुभावेनैव माषतुषसदृशा अप्यवापुः

सार्वज्ञ्यमतोऽत्र यतितव्यम् ।

वेत्तिर्मुनिर्यथा मातृत्यागतो विनश्यति बालः, एवं प्रवचनमातृत्यागोऽपि चारित्रात्मकस्य बालस्य प्राणान्तलक्षणानर्थकृत्। छद्मस्थस्य चारित्रं हि बालचारित्रं भवति, अत एतदव्यक्तम्। व्यक्तं तु चारित्रं सर्वज्ञस्यैव, तदपि प्रवचनमातृसन्ततसंयोगफलम्। उक्तसंयोगेनैव चारित्रबालस्य सम्यग्वृद्धिक्रमेण सर्वज्ञचारित्रपरिणतियोगात् । व्यक्तचारित्रायोगे निरन्तरं प्रवचनमातृसंयोगोऽत्यावश्यकः । क्षायोपशमिकचारित्रं कदाचिदाव्रियेत सत्तागतेन चारित्रमोहनीयेन । अतो सन्ततं प्रवचनमात्रनुपालनं कर्त्तव्यमुक्तभयभीतेन । एतदनुपालनेनैव संरक्ष्यते जीवश्चरणावरणोदयलक्षणादनर्थात् ।

सर्वमप्येतदवगच्छति श्रमणो द्विविधया ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया च । अष्टप्रवचनमातृस्वरूपोपयोगिताऽऽवश्यकतामोक्षफलकतादिगोचरं श्रद्धासचिवं ज्ञानं ज्ञपरिज्ञा। एतज्ज्ञानानुसारिसमितिगुप्त्याचरणं प्रत्याख्यानपरिज्ञा ।

अनादौ संसारे जीवेनैतद्भिन्नविषयमनल्पं ज्ञानं तदनुरूपा चावाप्ता क्रिया । तत्फलतयाऽवाप्तं पापमयं जीवनम् । पर्यवसितं तदाधिव्याधितृष्णादिपीडायाम् । ततोऽपि प्राप्ता भवपरम्परैव। अतो प्रोक्तद्विविधपरिज्ञया कर्त्तव्या आत्मसात् समितिगुप्तयः। ततश्चेहापि भवेत् परमं स्वास्थ्यम्, ततोऽपि निष्ठामेष्यति संसारः । को नु सुन्दरं दुर्लभं च योगं प्राप्य प्रमाद्येत ?

## (८) आश्वासद्वीपः प्रकाशद्वीपश्च

**सूत्र : तहा आसास-पयासदीवं संदीणाथिराईमेअं असंदीणथिरत्थमुज्जमइ !**

लोकोत्तरं खलु वस्तु सम्यज्ज्ञानं सम्यक् चारित्रं च । 'दीव' - शब्दस्य हि द्विविधं संस्कृतरूपम् - द्वीपः, दीपश्च । चारित्रमाश्वासद्वीपः, ज्ञानं तु प्रकाशदीपः । भवसागरे कषायाविरतिविकारकल्लोले निमज्जतो जीवान् द्वीपवदाश्वासयति चारित्रम्, विकारोपशमप्रयोजकतया परमसुखहेतुत्वात् । ज्ञानं चैकान्तदुःखव्याप्तमोहान्धकारं निराकरोति प्रदीपवदित्येतत् प्रकाशदीपोपमम् ।

चारित्रलक्षणद्वीपाभावे कषायादिविकारकल्लोलप्रयुक्तमात्मनो निमज्जनं स्याद् भवसागरे । ज्ञानदीपकविरहे तु सत्यपि सर्वनिधान आत्मगृहिस्थिते तद्दर्शनं विनैवमेव कुमारेण मरणं स्यात् । भावनीयं चारित्रद्वीपालम्बन उदायनराजर्षिज्ञातम्, ज्ञानदीपकप्राकट्ये च श्रीसिद्धसेनदिवाकरसूरिनिदर्शनम् ।

एषोऽपि प्रत्येको द्विप्रकारः । तत्र द्वीपः - (१) स्पन्दनवान् - समुद्रवेलाकाले प्लावनवान्, एतत्सदृशं भवति क्षायोपशमिकं चारित्रम् । (२) अस्पन्दनवान् - अप्लावनवान्, एतत्सदृशं भवति क्षायिकं चारित्रम् ।

दीपोऽपि द्विविधः - (१) अस्थिरः - प्रतिपाती, एतत्सप्रक्षं क्षायोपशमिकं ज्ञानम् । (२) स्थिरः - अप्रतिपाती, एवंविधं क्षायिकं ज्ञानम् ।

उभयत्राऽऽद्यो विलम्बेनेष्टसिद्धये, सप्रत्यपायत्वात्, द्वितीयस्त्वविलम्बेन सिद्धिप्रदः, निष्प्रत्यपायत्वात् । सम्यगेतद्विजानाति श्रमणः, न केवलं विजानाति किन्त्वस्पन्दनवत्स्थिरार्थमुद्यमं करोति सूत्रनीत्या ।

यथा हि द्वीपावाप्त्या न भवति सागरे निमज्जनम् । आश्वासरूपो भवति द्वीपः, एवं भवसागर आश्वासयति चारित्रद्वीपः । यथा रक्षति द्वीपः हिंस्रेभ्यो जलचरेभ्यः । अपनयत्येष तीव्रक्षुत्पिपासापीडाम् । निराकरोत्येष क्षारजलसंसर्गजन्यवेदनाम् । न हि सागरे निमज्जितस्योच्चावचपदबम्भ्रमणनैरन्तर्यात्क्वापि स्थैर्यं स्वास्थ्यं वा भवति, प्रयच्छति त्वेतद् द्वीपः । किञ्च महार्घ्यभाण्डस्य सारद्रव्यस्य च रक्षा द्वीपमन्तरेण दुर्घटा समुद्रविभ्रमे ।

एवञ्चारित्रद्वीपोऽपि रक्षति रागादिदारुणनक्रचक्रेभ्यः । वितरति सद्ध्यानस्वाध्यायादिकानात्मपुष्टिकरान् स्वादुभोज्यान् भावनाद्यमृतं च । न ह्येतदभ्यवहरणावाप्त्या तृप्तिः प्राप्येत जातु भवसागरे । भवसागरसुलभकषायाशुभध्यानादेस्तृष्णादिदुःखवर्द्धनत्वात् । कदर्थ्यतेऽत्रात्मा दोषकच्छपैः । चर्व्यते निर्दयं कुसञ्ज्ञातिमिङ्गिलैः । न विद्यत एतन्मोचको गुरुरपि भवसागरे गुरुकुलवासस्यापि चारित्रद्वीपस्थितत्वात् । किञ्च भवसागर उच्चावचपदावाप्तिः कदर्थयत्यात्मानम् । कदाचिद्देवलोके कदाचित्तु नरके गच्छत्यात्मा । कदाचिन्नरकादप्यनन्तगुणवेदने निगोदेऽपि निवसत्यात्माऽनन्तान् पुद्गलपरावर्त्तान् यावत् । नैषा कदर्थना भवत्यवाप्तचारित्रद्वीपानाम् ।

भवसागरे हि विप्रकीर्णं भवत्यात्मनः क्षायोपशमिकक्षायिक-सम्यक्त्व-क्षमा-नम्रता-संयम-ज्ञान-वीर्याऽव्याबाधसुखा-ऽक्षयस्थित्यादिरूपं विभवकदम्बकम् । तच्च सुरक्षितं स्याच्चारित्रद्वीपे, सुस्थस्स्यादात्माऽप्यत्र ।

तथा ज्ञानदीपः प्रकाशं प्रयच्छति घोरे संसारकान्तारे । वने ह्यन्धतमसे कण्टक-शिलाकणादिप्रयुक्तवेधव्यथामाप्नोति जीवः । लूण्ट्यते लूण्टाकैः । मुह्यते निकुञ्जेषु । कम्पते श्वापदशब्दैः । चर्व्यतेऽपि तैः ।

तदत्र भवकान्तारे निर्भयीभवति ज्ञानदीपकं प्राप्य । एतत्प्रकाशेन पश्यति जीवः क्रोधादिलूण्टाकान् । ततश्च सम्यग् रक्षति स्वकीयान् क्षमादिगुणरत्नान् । अवत्यात्मानमना-चारश्वापदेभ्यः । परिहरत्याश्रवकण्टकान् । परिजानाति संवरनिर्जराराजमार्गम् । अवगच्छति हेयोपादेयोपेक्ष्यतत्त्वान् । संवेत्त्यार्त्तरौद्रध्याने । ततश्च सम्यक्करोत्यात्मरक्षणम् । प्रकटयत्यात्मनो विशुद्धतरं स्वरूपम् ।

एवंविधं द्वीपं दीपञ्च प्राप्य यथाऽस्पन्दवद्द्वीपः स्थिरदीपश्च प्राप्येत्, तथा यतितव्यम् । एतच्च सम्भवति शुभभावना-शुक्लध्यानावलम्बनेन, अस्थिरज्ञानदीपकसामग्रीं तैलवर्त्त्यादिरूपां क्षायोपशमिकत्वात् क्षायिकतां प्रापणेन, सम्यक्त्वसप्तषष्टि-व्यवहारपरिपालनेन, तत्त्वभावनाप्रकर्षतो दर्शनसप्तकक्ष-पणप्रत्यलायां क्षपकश्रेणावध्यारोहणेन च, एवमेव क्षायिक-सद्दर्शनावाप्तेरिति भावनीयम् ।

क्षायोपशमिकधर्मानुपालनं प्रायः शास्त्रवचनगुरुदाक्षिण्य-लोकलज्जा-कर्मविपाकसाध्वसादिभिः प्रयोजकभूतैर्भवति । अतो वक्ष्यमाणोपायनवकमनुसर्त्तव्यं क्षायिकधर्मप्राप्तये -

(१) निषिद्धपरिहारो विहितसेवनं च यथा स्वभावगतं स्यात्तथा जिनाज्ञाराधने यतितव्यम् । यद्यप्येतदाराधनं प्रेत्य सुखनिबन्धनं भवति, तथापि न सुखप्रयोजनेन तत्र प्रवृत्तिः, अपि तु प्रकृत्या स्यात्, तथाऽभ्यासो विधेय इति हृदयम् । एतदर्थमपि -

(२) दोषान् प्रति परप्रवृत्तिं प्रति च धर्त्तव्यो जुगुप्साभावः। न हि प्रेत्य दुःखनिबन्धनतयैव त्याज्या हिंसादयः, अपि तु निसर्गतो हेयतया परप्रवृत्त्यात्मकतया च । इत्थञ्च यथा स्वभाव एवाहिंसादिमयस्स्यात्तथा यतितव्यम् ।

(३) भावयितव्याऽनवरतमहिंसादिगोचरा सुन्दरा भावना। एवं चिन्तनीयं हिंसादिदोषाणामधमत्वम् ।

(४) यद्गुणपालनदोषत्यागार्थं प्राग् बाह्यसामग्री मवलम्बितवान्, तदर्थमधुना स्वात्मानमवलम्बयेत् । यादृशा हि शुभभावा प्राग् जिनमूर्त्त्यालम्बनेनोदयमापुः, तादृशा अधुना तदालम्बनमन्तरेणाप्युदयं प्रापणीयाः ।

(५) प्रागशुभालम्बनवियोग एव समभवत् शुभभावोदयः, तत्संयोगे तु सद्योऽभवच्चित्तक्षोभः । साम्प्रतं तु तद्योगेऽपि यथा शुभभावभेदो न स्यात्तथा दार्ढ्यं विधेयम् ।

(६) स्मर्त्तव्या प्राक्तनमहापुरुषपराक्रमाः । यैरुत्कटभोग-

सामग्रीं प्राप्यापि तृणवत्परिहृता ।

(७) तथाविधमहापुरुषवृत्तमेव लक्षीकृत्याराधनानुस्यूतभावं प्राप्नुवात् । रागदारुणताविभावनेन वज्रसारतां नयेद्विषयविरागम्।

(८) कथञ्चिदुदितस्याप्यशुभभावस्य निरोधं कुर्यात् । न तु तस्मिन् संयोजयेदात्मवीर्यम् । यथा क्रोधोदये परुषवचनादौ न प्रवर्त्तेत ।

(९) अभीक्ष्णं विदधीत गुणविकासदोषपरिहारमनोरथान्। अनादौ संसारे कृता जीवेन मनोज्ञविषयाणामेव मनोरथाः । यथेदृशं प्राप्यते, तदा लष्टम् । एवमेवमिदं भुनज्मीत्यादि । न ह्येतैर्मनोरथैः स्फातिर्भवति क्षायोपशमिकगुणानाम् । अतो भावनीयास्तत्प्रतिपक्षिमनोरथाः । यथाऽवज्ञास्याच्छच्या अप्यभिमुखायाः । अवगणना भवेत् षट्खण्डसाम्राज्यस्यापि केनचिद्दीयमानस्य । न दृशा निभालयेदपि काञ्चिद्मणीम् । यथोक्तम् - खंतस्स दंतस्स जिइंदियस्स अज्झप्पजोगे गयमाणसस्स । किं मज्झ एएण विचिंतएण सकुंडलं व वयणं न व त्ति ? - इति । अभिलषेदुपसर्गपरीषहोपनिपातम्। मनोरथं कुर्यात् कषायत्यागस्य । यथा - मरणान्तेऽप्युपसर्गे समुपस्थिते न मुञ्चाम्यहं क्षमारसैकरसीभूतं भावम् । करोमि व्रतोच्चारणादिकामन्तिमामाराधनाम् । यदि कश्चित्कुर्यान्मम बाढमपमानम्, तथापि समन्वयस्स्यान्मयि मार्दवस्य ।

कथन्नामैवं शच्यामपि निःस्पृहस्य मलमूत्रादिपात्रेषु मानुषस्त्रीगात्रेष्ववलोकनम् ? कथन्नामास्य मरणान्तोपसर्ग-सहनमनोरथस्य परुषवचोलेशश्रवणेऽपि सहसा क्रोधोदयः ?

प्रोक्तोपायादृत्या स्वभावगता भवेदात्मनो गुणाः । शुभसामग्रीमन्तरेणापि प्रकटितो भवेदात्मनि ज्ञानदीपकः । ततश्चपुरःस्थितेष्वपि मनोज्ञविषयेषु विरागदार्ढ्यप्रकर्षतो न मनस्यपि विकारस्स्यात् ।

क्रोधावसरे विचिन्त्यम्, यथा - शत्रुरपि कर्मक्षपणसहायतया मित्रमेवेति किमस्मै कुपितव्यम् ? अपि तु स्वपापेन भ्रमिष्यत्येष संसारम्, अतोऽनुकम्प्योऽयम् । किञ्च यद्यहं कोपं करिष्यामि, तथापि (१) अवश्यं भोक्तव्यान्येव मया पूर्वोपार्जितानि कर्माणि। (२) तत्रापि कोपप्रयुक्तो भविष्यति नवः कर्मबन्धः । (३) पुनर्नवीभविष्यन्ति दृढतां गमिष्यन्ति च कषायादिकुसंस्काराः (४) हारयिष्यामि मनुजभवप्राप्तः क्षमाभ्यासावसरम् (५) क्रोधं करिष्यता मया परस्याप्येतेऽपाया विधास्यन्ते । अहोऽनर्थनिकुरम्बं कोपहेतुकमिति विचार्य भूयात् समशत्रुमित्रः ।

प्रागुक्तोपायनवकसेवनसाधनपञ्चकम् - (१) सदापि धर्त्तव्योऽप्रमत्तभावान्वयः । (२) भेतव्यं पुद्गलपरिचयमात्रात्। (३) इष्टेतरोभयसंयोगेषु समास्थेयं माध्यस्थ्यसुस्थितेन । (४) भावयितव्यं निर्विकारत्वादिवैशिष्ट्यविशिष्टमात्मस्वरूपम् (५) कर्त्तव्यस्तपःसंयमस्वाध्याययोगेषु निरन्तरः पुरुषार्थः । एवमध्यवसायविशुद्धिक्रमेण क्षपकश्रेणिसमारोहणेन क्षायिकचरण-क्षायिकज्ञानलक्षणौ प्राप्येतेऽस्पन्दनवद्द्वीपस्थिरदीपौ ।

## (९) असम्भ्रमत्वादियोगः

**सूत्र : जहासत्तिमसंभंते अणूसगे असंसत्तजोगाऽऽराहए**

**भवइ ।**

यथाशक्त्यसम्भ्रान्तोऽनुत्सुकश्च स्यान्मुनिः । असम्भ्रमानौत्सुक्यार्थत्रितयम् - (१) मनोवाक्कायसत्कसर्व-सामर्थ्येन परिहरति फलप्राप्तिविषयं भ्रममुत्सुकभावं च । संवेत्ति चैष यथा - भविष्यत्येव मम फलाधिगमः, ज्ञानिप्रोक्तत्वात् - इति। ततश्च कर्त्तव्यमात्रपरायणो भवत्यसौ । तथा फलौत्सुक्येन सदनुष्ठानोपयुक्ततामपि न निहन्त्येषः । न हि रसवत्यपि सिध्यत्यभीक्ष्णमौत्सुक्येन तन्निभालनतः । फलौत्सुक्येन हि नानुष्ठानार्पितमास्ते मनः , ततश्च प्रणिधानविच्युतिः, ततोऽप्यभीष्टफलसिद्धिविरहः । अतस्त्याज्यं तत् ।

(२) निवृत्तिमार्गेऽभ्रान्तः, प्रवृत्तिमार्गे चानुत्सुकः स्यात् । अयं भावः - गृहाद्यारम्भपरिग्रहेभ्यो मुक्तो मुनिर्न कदाचिद्विचारयेत्, यथा - यदि तन्निवृत्तिर्न कृताऽभविष्यत्तदा वरमभविष्यदिति । एवंविधभ्रममुक्तस्स्याच्छ्रमणः । आत्मनो महाप्रतिकूलं तत्त्यक्तम्, तन्न्याय्यमेवेत्यभ्रमसम्पन्नो भवेदसौ । एवं प्रवृत्तिमार्गेऽप्यमुकेनैतावदधीतम्, मम त्वल्पमेव सञ्जातमध्ययनमित्याद्यौत्सुक्यं परिहरेत् । परचिन्तायाः स्वचिन्ताभ्रंशहेतुत्वात्, खेदादिनिबन्धनत्वाच्च ।

(३) शुद्धात्मानुलक्षिव्यापार आन्तरभावः । तस्मिन्नभ्रान्तस्स्यान्मुनिः। उपादेयमतिरस्याप्रतिहता भवेत्संयमादियोगेषु। न भवति वस्त्रपात्रादिबाह्यभावेषूत्सुकः । नानुकूलवस्तुप्राप्त्यर्थं तद्रक्षार्थं प्रतिकूलवस्तुविरहार्थं तदनागमार्थं वोत्सुको भवेन्मुनिः।

एवम्भूतस्सनसंसक्ततयाऽऽराधयेच्छ्रमणयोगान् । विजातीयोन्मिश्रं हि संसक्तमुच्यते, यथा कीटादिमिश्रितं पिष्टम् । प्रकृते तत्तत्काले कर्त्तव्येषु योगेष्वन्याशुभस्य शुभस्य वा योगस्य यथा मिश्रत्वं न स्यात्, यथा चान्यस्य शुभयोगस्यापि विचारमात्रमपि न स्यात्तथा यतनीयमिति भावः । एवमेव सूत्रानुसारित्वोपपत्तेः ।

निःसपत्नश्रामण्यव्यापारे यतितव्यमिति हि सूत्राज्ञा, तदुक्तम् - जोगो जोगो जिणसासणम्मि दुक्खक्खया पउंजंतो । अण्णोण्णमबाहंतो असवत्तो होइ कायव्वो - इति । न हीर्यासमितिपालनावसरे स्वाध्यायः कर्त्तव्यः, एवमेवासपत्नयोगाराधनासम्भवात् । संसक्तयोगाराधने हि दुर्लभः खेदोद्वेगक्षेपोत्थानभ्रान्त्यन्यमुद्रुगासङ्गदोषपरिहारः । ततश्च यथाक्रममष्टयोगदृष्टिबाधः । अतो यतनीयमसंसक्तयोगाऽऽराधनायाम् । एतदभ्यासेनैव क्रमेणावाप्यतेऽनासङ्गयोगः, ततोऽपि सार्वज्ञ्याऽऽविर्भावः, वीतरागभावोदयश्च ।

## (१०) योगसिद्धिफलम्

**सूत्र : उत्तरोत्तरजोगसिद्धिए मुच्चइ पावकम्मुणत्ति ।**

एवमभ्रान्तानुत्सुकभावसचिवाऽसपत्नयोगाराधनात उत्तरोत्तरं विशुद्धतरा सिध्यति धर्मप्रवृत्तिः । तथा च तपसः पारणमप्युन्नतिनिबन्धनं स्यात् । यथा श्रीगौतमस्वामिप्रतिबोधितपञ्चदशशततापसानां पारणानन्तरं कैवल्योदयो बभूव ।

एवं हि प्रत्येको धर्मयोगोऽनुष्ठातव्यः, यथा तदनुष्ठान-

मुत्तरोत्तरमधिकमात्मविकासं कुर्यात् । यथाऽद्यैकविकृतिस्त्यक्ता, श्वस्तद्द्वयं त्यजेदिति । प्राक् सामान्यं परीषहं सहर्षं त्यजेत्, तत उग्रपरीषहमपि । ततोऽपि सापेक्षयतिधर्मसोपानाद-रोहयेन्निरपेक्षयतिधर्मम् । उत्तरोत्तरयोगसिद्धौ साक्षिभावं भजेदस्यान्तरात्मा ।

एवञ्च यथा यथा धर्मयोगेषु प्रगतिं कुरुते, तथा मुच्यते पापकर्मभिः । ततश्च प्रादुर्भवन्ति ते ते गुणाः । यथा तपोयोगसिद्ध्याऽऽहारसञ्ज्ञोत्तेजकपापकर्मविगमः । ततश्च क्षुत्पीडितस्यापि नार्त्तध्यानं भवति, किन्त्वाऽऽहारसञ्ज्ञानिरोधयत्न एवेति । ततश्च व्रजत्यस्थिरात्स्थिरं दीपं प्रति ।

**सूत्र : बिसुज्झमाणे आभवं भावकिरिअमाराहेइ ।**

एवं घातिकर्मलक्षणपापतो मुच्यमान उत्तरोत्तरं विशुद्ध्यत्यात्मा । ततश्चाजन्मा संसारं वा भावक्रियां निर्वाणसाधिकामाराधयति । सा चौचित्यारम्भनिर्वहणरूपा । औचित्येनानुपालयत्येष संयमतपोयोगान् । निर्वहति च सम्यगारब्धान् योगान् । प्रापयति गुणान् परां काष्ठामित्यर्थः।

**सूत्र : पसमसुहमणुहवइ अपीडिए संजमतवकिरिआए अव्वहिए परीसहोवसग्गेहिं वाहिअसुकिरिआनाएणं ।**

एवं सकष्टमपि संयमतपोऽनुष्ठानमनुपालयननुभवति प्रशमसुखम् । न खिद्यते, नाप्याप्नोत्ति ग्लानिम् । नोद्विजते मनोज्ञविषयवैमुख्यलक्षणेन प्रतिस्रोतोगमनेन । नानशनादि-बाह्यतपसि प्रायश्चित्ताद्यभ्यन्तरतपसि वा कष्टलेश-

मप्यनुभवत्येषः, अप्रतिहतचित्तप्रसादत्वात्, सच्चिकित्साप्रवृत्तरुग्णवत् । विजानात्येषः, यथा नोपसर्गादिभिः काचिद्बाधा निर्मदात्मनः । नैभिरंशेनाप्यात्मनो ज्ञानस्य सुखस्य वापि प्रतिघातः सम्भवति । अपि त्वात्मनो गुण एव, पापकर्मक्षपणप्रयोजकत्वादेषाम् । चिकित्साज्ञातमेव कण्ठत आह -

**सूत्र : से जहानामए केइ महावाहिगहिए अणुहूअतव्वेअणे विण्णाया सरूवेण निव्विण्णे तत्तओ । सुविज्जवयणेण सम्मं तमवगच्छिअ जहाविहाणओ पवण्णे सुकिरिअं । निरुद्धजहिच्छाचारे, तुच्छ पच्छभोइ, मुच्चमाणे वाहिणा, निअत्तमाण वेअणे, समुवलब्भाऽऽरोग्गं पवड्ढमाणतब्भावे, तल्लाभनिव्वुईए तप्पडिबंधाओ सिराखाराइजोगेवि वाहिसमारुग्गविण्णाणेण इट्ठनिप्फत्तीओ अणाकुलभावयाए किरिओवओगण अपीडिए अव्वहिए सुहलेस्साए वड्ढइ, विज्जं च बहुमण्णइ ।**

यथा कश्चित् कुष्ठादिमहाव्याधिगृहीतस्सन्ननुभवन् तत्पीडाप्रकर्षं विजानाति सम्यक् स्वरुग्णभावम् । नैष कच्छूकण्डूयकवदविज्ञातस्वव्याधिस्स्यादिति भावः । ततश्च तत्त्वतो रोगनिर्विण्णोऽसौ कञ्चित् सुवैद्यं प्राप्य तद्वचनेन सम्यगवगच्छति स्वव्याधिम् । ततोऽपि तदुक्तविधिना प्रवर्त्तेत तच्चिकित्सायाम् । परिहरति रोगवृद्धिभयतोऽपथ्यम् । अभ्यवहरत्यसारं पथ्यद्रव्यम् । ततश्च क्रमेण मुच्यतेऽसौ व्याधिना । न निर्विद्यते कट्वौषधैः । विषहते प्रतिक्रियाप्रयुक्तां पीडाम् । भावसारं शृणुते वैद्यवचनम् । अनुसरति च तत् । ततश्च यथा यथाऽऽप्नोत्यारोग्यम्, यथा यथा चापगच्छति

रोगपीडा, तथा तथाऽऽरोग्यसामग्र्यभिलाषेण दृढतरेणादरेण यतते चिकित्सायाम् । सहर्षं सहते शिरावेधव्यथाम् । प्रीत्या तितिक्षते क्षारक्षेपपीडाम् ।

एवमनेककष्टभावेऽपि - रोगोपशमेनानन्दमयमारोग्यमवाप्यते - इत्यवगमेनेष्टारोग्यलेशयोगेन च न व्याकुलीभवति । नाप्यधैर्यम सहिष्णुत्वं वा प्रतिपद्यते । किन्तूत्साहसचिवः कारयति रोगचिकित्साम् । बहुमानं च धारयति वैद्ये, यथा - एषोऽगदङ्कारो मम महत्या रोगपीडाया अपनेता । नानेनारोग्यमात्रं दत्तं मह्यम्, अपि तु वाणिज्य-भोगविलासाद्यपि, तदन्तरेण तदसम्भवात् - इति । तदेतद् दृष्टान्तमुक्तम्, अधुना दार्ष्टान्तिकमाह -

## (१२) कर्मरोगचिकित्सा

**सूत्र : एवं कम्मवाहिगहिए अणुभूअजम्माइवअणे विण्णाया दुक्खरूवेणं निव्विण्णे तत्तओ । तओ सुगुरुवयणेण अणुठ्ठाणाइणा तमवगच्छिअ पुव्वुतविहाणओ पवन्ने सुकिरिअं पव्वज्जं, निरुद्धपमायायारे, असारसुद्धभोइ, मुच्चमाण कम्मवाहिणा, निअत्तमाणिट्ठबिओगाइवेअणे, समुवलब्भ चरणाऽऽरोग्गं पवड्ढमाणसुहभावे तल्लाभनिव्वुइ, तप्पडि-बंधविसेसओ परीसहोवसग्गभावे वि तत्तसंवअणाओ कुसला-सयवुढ्ढीए थिराऽऽसयत्तेण धम्मोवओगाओ सयाथिमिए तेउल्लासाए पवड्ढई ।**

एवं कर्मव्याधिना गृहीतोऽस्ति जीवः । अनन्तशोऽनुभूता

जन्म-जरा-मरण-रोग-शोकाद्यात्मका वेदनाऽनेन । अधुना वेत्त्येनां वेदनां दुःखस्वरूपाम् । न तु दुःखमेवैतत्सुखस्वरूपमितिविपर्यासविषयोभवेदिति भावः । ततश्च परमार्थत उद्विजतेऽतः ।

अत्रान्तरेऽवाप्तः सुवैद्यस्थानीयः सद्गुरुः । तद्वचनेन विज्ञातं सद्गुरुस्वरूपं कर्मरोगलक्षणं च तत्त्वतः । महाभयङ्करः खल्वयं कर्मरोगः । एतदपनयनं यदि न कृतम्, तदाऽनन्तं कालं यावद् बाधते दारुणा पीडा । शिरोवेदनादारभ्य षोडशरोगव्यथा अपि कर्मव्याधिप्रसूता । कर्मैव विभवाभिलाषिणोऽपि दर्शयति दरिद्रताम् । स्वातन्त्र्यसमीहस्यापि वितरति पारतन्त्र्यम् । छेदनादियातनां प्रयच्छति नरकादिभवेषु । न नारकोऽभीष्टमप्यवाप्नोति मृत्युमायुःकर्मरोगेण । तिर्यञ्चोऽपि विषहन्ते तीक्ष्णां क्षुत्तृडाद्युद्भवां वेदनां कर्मातङ्केन । मनुजा अपि दारिद्र्य-प्रेष्यत्व-दौर्भाग्याऽज्ञाना-ऽपयशो-ऽपमाना-ऽन्तरायेष्टवियोगा-ऽनिष्ट-संयोगादिकष्टान् तितिक्षन्ते कर्मरुजैव । देवा अपि मद-मोहे-र्ष्या-च्यवन-वल्लभावियोगादिकां दुःषहां व्यथां विषहन्ते कर्मव्याधिनैव । न हि कर्मरोगापगममन्तरेणैतद्दुःखसन्दोहापगमः सम्भवति जातु ।

अत उपायैरपनेयोऽयं रोगः । प्रवर्त्तितव्यं शुभाश्रवसंवरनिर्जरासु । शुभाश्रवो हि पुण्यानुबन्धिपुण्यवितरणेन वितरति संवरनिर्जरानुकूलसामग्रीम् । संवरो निरुध्णाति नवकर्मप्रवेशम् । निर्जरा च क्षपयति पुराणं कर्म । अत आदृतव्या एत उपायाः । परिहर्त्तव्यं प्रमादाचरणम् । विहातव्यः स्वेच्छाचारः । अप्रमत्ततया,

पालयितव्याः संयमयोगाः । संयमयात्रामात्रार्थमसारं शुद्धं च भोक्तव्यम्, निर्दोषप्रासुकाऽऽहारभोजिना भाव्यमिति भावः । विश्वेऽपि विश्वे श्रेष्ठचिकित्सालयसङ्काशं खलु संयमजीवनम्। तदत्रत्यैर्नियन्त्रणैरपि श्रेष्ठैरेव भाव्यमिति न किञ्चिदनुपपन्नम्।

एवमवगम्य सद्गुरूपासनतस्तद्गोचरो धर्तव्यो बहुमानप्रकर्षः । चारित्रमेव मनुजभवसारभूतमिति मत्वा विधिना तत् प्रतिपद्या-प्रमादसचिवं कुर्यात्तदनुपालनम् । ततो यथा यथा प्रशमं गच्छति कर्मरोगः, तथा तथा दूरीभवति मोहः । नात इष्टवियोग उदेत्यस्य दुर्ध्यानम्, नाप्यनिष्टसंयोगेऽनुशोचनम् । उपशाम्यन्त्यस्य कषायविकाराः । प्रादुर्भवति क्षमादिदश-यतिधर्मरूपमारोग्यम् । सम्यगवलोकनेनैत-त्प्राप्तिमवलोक्य संवर्द्धत आत्मनः शुभो भावः । ततश्चाभिलषत्युत्तरोत्तरं विशिष्टतरं चारित्रलक्षणमारोग्यम् । यथा यथा चोपशाम्यन्ति कर्मरोग-विकारास्तथा तथाऽधिकाधिकारोग्यलाभयोगात्स्फातिमेत्यस्य चारित्रगोचरः पक्षपातः ।

संवेत्त्यसौ यन्नातोऽपि परं जगति किञ्चित् स्पृहणीयम् । ततश्च तदवाप्त्यर्थं सहर्षं विषहत उग्रपरीषहान्, दिव्याद्युपसर्गांश्च । न च बिभेत्येभ्यो मनागपि । सन्ततमपि लक्ष्यतया पश्यति कर्मरोगोपशमप्राप्यमारोग्यम् । अनुभाव एषोऽस्य तत्त्व-संवेदनात्मकस्य सज्ज्ञानस्य । तथा कुशलाशयवृद्ध्या - क्षायोपशमिकभाववृद्ध्या, स्थिराशयत्वेन - चित्तस्थैर्येण हेतुना। तथा धर्मोपयोगात् - इति कर्त्तव्यताबोधात् - मोक्षपर्यन्त-नियताऽऽराधनाबोधात् कारणात्, सदा स्तिमितः -

भावद्वन्द्वविरहात् प्रशान्तः । रत्यरति-रागद्वेष-हर्षशोकाद्यात्मका हि भावद्वन्द्वाः, एतदभावान्निस्तरङ्गमहोदधिवत्प्रशान्त इति हृदयम् । तेजोलेश्यया शुभप्रभावरूपया वर्द्धते - वृद्धिमनुभवति श्रमणः ।

इत्वरकालीनं हि जगतो हास्यादिभवं सुखम् । सदातनं तु गभीराशयस्यानेकगुणं च प्रशमसुखम् । एतद्वक्तव्यता त्वग्रे वक्ष्यते ।

भोगसुखं ह्यनित्यत्वादिकलङ्ककलङ्कितम् । अतस्तद् विहाय नित्यत्वाद्यलङ्कारालङ्कृत - प्रशमसुखार्थं विधेयो यत्नः । तदाह वाचकमुख्यः -

भोगसुखैः किमनित्यैर्भयबहुलैः काङ्क्षितैः परायत्तैः । नित्यमभयमात्मस्थं प्रशमसुखं तत्र यतितव्यम् - इति (प्रशमरतौ) अन्यत्रापिपराधीनं शर्म क्षयि विषयकाङ्क्षौघमलिनं, भवे भीतिस्थानं तदपि कुमतिस्तत्र रमते । बुधास्तु स्वाधीनेऽक्षयिणि करणौत्सुक्यरहिते, निलीनास्तिष्ठन्ति प्रगलितभयाध्यात्मिकसुखे - इति (अध्यात्मसारे ४)

## (१३) गुरुबहुमानः

**सूत्र : गुरुं च बहू मन्नइ जहोचिअं असंगपडिवत्तीए, निसग्गपवित्तिभावेण ।**

**एसा गुरुइ विआहिआ भावसारा विसेसओ भगवंतबहुमाणेणं। 'जो मं पडिमन्नइ से गुरुं' ति तदाणा । अन्नहा किरिआ**

**अकिरिआ कुलडानारी किरआसमा, गरहिआ तत्तवेईणं अफलजोगओ ।**

**विसन्नतत्ती (त्ति) फलमित्थनायं । अवट्टेखु तत्फलं असुहाणुबंधे ।**

**आययो गुरुबहुमाणी अवंझकारत्तेण । अओ परमगुरुसंजोगो । तओ सिद्धी असंसयं ।**

**एसेह सुहोदए पगिट्ठतयणुबंधे भववाहितेगिच्छी न इओ सुंदरं परं । उवमा इत्थ न विज्जइ ।**

तदेतद्भावारोग्यप्रदस्यात्यन्तमुच्चावस्थादायकस्य भाववैद्यस्य गुरोर्महाननुपमश्चोपकारः । अतोऽतिबहुमान-गोचरीकरोत्येनं श्रमणः । यथोचितमसङ्गप्रतिपत्त्या च सेवत एनम् । असङ्गप्रतिपत्त्येति (१) विमुच्य प्रतिकृत्याशंसाम् (२) गुरुगोचरस्नेहरागमन्तरेण (३) स्वभावत एवं तद्बहु-मानादिकं कुर्यात् । भावसारमुरीकुर्यात्तद्गुरुत्वम् । निसर्गप्रवृत्तिभावेन - सांसिद्धिक - प्रवृत्तित्वेन हेतुना, एषाऽसङ्गप्रतिपत्तिर्गुर्वी व्याख्याता भगवद्भिः । यतः - भावसारा, तथौदयिकभावविरहेण, न ह्यस्यां कीर्त्यादिप्रयोजनत्वं मोहनीयोदयात्मकभक्तिभावो वा, अतो गुरुबहुमाने रागमोहनीयादिकर्मोदयरूप औदयिकभावो हेतुर्न भवतीति हृदयम् । अतो हि हृदये प्रशस्ताध्यवसायान्वयः । मलिनरागादि-भावसाचिव्ये तु सा ससङ्गप्रतिपत्तिर्भवेत् । सा च तथाविध-रागाद्यपगमेऽपगच्छति । निसर्गप्रभवा तु रत्नप्रकाशवद्विशुद्धा

स्थिरा च भवति । एतदनुभावेन गुर्वाज्ञैव सर्वत्र प्रयोजकभावं प्रतिपद्यते । गुरोरिच्छैव शिष्यस्येच्छात्वमुपयाति । एतदवस्थान्तरानधिगमे तु तात्त्विकस्य बहुमानस्यैव गुरुगोचरस्य विरह इति सूक्ष्ममीक्षणीयम् ।

एषा ह्यसङ्गप्रतिपत्तिर्मिथ्यात्व-कषायमोहनीयक्षयोपशमप्रभवतया भावसारा भवति । यतो गुरुप्रतिपत्तौ विशेषतोऽचिन्त्यचिन्तामणिसमस्यार्हतो भगवतः प्रतिपत्तिः, गुरुबहुमानो हि परमार्थतस्तीर्थकरप्रतिबन्धः, यत एषा जिनानामाज्ञा यदुत - यो मां प्रतिमन्यते भावतः स गुरुम् - इति ।

अन्यथा - गुरुबहुमानव्यतिरेकेण क्रियाऽप्यक्रिया प्रत्युपेक्षणादिरूपा । अक्रिया- सत्क्रियातोऽन्या । किंविशिष्टा इत्याह-कुलटानारीक्रियासमा - दुःशीलवनितोपवासक्रियातुल्या। यद्यपि कुलटा करोति पतिसेवाम्, व्यनक्ति पातिव्रत्यम्, तथापि परपुरुषे बाढमासक्ततया विफलैव तस्याः सा सा क्रिया । एवं गुरुबहुमानविरहे सकष्टाऽपि चरणक्रिया न मोक्षफला, अपि तु भवबम्भ्रमणपर्यवसानेति तात्पर्यम् ।

ननु च मोक्षफलं चारित्रानुष्ठानमिति प्रसिद्धम्। तत्फलत्वाभावेऽपि संसारफलत्वमस्य कथमिति चेत् ? विषान्नतृप्तिनिदर्शनेनेति गृहाण । तथा हि पुष्टिप्रदमन्नं पुष्णाति शरीरम्। किन्तु यदि तदेव सविषं स्यात्तदा क्षणतृप्तिप्रदत्वेऽपि शीघ्रं प्रकटयत्येव तत् परिणामदारुणत्वमात्मनः । सङ्कोचमिन्ति शिरावृन्दम् । अचिरेणैव प्राप्यते पञ्चता । एवं गुरुबहुमानकरणगोचरजिनाज्ञाविराधनेन संसारफलनिष्पत्तिरिति ज्ञेयम् ।

पुष्टिप्रदभोज्यस्थानीयं चारित्रम्, हालाहलस्थानीया तु जिनाज्ञाविराधना, धर्मप्राणनिर्नाशनहेतुत्वात् ।

एतदेवाह - आवर्त्त एव तत्फलम्, आवर्त्तन्ते प्राणिनोऽस्मिन्नित्यावर्त्तः संसारः, स एव तत्त्वतस्तत्फलं विराधनाविषजन्यम्, किंविशिष्ट आवर्त्त इत्याह - अशुभानुबन्धः, तथा तथा विराधनोत्कर्षेण, भवान्तरेष्वप्यतो विराधनावृद्धिर्भवतीति हृदयम् । एवं सफलं गुर्वबहुमानमभिधाय तद्बहुमानमाह -

गुरुबहुमानः - गुरुभावप्रतिबन्धः, एष एव आयतः, दीर्घकालजीवित्वात्, भवान्तरीयगुरुबहुमानप्राप्तौ वर्तमानस्य गुरुबहुमानस्यामोघकारणत्वात् । अपि चायमानयति विशिष्टतरमपि गुरुबहुमानम् ।

द्रद्र(२) अतो हि परमगुरुलक्षणस्य परमात्मनः संयोगः, ततश्चासंशयं सिद्धिः । एवञ्च गुरुबहुमानो मोक्षस्यावन्ध्यनिबन्धनतया मोक्षः, कारणे कार्योपचारात् । अत्र साद्यपर्यवसितत्वेन दीर्घत्वादायतो मोक्षः । तद्धेतुर्गुरुबहुमानः, मोक्षं प्रत्यप्रतिबद्धसामर्थ्ययोगेन ।

किञ्च शुभोदयो गुरुबहुमानः, तत्प्रभवत्वात्तस्य । न चायं सकृदेव शुभोदयहेतुः, अपि तूत्तरोत्तर विशिष्टतराऽऽराधनाप्रयोजकतया विशिष्टतरशुभोदय-परम्पराजनकः । एवञ्चसाधारणानुपमकारणे कार्यव्यपदेशस्य न्यायोपपन्नतया गुरुबहुमाने शुभोदयव्यपदेशः कृतः, घृतमायुरितिवत् । तथा शुभोदयवृद्धिप्रयोजकतया भवव्याधिचिकित्सको भवति

गुरुबहुमानः, हेतुफलभावात् । विभावनीयमत्र शालिभद्रनिदर्शनम्।

न इतो गुरुबहुमानात् सुन्दरं परम् । नोपमाऽप्यत्र विद्यते, येनोपमीयेताऽसौ । ननु गुरुबहुमानादप्यधिकसुन्दरं भगवद्बहुमानमिति चेत् ? सत्यम्, तथाप्यव्याहतमस्य निरूपमत्वम्, जो मं पडिमन्नइ से गुरुं - इति प्रागुक्तवचनाद् भगवद्बहुमानस्य तदन्तर्गतत्वात्, न च समानौपम्यमस्त्वनयोरिति वाच्यम्, अभिन्नत्वादुभयोः । सुन्दरतमश्च भगवद्बहुमानो विश्वेऽपि विश्वे, अनुपमश्च, अतस्तदात्मकस्य गुरुबहुमानस्यापि तत्त्वमिति न किञ्चिदनुपपन्नम् ।

## (१४) श्रमणतेजोलेश्या

**सूत्र : स एवं पण्णे, एवं भावे, एवं परिणामे, अप्पडिवडिए, वढ्ढमाणे तेउल्लेसाए दुवालसमासिएणं परिआएणं अइकमइ-सव्वदेव तेउल्लेसं एवमाह महामुणी । तओ सुक्के सुक्काभिजाइ भवइ ।**

सः - अधिकृतप्रव्रजितः, एवम्प्रज्ञः - विमलविवेकात् पूर्वोक्तगुरुबहुमानकल्याणस्वरूपावश्यकर्त्तव्यतादिगोचरविशिष्टप्रतीतिसम्पन्नः, एवम्भावः - तथाविधज्ञानावरणीयकर्मोदयेन तादृशविवेकाभावेऽपि गुरुसान्निध्यानुभावेन प्रकृत्या तथाविधशुभभावविभूषितो वा, एवम्परिणामः - सामान्येन गुर्वभावेऽपि क्षयोपशमान्माषतुषवत् तथाविधात्मपरिणतिसमलङ्कृतः । यथोक्तम् - विवेकशुभभावपरिणामा वचनगुरुतदभावेषु यमिनाम् - इति ।

शास्त्राभ्यासानुभावेन विशिष्टं विवेकमाप्नोति श्रमणः । गुरुप्रसादेनाधिगच्छत्यसौ शुभभावम् । कथञ्चित्तदप्राप्तावपि कर्मक्षयोपशमात्तदात्मनि चारित्रपरिणामस्तु स्यादेव, तद्वियोगे श्रामण्यस्याप्ययोगात् । तदेतत्परिणामभावविवेका उत्तरोत्तरं श्रेष्ठाः ।

(१) तत्तद्गुणपरिणतियोगाद्गुणानुकूलमात्मद्रव्यमात्मपरिणामः । स च प्रकटीभवत्यवसरे सामग्रीयोगात् ।

(२) शुभभाव उक्तपरिणामसामग्र्यवसरप्राप्त्या प्रकटीभूतो विशिष्टगुणोल्लासः ।

(३) शास्त्राभ्यासप्रादुर्भूतविशिष्टज्ञानशक्तिप्रयुक्ततत्तद्गुणगोचरविशिष्टप्रतीतिर्विवेकः । अनेन हि निर्णीयते वस्तुनो हेतुस्तत्स्वरूपं तत्फलञ्च । इत्थं ह्यमृतानुष्ठानमनुप्रविशत्याराधना । प्रतिपद्यते च प्रकृतिभावमात्मनः ।

सोपानत्रयेणात्मनो विकासो दर्शितोऽत्र - (१) परिणामः (२) भावः (३) प्रज्ञा । तत्र - (१) तीर्थयात्रादि निमित्तोद्भूतकर्मक्षयोपशमनेन प्रकृत्या शुभभावोदयः परिणामः । (२) तत्रापि गुरुसंयोगेन विशिष्टोल्लासोदयो भावः । (३) जिनवचनपरिणतियोगावाप्यो विवेकः प्रज्ञा ।

यदा हि माषतुषमुनेर्गुरुयोगो नाऽभवत्, तदाप्यात्मनस्तथाविधकर्मलाघवतथाभव्यत्वाभ्यां प्रकृत्या क्षयोपशमयोगेन गुरुबहुमानगोचरदृढतरोपादेयमतिलक्षणः परिणाम उदयमाससाद । ततोऽपि गुरुयोगेन गुरुबहुमानस्य भाव उदभवत् । जम्बूस्वामि-

प्रभृतेर्जिनवचनबोधयोगेन विशिष्टविवेकसचिव उल्लसितो गुरुबहुमानः प्रादुरभूत्, सा प्रज्ञोच्यते । एतत्परिणाम-भाव-प्रज्ञानामप्रतिपतितभावयोगे वर्द्धत आत्मनि तेजोलेश्या ।

यथा यथा हि विषयतृष्णा हीयते तथा तथा प्रशाम्यति चित्तम्, तथा तथा च वर्द्धत आत्मनि प्रशमसुखानुभूतिलक्षणा तेजोलेश्या । द्वादशमासिकेन पर्यायेण - एतावत्कालमानया प्रव्रज्यया, अतिक्रामति सर्वदेवतेजोलेश्याम्, सामान्येन शुभप्रभावरूपाम् । क एवमाह ? महामुनिर्भगवान् महावीरः । तथा चागमः -

जे इमे अज्जत्ताए समणा णिग्गंथा एते णं कस्स तेउलेसं वीतिवयति ? गोयमा ! मास परियाए समणे णिग्गंथे वाणमंतराणं देवाणं तेउलेसं वीइवयइ । एवं दुमासपरियाए समणे णिग्गंथे असुरिंदवज्जियाणं भवणवासीणं देवाणं तेउलेसं वीतिवयति। तिमासपरियाए समणे णिग्गंथे असुरकुमारिंदाणं देवाणं तेउलेसं वीतिवयति । चउमासपरियाए समणे णिग्गंथे गहगणणक्खत्त-तारारूवाणं जोतिसियाणं तेउलेसं वीतिवयति । पंचमासपरियाए समणे णिग्गंथे चंदिमसूरियाणं जोतिसिंदाणं तेउलेसं वीतिवयति। छम्मासपरियाए समणे णिग्गंथे सोहम्मीसाणाणं देवाणं तेउलेसं वीतिवयति । सत्तमासपरियाए समणे णिग्गंथे सणंकुमारमाहिंदाणं देवाणं तेउलेसं वीतिवयति । अट्ठमासपरियाए समणे णिग्गंथे बंभलोगलंतगाणं देवाणं तेउलेसं वीतिवयति । णवमासपरियाए समणे णिग्गंथे महासुक्कसहस्साराणं देवाणं तेउलेसं वीतिवयति। दसमासपरियाए समणे णिग्गंथे आणय-पाणय-आरणा-च्चुयाणं

देवाणं तेउलेस्सं वीतिवयति । एकारसमासपरियाए समणे गेविज्जाणं देवाणं तेउलेस्सं वीतिवयति । बारसमासपरियाए अणुत्तरोववातियाणं तेउलेस्सं वीतिवयति । तेण परं सुक्के सुक्काभिजाती भवित्ता सिज्झति, जाव अंतं करेति - इति (व्याख्याप्रज्ञप्तौ)

अत्रोपरितनोपरितनसुराणामधिकाधिकं भवति प्रशमसुखम्, अल्पतराल्पतरविषयतृष्णत्वात् । तेष्वपि नवमादिसुरलोकसुरास्तु मनःप्रवीचाराः । ग्रैवेयकादिसुरास्तु निर्विकारा एव । न हि परमसुखनिमग्नानां तेषां कदाचिदपि जागर्त्ति कामभोगतृष्णा। प्रत्याहाराद्याराधनानुभावेन द्वादशमासपर्यायो मुनिरतिक्रामत्यनुत्तरसुरस्यापि प्रशमसुखम् । एतेन ज्ञायते यच्चारित्रस्य कीदृशी परिणतिस्स्यात् । न हि वैदुष्याद्येव चारित्रे प्रमाणम्, किन्तु रागादिविकारोपशमपुरस्सरं श्रुतोपयोगमग्नत्वसचिवं प्रशमोपवनविहरणम् ।

एवं प्रशमविशेषमवाप्य शुक्लः शुक्लाभिजात्यो भवत्यात्मा। तत्र शुक्लो नामाभिन्नवृत्तोऽमत्सरी कृतज्ञः सदारम्भी हितानुबन्ध इति । शुक्लो नामोज्ज्वलसंयमभावसम्पन्नः । एतद्भावस्य लक्षणपञ्चकं सूचयति, यदेतद्भावप्राप्त्यर्थमुपायपञ्चकमादृतव्यम्, तद्यथा -

(१) महाव्रतानामखण्डं पालनं कर्त्तव्यम् । अहिंसादिव्रतेष्वतिचारयोगेन मलिनी भवत्यात्मपरिणामः । उदेति तामसभावः । द्वितयमत्र भावमालिन्यप्रयोजकम्, हिंसाद्य-

ध्यवसायः, प्रतिज्ञापालनोपेक्षा च ।

(२) अमत्सरिणा भाव्यम् । न कदापि परगुणविभवाद्यसहिष्णुता कार्या । नावकाशो देय इर्ष्यादेः । सम्भवति स्वतोऽधिकतपःश्रुतादिसम्पन्ने मत्सरभावः । स च नाशयति कषायक्षयोपशमात्मकं चारित्रपरिणामम्, तथा चार्षम् - सुट्ठु वि उज्जममाणं पंचेव करेंति रित्तयं समणं ।अप्पथुई परनिंदा जिब्भोवत्था कसाया य - इति (उपदेशमालायाम्)

अतः पूर्वोक्तैः समशत्रुमित्रभाव-सूत्राध्ययन-गुरुबहुमानादिभिः प्रशमस्फात्यापादनेन कर्त्तव्यो मात्सर्यनिकारः । न च गुरुबहुमानतो नाम कथं मत्सरनिरोधः सम्भवीति वाच्यम्, निःशेषगुणगङ्गाहिमाचलसङ्काशत्वाद् गुरुबहुमानस्य । दृष्टश्च तत्सम्भवः श्रीवज्रस्वामिवृत्ते, तदुक्तम् - सिरिसीहगिरिसीसाणं भद्दं गुरुवयणसद्दहंताणं । वयरो किर दाही वायणं ति न विकोवियं वयणं - इति (उपदेशमालायाम्) गुरुबहुमानविरहे तु प्रायोऽभविष्यत्तत्र मात्सर्योदय इति भावनीयम् ।

(३) सन्ततमपि धारणीयो गुर्वादिगोचरः कृतज्ञभावः । आत्मोन्नतिप्रयोजको महान् हि तत्कृत उपकारः । न कदाचिदपि विस्मर्त्तव्य एषः । न हि पारुष्याहङ्कारस्वार्थलाम्पट्यान्यन्तरेण सम्भवति तद्विस्मरणम् । एते च दोषा धर्मपीठिकाभूतान् प्रतिबध्नन्ति मार्दव-तत्त्वाभिनिवेशगुणाभिलाषादिकान् गुणान्। अतो गणयितव्याः पारुष्यादिदोषा आत्मघातकतया । धर्त्तव्यः सदापि कृतज्ञभावः । एवमेव शुक्लत्वावाप्तेरिति ।

(४) भाव्यं सदारम्भेण । श्रुतस्वाध्याय-आवश्यक-प्रतिलेखना-विहारप्रभृतयो मुनीनां सदारम्भाः । एतत्प्रवृत्तिविरहे तु विकथाद्यनर्थपात इति भावनीयम् ।

(५) सदारम्भोऽपि हितानुबन्ध्येव कर्त्तव्यः । एतदर्थं निराशंसतया निरतिचारमाराधनाऽऽवश्यका । भावयितव्या निरन्तरं वैराग्यमैत्रीप्रभृतयो भावनाः । भावप्रतिबन्धः कर्त्तव्यो जिनाज्ञायाम् । पदे पदे जिनवचःपुरस्करणं बीजं कल्याण-परम्परायाः । अतो हितानुबन्ध्येतत् ।

एवमभिन्नवृत्तत्वादिविशिष्टः शुक्ल उच्यते । शुक्लाभि-जात्यस्तु विशिष्टतरोक्तगुणसम्पन्नतया शुक्लजीवेषु प्रधानभूतः।

**सूत्र : पायं छिण्णकमाणुबंधे खवइ लोगसण्णं, पहिसोअगामी, अणुसोअनिवित्ते, सया सुहजोगे एस जोगी वियाहिए ।**

स च प्रायश्छिन्नकर्मानुबन्धो भवति । तत्सत्तागतकर्मसु स्वोदयकाले नवकर्मबन्धप्रयोजिका शक्तिर्व्यवच्छिन्ना भवतीति भावः । यथा श्रमणस्य भगवतो महावीरस्य कर्णशलाकोप-सर्गनिबन्धनं कर्म व्युच्छिन्नबीजशक्तिकतया नवकर्मबन्धनिबन्धनं न बभूवेति । प्रायोग्रहणमचिन्त्यत्वात्कर्मशक्तेः समर्थसानुबन्ध-कर्मोदये कदाचिद् बध्नात्यपि ।

उक्तोऽनुबन्धविच्छेदः प्रागुक्ततेजोलेश्याशुक्लत्व प्रयोजक-गुणगणमूलकः । एतत्प्रतिपक्षदोषैस्तु पुष्टिरेवाशुभकर्मानुबन्धानाम्। स एवम्भूतो व्यवच्छिन्नानुबन्धः क्षपयति भगवद्वचनप्रतिकूलां

लोकसञ्ज्ञाम् प्रभूतसंसाराभिनन्दिसत्त्वक्रियाप्रीतिरूपा हि लोकसञ्ज्ञा । कथन्नामाङ्गे लोके मत्सौन्दर्यं प्रकटीभवेत् ? किमुचितं प्रतिभाति लोकस्य ? तदेवानुसराम्यहम् - इति चित्तवृत्तिर्हि लोकसञ्ज्ञा । तां जित्वा परिहरति मुनिः । न हि जिनवचस्यत्यन्तमनुरक्तस्य तद्विरुद्धायामेकतरस्यामपि लोकप्रवृत्त्यामनुरज्यति चेतः ।

लोकसञ्ज्ञाविजयेन प्रतिस्रोतोगामी भवति मुनिः । निवर्त्ततेऽसावनुस्रोतोगमनात् । इत्थञ्च लोकाचारप्रवाहनदीं प्रति प्रतिस्रोतोगामी मुनिः । न हि भवाभिनन्दिप्रीति-हेतुसंसारवर्धनेन्द्रियमनोऽनुकूलायां प्रवृत्तावनुयुज्यत एषः । अपि तु तत्प्रतीपं कुरुते गमनम् । एतच्चाभ्यासातिशयेन सन्ततप्रयत्नात्मकेन सम्भवि । न्याय्यं चैतत्, यत्पारमर्षम् - अणुसोयपट्ठिए बहुजणम्मि । पडिसोअलद्धलक्खेणं पडिसोयमेव अप्पा दायव्वो होउकामेणं । अणुसोयसुहो लोओ पडिसोए आसवो सुविहियाणं । अणुसोओ संसारो पडिसोओ तस्स उत्तारो - इति (दशवैकालिके)

भावनीयान्यत्र मेघकुमार-शालिभद्रप्रभृतिनिदर्शनानि, सनत्कुमारराजर्षिणाऽवगणितः पृष्ठलग्नः समग्रः परिवारः । उच्यत एतत्प्रतिस्रोतगमनम् । एवं लौकिकधर्मादत्यन्तं भिन्ने लोकोत्तरे श्रमणधर्मे नित्यं परायणो भवत्यसौ । एवं सदा शुभयोगः - श्रामण्यव्यापारसङ्गतः, एष योगी व्याख्यातः । एवम्भूतो भगवद्भिर्योगी प्रतिपादितः, यथोक्तम् - सम्यक्त्वज्ञानचारित्रयोगः सद्योग उच्यते । एतद्योगाद्धि योगी

स्यात्, परमब्रह्मसाधकः - इति ।

**सूत्र : एस आराहगे सामण्णस्स, जहागहिअपईण्णे, सव्वोवहासुद्धे, संधइसुद्धगं भवं सम्मं अभवसाहगं भोगकिरिआ-सुरूवाइकप्पं । तओ ता संपुण्णा पाउणइ अविगलहेउभावओ असंकिलिट्ठसुहरूवाओ अपरोवताविणो सुंदरा अणुबंधेण । न य अन्ना संपुण्णा, तत्तत्तखंडणेण ।**

एष एवम्भूत आराधकः श्रामण्यस्य, निष्पादकः श्रमण-भावस्य, यथा गृहीतप्रतिज्ञः, आदित आरभ्य सम्यक्प्रवृत्तेः। एवं सर्वोपधिविशुद्धः, निरतिचारत्वेन, सन्धत्ते - घटयति, शुद्धं भवं जन्मविशेषलक्षणं भवैरेव, अयमेव विशेष्यते - सम्यग्भव-साधकम्, सत्क्रियाकरणेन मोक्षसाधकमित्यर्थः । असङ्ख्य-जन्मोपचितानि कर्माण्यपर्यन्तभवसञ्चिताश्च वासना आत्मसंयोगं भजन्ते । तदात्यन्तिकक्षयमन्तरेण दुर्घटा मोक्षः । तत्क्षयोऽपि दुर्लभ इहैव भवे । अतः प्रथमभवीयविशिष्टाराधनानन्तरमपि भवग्रहणानि तु कर्त्तव्यान्यवशिष्यन्ते । प्रसिद्धमेतत् पृथ्वीचन्द्रादि-वृत्तेषु । तथापि तेषु भवेषु सङ्क्लेशरहितो भवति भोगः, पूर्वानुबन्धानुभावात् । तेषु सत्यपि विभवभोग उत्तरोत्तरं वर्द्धत आत्मविशुद्धिः । ततोऽपि पर्यन्तो भवो भविष्यति विशुद्धतमः, यत्र सेत्स्यति सर्वथा विशुद्धमनुष्ठानम् । ततश्चैष भवो भविष्यति मोक्षसाधकः, तदनन्तरमेव मुक्त्यवाप्तेः ।

न हि तादृशं शुद्धं भवमन्तरेण भवाभावयोगः, यथा न सुरूपत्वादिकं भोगसाधनमन्तरेण सम्पूर्णभोगक्रियाः सम्यग् भवन्ति । आदिना वयः विचक्षणत्व-सौभाग्य-माधुर्य-

ऐश्वर्यप्रभृतिग्रहः । एषा हि सामग्री सम्पूर्णभोगक्रियां प्रति निमित्तभावं प्रतिपद्यते । उक्तञ्च-रूपवयोवैचक्षण्य-सौभाग्य-माधुर्यैश्वर्याणि भोगसाधनम् - इति । ततस्ताः सम्पूर्णाः प्राप्नोति सुरूपादिकल्पाद् भवाद् भोगक्रियाः, अविकलहेतुभावतः । ताश्चासङ्क्लिष्टसुखरूपाः, शून्यताभावेन - गृद्ध्यादिदोष-विरहसद्भावेन सङ्क्लेशाभावात् ।

नाप्यन्यसन्तापकारिण्यो भवन्ति ता भोगक्रियाः । वैचक्षण्यादिगुणसन्दोहेन सम्भवत्येतदपि । एवञ्चानुबन्धेनाप्या चरमभवं सुन्दरा भवन्त्येताः । सङ्क्लेशेन परपरितापेन वाऽनाचरितत्वात् । इतरा तु भोगक्रियाऽसुन्दराः, सङ्क्लेश-सहितत्वात्, परपरितापकत्वाच्च । एवञ्च तत्सतत्त्वाभाव एवेति निपुणं निभालनीयम् । सैव परमार्थतो भोगक्रिया, येहलोके स्वात्मसङ्क्लेश-परात्मपरितापतो-ऽकलङ्कितं वितरति सौख्यम्, प्रेत्य चाऽऽमुक्तिं प्रयच्छति सानुबन्धं सुन्दरं सौख्यम् ।

ननु च कथमत्र श्रामण्य फलत्वेन भोगक्रियाऽभिहितेति चेत् ? अत्रोच्यते, श्रामण्यस्य प्रधानफलं तु मोक्षसाधकस्य चरमभवस्यानुसन्धानमेवेति प्रागुक्तम् । किन्तु तद्भवद्वितय-मध्येऽपि भवन्ति भवग्रहणानि । तेष्वपि पुण्यतो विशिष्ट-भोगसुखप्राप्तिर्भवति । ते च भोगा निरतिचारनिराशं-सोच्चाराधनानुभावेन सङ्क्लेशरहिताः परासन्तापका अशुभानुबन्धाकलङ्किताश्च । नैभिर्लिप्यत आत्मा, जलेन पुष्करपलाशवत् । अत एवावसरे सुखेन भवति तत्त्यागश्चारित्रग्रहणञ्च । नात्र भवति विलम्बः । अत एव

विशिष्टतरा भवति चरणाराधना । ततोऽप्युच्चतरसुरलोकावाप्तिः। ततोऽपि विशिष्टतराऽऽराधना मनुजभवे । एतत्क्रमेणावाप्यते चरमभवः । तत्सन्धाने प्रथमभवीयचरणाराधना प्रयोजिका । अत्र मध्यतनेषु भवेषु या भोगक्रिया अवाप्यन्ते, ताः सङ्क्लेश-रहितं निर्लेपं चात्मावस्थानं न बाधन्ते । योजयन्त्युच्च-तराराधनायाम् । दृश्यत एतत् समरादित्यकेवलिसत्के भवनवके। एतदाशयेनात्र भोगक्रियानिर्देश इति सर्वमवदातम् ।

**सूत्र : एअं नाणं ति वुच्चइ । एअम्मि सुहजोगसिद्धी उचितपडिवत्तिपहाणा । इत्थ भावो पवत्तगो । पायं विग्घो न विज्जइ निरणुबंधा सुहकम्मभावेण । अक्खित्ताओ ईमे जोगा भावाराहणाओ । तहा तओ सम्मं पवत्तइ, निप्फायई अणाउले।**

ज्ञानक्रियाभ्यां मोक्षः, एतत्सूत्रस्थं ज्ञानं किं ? क्रिया च का ? तदत्र दर्शयन्नाह - (१) पूर्वोक्ताराधनागोचरोऽतीव श्रद्धासम्पन्नः सम्यग्बोधो ज्ञानम्, इष्टवस्तुतत्त्वनिरूपकत्वात्। (२) सा च क्रिया, या प्रोक्तज्ञानदशायां शुभयोगसिद्धिः । एतस्मिन् ज्ञाने सति शुभव्यापारनिष्पत्तिः । लोकद्वयेऽपीष्ट-हेतुप्रवृत्तिरनेन जन्यत इति भावः । एतच्छुभयोगे सम्यज्ज्ञान-दशावलोकनेन भिन्नभिन्नानुबन्धगोचरं निपुणं भवति निरीक्षणम्।

पश्यति श्रमणो ज्ञानदृशा, यच्छुभक्रियाकाले हृदये किंस्वरूपोऽस्त्यनुबन्धः । यदि हि भावो विशुद्धस्तदा शुभानुबन्धिपुण्यबन्धः । कषायोदय-खेदादिदोष-भावे तु भवेदशुभानुबन्धिकर्मबन्धः । अतो शरव्यीकर्त्तव्या भावविशुद्धिः। तद्भावे च सर्वत्रोचितप्रतिपत्तिप्रधानैव स्यात्प्रवृत्तिः । न

कुत्राप्यनुचितप्रवर्त्तनं स्यात्तस्य, एवमेव तच्छुभयोगस्य ज्ञान-दशानुप्रवेशसम्भवात् । न ह्यनुचिताचरणभावे ज्ञानदशागन्धोऽपि, तादृशाचरणस्यैव स्पष्टतया मौढ्यलक्ष्मत्वात् । सति च मौढ्येऽशुभो भवत्यनुबन्धः ।

ननु चायुक्त एष आग्रहः, यज्ज्ञानसद्भावेऽल्पाऽपि न भवत्येवानुचितप्रवृत्तिरिति चेत् ? न, न ज्ञस्तदारभते यद्विनाशयति । विनाशाभावापादनार्थं कर्त्तव्योचितप्रवृत्तिः, निवर्त्तितव्यं चानुचितप्रवृत्तेः । न ह्यतोऽन्यथा सम्भवी विनाशपरिहारः । अनुचिताचरणेनैव क्लिश्यते जीवः, रावणवत्, रोहगुप्तवच्च न ह्येतदाचरणभावे ज्ञानदशासद्भावोऽभ्युपपत्तुं युक्तः ।

अत एवाह-अत्र - ज्ञानयुक्तानुष्ठाने भावः - सदन्तःकरण-लक्षणः प्रवर्त्तकः, न मूढहृदयमिति भावः । यदि त्वन्तःकरणं मोहद्वेषेर्ष्याऽऽसक्तिमदमायादैन्याद्यशुभभावसचिवं स्यात्, तदनुभावकलङ्कितं वा स्यात्, तदा धर्मप्रवृत्तिसद्भावेऽपि दुर्घटा सज्ज्ञानयुक्तता । तथाविधधर्मव्यापारप्रवर्त्तिका या काचिदपि मोहवासना भवति । एवञ्च धर्मप्रवृत्तित्वमेव तस्यामनुपपन्नम्, सज्ज्ञानमूलकत्वात्तात्त्विकस्य धर्मयोगस्य । स च सदन्तःकरणेन प्रवर्त्तते । अतः प्रधानमिदम् । एतदवगम्य धर्मप्रवृत्तेः प्रागेव पवित्रीकर्त्तव्यं हृदयम् । यथा न कापि मलिनवासना हृदि स्थितिं बध्नीयात् । ततश्च सा धर्मप्रवृत्तिः सज्ज्ञानसचिवा भवेत् । ततोऽपि मोहवासनानिर्विण्णं चित्तं तस्यामेकायनभावमुपेयात् । न हि पाण्डित्यं सज्ज्ञानम्, अपि त्वल्पाऽपि शुद्धसंवित्तिपरिणतिरिति ध्येयम् । सैव पारमार्थिक-

धर्मप्रवृत्तिप्रयोजिकेति ।

एतत्प्रयुक्तधर्मप्रवृत्तौ प्रायो विघ्नं न विद्यते, सदुपाय-विहितत्वात्तस्याः । सदुपायाश्च प्रागुक्तचतुःशरण-गमनादयः गुरुबहुमानश्रुतोपासनादिगुणगणपर्यन्ताः । न चैषु सत्सु विघ्ननिपातो नाम ।

ननु च पूर्वकृतकर्मोदयेन सम्भवत्यपि विघ्नमिति चेत् ? सत्यम्, तथापि न तद् बाधयितुं प्रत्यलं धर्मप्रवृत्तिम्, सदुपायप्रयुक्तत्वादेव । एवञ्च तत्र विघ्नत्वस्यैव विरहः । यथा सङ्गमकेन श्रीवीरधर्मप्रवृत्तिं बाधयितुं यत्नः कृतः । किन्तु तद्भावेऽपि श्रीवीरस्य तु स्फातिरेव सञ्जाता धर्मप्रवृत्तेरिति विघ्नरूपतामेव नापुः सङ्गमकस्याऽऽयासाः । तदेष सदुपायानुभावः, यन्न तद्योगे विघ्नसम्भव इति ।

सदुपाययोगेन विघ्नाभावे बीजमाह-निरनुबनधाशुभकर्मभावेन - इति । यद्यपि शुभाशुभोभयकर्मसञ्चयो भवत्यात्मनि, किन्तु नाधिकृतस्य श्रमणस्य सत्तागतकर्मसु स्वोदयकाले नवाशुभकर्मबन्धहेतुबीजशक्तिर्भवति । सानुबन्धं ह्यशुभं कर्म न केवलमप्रशस्तं फलं वितरति, अपि त्वशुभबीजशक्त्यनुभावेन मलिनीकुरुते बुद्धिम् । जनयति हृदये सङ्क्लेशम् । ततश्च नूतनोऽपि स्यात्कर्मबन्धः । वस्तुतस्तु सानुबन्धकर्मवतः कर्मगौरवेण तात्त्विकः प्रव्रज्यायोग एव न भवति । अत एव नास्य सदुपायप्रवृत्तिरपि ।

एतज्ज्ञानयुक्तशुभचरणयोगा आकृष्यन्ते भावाऽऽराधनात् ।

भावाराधननिबनधनं च पूर्वभवकृततद्बहुमानप्रशंसादिकम् । अनेकजन्माऽऽराधनायोगेन प्राप्यन्ते सच्चरणयोगा इति तात्पर्यम्। तत आक्षेपात् सम्यक् प्रवर्त्तते, नियमनिष्पादकत्वेन। ततश्चाऽनाकुलः सन् निष्पादयतीष्टम् ।

## (१८) सत्क्रियाफलम्

**सूत्र : एवं किरिया सुकिरिआ, एगंतनिक्कलंका, निक्कलंकऽत्थसाहिआ, तहा सुहाणुबंधा उत्तरुतरजोगसिद्धीए। तओ से साहई परं परत्थं सम्मं, तक्कुसले सया, तेहिं तेहिं पयारेहिं साणुबन्धं महोदए, बीज-बीजादिट्ठावणेणं कत्तिविरियाइजुत्ते, अवंझसुहचिट्ठे, समंतभद्दे, सुप्पणिहाणाइ-हेऊ, मोहतिमिरदीवे, रागामयवेज्जे, दोसाणलजलणिही, संवेगसिद्धिकरे हवइ अचिंतचिंतामणिकप्पे ।**

एवं भावाराधनारूपा सज्ज्ञानपुरस्सरमनुष्ठीयमाना चरणक्रिया सुक्रिया भवति, सज्ज्ञानमूलकत्वादेवौचित्य-सचिवत्वात् । आध्यात्मिकविकास एवोदेत्यस्यामुपादेयमतिः। किञ्चाधिकृतस्य श्रमणस्य प्रव्रज्यायाः प्रागप्युचिताऽऽचार-पुरस्सरमेव प्रव्रज्याग्रहणं बभूव एवं च हृदयविशुद्धिप्रभावेण विवेकानुभावेन च प्रकृत्या शोभनैव भवति चरणक्रियेति ।

किञ्चैषैकान्तेन निष्कलङ्का भवति, नास्यां काप्यतिचारा भवन्ति, अतोऽत्यन्तं शून्यैषा दोषमालिन्येन । कथङ्कारं सुक्रियासाधकोऽतिचारमलिनीकुर्यात् स्वमनुष्ठानम् ? स तु लेशेनापि न निषेवते रागादिप्रमादम् । ततश्चासम्भव्यस्य

दोषोपरागः ।

अत एवैषा क्रिया सर्वकर्मकलङ्कविमुक्तस्य मोक्षस्य साधिका । एतेन कुक्रिया, सदोषसुक्रिया मलिनाशयतः क्रियमाणा वा निर्दोषाऽपि सुक्रिया न साधयति मोक्षमित्यावेदितम् । सुक्रियानुभाव एष यदत उत्तरोत्तरशुभयोगसिद्ध्या शुभानुबन्धप्रसूतिः । नास्यां बाधते प्रमादाचरणम् । एवं निरन्तरं चरणयोगप्रवृत्त्या चित्ते सञ्जायते प्रशस्तपरिणामपरम्परा ।

शुभानुबन्धा निरन्तरा चरणक्रिया सम्पादयति परार्थमपि। परार्थः - परोपकारः । स च द्विविधः - (१) गौणः - अन्नदानादिः, मिथ्यादृक्प्रकल्पिततत्त्वबोधदानं वा । (२) प्रधानः - बोधिबीजादिस्थापनम् । अधिकृतो मुनिः सम्यगवैपरीत्यं यथा स्यात्तथा परम् - प्रधानं परार्थं साधयति । पापप्रतिघातगुण-बीजाधानाद्यापादनक्रमेणोपकुरुते परानिति भावः, एवमेवोपकार-सम्भवात् ।

परार्थः सत्यार्थः - इति टीकागतपाठेऽयमर्थः - सद्भ्यो हितं सत्यम् । तत्र द्रव्यहितम् - दुःखनाशः, भावहितम् - आत्मविशुद्धिः । सम्भाव्यतेऽत्र सत्त्वार्थ इति पाठः । तत्र सत्त्वाः - जीवाः, तेषामर्थः - इष्टप्रयोजनम्, तदेव परार्थः । न च परार्थः श्रेष्ठप्रयोजनं मोक्ष इत्येवास्त्वर्थ इति वाच्यम्, मूलकारोपन्यस्तस्य पर-इति परार्थविशेषणस्य वैयर्थ्यापत्तेः । किञ्चैवमग्रतनस्य बीजबीजादिस्थापनेनेतिपाठस्याप्यनुपपत्तिरिति यथोक्त एवार्थ उचितः ।

सदैष भवति परार्थकुशलः, तत्तज्जीवयोग्यत्वाद्यनुसारेण तद्धितं साधयतीत्यर्थः ।

प्रवचनप्रभावकैस्तैस्तैः प्रकारैर्बीजबीजादिस्थापनेन साधयत्येष परार्थम् । तत्र बीजम् - मोक्षबीजम् - सम्यक्त्वम्, तस्य बीजम् - बीजोपनायकं प्रवचनप्रशंसादिकम्, आदिना जिनधर्माभिलाषलक्षणाऽङ्कुरादिग्रहः । विशिष्टोपदेशदानतः विशिष्टतपःकरणेन जिनमतस्थापकवादकरणेन सङ्घयात्रादिना चाऽऽकृष्यन्ते जिनधर्मं प्रति जनाः - अहो सुन्दर एष धर्मः । एवञ्च बीजबीजस्य-सम्यक्त्वलक्षणबीजकारणस्य न्यासो भवति।

परार्थमप्येष सानुबन्धं साधयति । नापादयति परेषु विषयसुखाऽऽशंसाम् । स्थापयति तन्मतावुपादेयतया शुद्धं कल्याणमार्गम् । एवञ्च विशुद्धभावनात्मकानां प्रवचनप्रशंसादीनां योगेनाग्रेऽपि तत्परम्पराप्रसूतिः । एवञ्च सानुबन्धभावयोगः । परार्थसाधकोऽप्ययं सानुबन्धतां प्रापयति स्वकृतं परोपकारम्, निराशंसभावेन विशुद्धाशयेन च । एवञ्च स्वपरोभयकल्याण-परम्पराया अविच्छेदः ।

किञ्च परार्थसाधको महोदयो भवति, स्वसिद्धधर्मस्य परेषु साधकतया महोन्नतियोगित्वात् । अपि चैष कर्तृवीर्यादियुक्तः। तत्र कर्तृ - परार्थप्रयोजकम्, वीर्यम् - सामर्थ्यम्, तेन युक्तः - विभूषितोऽसौ भवति, आदिनोत्साह-प्रतिभादिग्रहः, इत्थमेव परार्थकरणसम्भवात्, अन्यथा खेदादिना तद्विच्छेदाच्च । अत एवावन्ध्यशुभचेष्टो भवत्यसौ, परार्थसम्पादनलक्षणामोघ-

फलप्रदत्वात्तद्यत्नस्य ।

ननु दृष्टमेवोपदेशादिपरार्थप्रवृत्तैर्वैफल्यमिति चेत् ? सत्यम्, किन्तु तत्र कर्त्रादिवैगुण्यं हेतुः । न हि परोपदेशमात्रपण्डितानां साफल्यमृच्छति वचनश्रमः । श्रामण्यसुस्थितानां तु देशनावचः न निष्फलतां गच्छति, आपातेन तत्ताप्रतीतावपि परमार्थतः पापभीरुत्वादिफलत्वात्तस्य । नाप्ययोग्येऽभियोगमपि कुर्वन्ति ते, परार्थकुशलत्वात् । अतो न तेषां प्रवृत्तेर्नैरर्थ्यसम्भवः ।

तथैष परार्थसाधक आत्मा समन्तभद्रः - परिसमन्तात्कल्याणस्वरूपः, सौम्यमुद्रत्वात्, कल्याणकृद्वचनोपेतत्वात्, कल्याणयोनिप्रवृत्तिमात्रप्रवृत्तत्वात्, मार्दवालङ्कृतप्रकृतिकत्वात्, सौजन्यविभूषितत्त्वात्, उदाराशयत्वाच्च ।

तमेव विशेषयति - सुप्रणिधानादिहेतुः । आत्मार्थे परार्थे वाऽपि प्रवृत्तोऽसौ सर्वत्र सत्प्रणिधान-प्रवृत्ति-विघ्नजय-सिद्ध्युपेतो भवति । न चास्य न्यूनता भवति क्वापि । एवञ्चान्येषामपि जनयति सत्प्रणिधानादिकम् । दृष्टचरमेतद् यत् सर्वथा सुगुणोऽध्यापकोऽध्येतारमपि सर्वथा सुगुणत्वाद्युपेतं करोति । एवं समन्तभद्रोपदिष्टा अन्येऽपि भव्यात्मानः सत्प्रणिधानादिसम्पन्ना भवन्ति ।

तमेव विशेषयति - मोहतिमिरदीपः, प्रदीपवद्दूरीकरोत्येष मोहान्धकारमित्याकूतम् । उपशामयत्यसौ जीवस्य मौढ्यं स्वमुद्रादर्शनमात्रेण । निराकरोत्यज्ञान-कुमति-कदाग्रहाद्यन्धतमसं स्ववचः प्रकाशैः ।

पुनरपि तमेव विशेषयति - रागाऽऽमयवैद्यः, वैराग्यविग्रहस्यास्य तादृशा तपश्चरणज्ञानयोगा भवन्ति, ये विदधन्ति परेषामपि रागरोगचिकित्साम् । प्रतिष्ठापयन्ति परेषामपि हृदि विरागभावम् ।

किञ्चैष द्वेषानलजलनिधिः, उपशमरसैकरसीभूततन्मुद्रावचनयोर्द्वेषदवानलप्रशमनिबन्धनत्वात्, अत एवायं संवेगसिद्धिकरः । स्वयमप्येष जीवति धर्मजीवनम् । अवगणयति विषयसौख्यानि । धारयति निर्विकारे नयने । विभ्राजतेऽध्यात्मतेजसा । भापयति मोहान्धान् स्वकीयसुदुष्कराराधनादर्शनेन। प्रसारयति जिनवचःजाह्नवीम् । एवञ्च परेषामपि साधयत्येष संवेगम्, जनयति तेषु मोक्षाभिलाषप्रकर्षम्, प्रसूतेतरां च शुद्धधर्मस्वरसमित्यर्थः ।

तमेव विशेषयति - अचिन्त्यचिन्तामणिकल्पः, मोहनाशादिहेतुतयैकान्तसुखकारणत्वात्, न हि मोहादिसद्भावे तात्त्विकं सुखमुदेति जातु । दोषोपशमानुभावेनानुभूयते चिन्तातीतं सौख्यम् । तदेतदचिन्त्यसिद्धिप्रापको महात्माऽचिन्त्यचिन्तामणिसम इति युक्तमुक्तम् ।

**सूत्र : स एवं परंपरत्थसाहए तहाकरुणाइभावओ, अणेगेहिं भवेहिं विमुच्चमाणे पावकम्मुणा, पवड्ढमाणे अ सुहभावेहिं, अणेगभविआए आराहणाए पाउणइ सव्वुत्तमं भवं चरमं, अचरमभवहेउं, अविगलपरंपरत्थनिमित्तं । तत्थ काउण निरवसेसं किच्चं विहूअरयमले सिज्झइ, बुज्झई, मुच्चई, परिनिव्वाई, सव्वदुक्खाणमंतं करेइ ।**

(- इअ पवज्जापरिपालणासुत्तं समत्तं)

प्रव्रजित उत्तमपुरुषः प्रधानयोग्यतोपेततया तथाविधकारुण्य-पुण्यहृदयत्वेन विभावयति, यथा -

**मोहान्धकारगहने, संसारे दुःखिता बत ।**
**सत्त्वाः परिभ्रमन्त्युच्चैः, सत्यस्मिन् धर्मतेजसि ।।**
**अहमेतानतः कृच्छ्राद्यथायोगं कथञ्चन ।**
**अनेनोत्तारयामीति, वरबोधिसमन्वितः ।।**
**तथाभव्यत्वयोगेन, कुर्वन् सत्त्वार्थमेव सः ।**
**तीर्थकृत्त्वमवाप्नोति परं सत्त्वार्थसाधनम् ।।**

(योगबिन्दौ२८५, २८६, २८८) एवं तीर्थकरादिभवमवाप्य साधयत्युत्तरोत्तरं विशिष्टं परार्थम् । एवमनेकजन्माऽऽराधना-भिर्विमुच्यतेऽसौ ज्ञानावरणादिभिः कर्मभिः । वर्द्धते संवेगादिभिः प्रशस्तैः परिणामैः । यथा प्रतिदिनं सूर्यावलोकने कृते प्रतिदिवसं नवमेव तत्तेजोऽनुभूयते, तथाऽत्मन्याराधनानुभावेन प्रतिदिनं नवः नवः संवेगरसोऽनुभूयते । नाप्यत्र सूर्यदर्शनद्वयमध्ये रात्रिवत्संवेगद्वयमध्येऽसंवेगो भवति । सन्ततमप्यात्म-निरीक्षणानु-भावेन ज्ञानाद्यभ्यासेन च तदसम्भवात्, यत् पारमर्षम् - जो पुव्वरत्तावररत्तकाले, संपिक्खए अप्पगमप्पगेण । किं मे कडं किं च मे किच्चसेसं ? किं सक्कणीज्जं न समायरामि ।। किं मे परो पासइ किं च अप्पा, किं वाऽहं खलियं न विवज्जयामि । इच्चेव सम्ममणुपासमाणो अणागयं नो खलियं कुज्जा - इति (दशवैकालिके चूलिकायाम् २) ।

तदेष सर्वश्रेष्ठो भवश्चरमभवः संसारे, आनन्तर्येण मोक्षहेतुत्वात्तस्य । उत्तमं ह्येतज्जन्म श्रेष्ठयशआदेयसौभाग्य-सुस्वरादिपुण्यकर्मोदयोपेततयाऽविकलपरपरार्थनिमित्तमपि भवति। तत्र करोत्येष महापुरुषः सर्वमुचितं कृत्यम् । ततश्च विधूतरजोमलो बध्यमानप्राग्बद्धकर्मरहितो व्यवहारतो क्रमेण सिद्ध्यति, बुध्यते, मुच्यते, परिनिर्वाति, सर्वदुःखानामन्तं करोति। निश्चयतस्तु नित्यमुक्तो भवत्यात्मा, अतो व्यवहारत इत्युक्तम्।

अत्र सिध्यति - सामान्येनाणिमाद्यैश्वर्यं प्राप्नोति । बुध्यते - केवली भवति । मुच्यते - भवोपग्राहिकर्मणा । परिनिर्वाति - सर्वतः कर्मविगमेन । किमुक्तं भवति - सर्वदुःखानामन्तं करोति, सदा पुनर्भवाभावात् । यद्वा सिध्यति, सर्वकार्य-परिसमाप्त्या, बुध्यते, तत्रापि केवलाप्रतिघातेन, मुच्यते, निरवशेषकर्मणा, परिनिर्वाति, समग्रसुखाप्त्या । एवं सर्वदुःखा-नामन्तं करोतीति निगमनम् ।

नयान्तरमतव्यवच्छेदार्थमेतदेवम् । स च नय एवम् - नास्ति निर्वाणमित्याहुरात्मनः केऽप्यबन्धतः । प्राक् पश्चाद् युगपद् वाऽपि तद्बन्धस्याव्यवस्थितेः - इत्यादि (अध्यात्मसारे १३-६३) एतन्मतनिराकरणार्थमुक्तक्रमेण निर्वाणं समर्थितमत्र। इत्थं तत्त्वतः प्रव्रज्यापरिपालनासूत्रं समाप्तम् ।

**इति तुर्यं सूत्रम्**

# अथ
# प्रव्रज्याफलाभिधम्
# पञ्चमं सूत्रम्

इहानन्तरसूत्रे प्रव्रजितस्य चर्योक्ता । इह तु परं तत्फल-मभिधातुमाह -

**सूत्र : स एवमभिसिद्धे परमबंभे मंगलालए जम्मजरा-मरणरहिए पहीणासुहे अणुबंधसत्तिवज्जिए संपत्तनियसरूवे । अकिरिए सहावसंठिए अणंतनाणे अणंतदंसणे । से न सद्दे, न रूवे, न गंधे, न रसे, न फासे ।**

स प्रक्रान्तः प्रव्रज्याकारी, एवम् - उक्तेन सुखपरम्परा-प्रकारेणाभिषिद्धः सन् परमब्रह्मस्वरूप एकान्तेन शुद्धः परमात्मरूपो भवति, सदाशिवत्वेन । शश्वत्कालं कर्माद्युपद्रव-रहितत्वात् । न हि कर्मकुवासनाविकारोपद्रवैरुपद्रुतः परमात्मेत्युच्यते । किञ्चायमनन्तगुणसम्पन्नो निराकरोति परेषामप्युपद्रवान्, अतो मङ्गलालयोऽयम् । भवति हि तन्नामस्मृति - स्तुति-ध्यान-प्रशंसादिभिः सर्वमालिन्यापगमः, सर्वान्तरायविगमश्च । अत आलम्बनगोचरीविहितः सिद्धः परमात्मा महामङ्गलम् ।

किञ्च कर्म-कायादिनिमित्ताभावेनासौ जन्म-जरा-मरण-रहितः, यथोक्तम् - दग्धे बीजे यथा-ऽत्यन्तं, प्रादुर्भवति, नाङ्कुरः । कर्मबीजे तथा दग्धे, नाऽऽरोहति भवाङ्कुरः-इति (तत्त्वार्थकारिकयाम् २ - ............) प्रक्षीणाशुभः -

एकान्तेनानुबन्धशक्तिवर्जितः, अशुभमनङ्गीकृत्य, अत एव सम्प्राप्तनिजस्वरूपः अधिगतात्मीयानन्तज्योतिरानन्दमय-स्वसतत्त्वः ।

अत एवाक्रियः - गमनागमनादिक्रियावर्जितः, कृतकृत्यत्वात् ।

ननु च प्रतिसमयं भवत्येवास्य ज्ञानदर्शन क्रिया, अतः कथमक्रियोऽयमुच्यत इति चेत् ? मनोवाक्कायाभावात्तत्क्रियाविरहात् । यद्यपि केवलज्ञानदर्पणे प्रतिबिम्बभावमुपयाति विश्वम्, तथापि निष्क्रिय एवासौ, दर्पणवत् । एवञ्च स्वभावसंस्थितो भवत्यात्मा, सांसिद्धिकधर्मवान् भवतीत्यर्थः। कर्मोदयापादितसर्वविभावापगमात् । अत एवानन्तज्ञानोऽनन्तदर्शनश्च, ज्ञेयानन्तत्वात्, स्वभावश्चास्यायमेव, यथोक्तम् - स्थितः शीतांशुवज्जीवः, प्रकृत्या भावशुद्ध्या । चन्द्रिकावच्च विज्ञानं, दावरणमभ्रवत् - इति (योगदृष्टिसमुच्चये ) । न शब्दादिरूपो भवति सिद्धः, पुद्गलधर्मत्वादमीषाम् । परमकल्याणदशावस्थिता-त्सिद्धादत्यन्तं विपरीता भवति संसारिणो जीवस्यावस्था, जन्माद्युपद्रवकलङ्कितत्वादिति सिद्धदशाधिगमार्थं यतनीयम् ।

**सूत्र : अरूवी सत्ता अणित्थंत्थसंठाणा, अणंतवीरिआ, कयकिच्चा, सव्वबाहाविवज्जिआ, सव्वहा निरविक्खा थिमिआ पसंता ।**

न च शब्दादिरूपत्वाभावादभाव एव भवति सिद्धस्येत्याह

- अरूपिणी सत्ता ज्ञानवत् । अनित्थंस्थसंस्थाना, इदम्प्रकार-मापन्नमित्थम्, इत्थंस्थितमित्थंस्थम्, न इत्थंस्थं अनित्थंस्थम्, एवंविधं संस्थानं यस्या अरूपिण्याः सत्तायाः सा यथोक्ता । अनंतवीर्येयं सत्ता प्रकृत्यैव । तथा कृतकृत्या, तन्निष्पादनेन निवृत्ततच्छक्तिः । कृतान्येव कृत्यानि सिद्धभगवता, अतो निष्प्रयोजनतया व्यावर्तते तत्कार्यशक्तिः ।

किञ्च सा सर्वाऽऽबाधाविवर्जिता, द्रव्यतो भावतश्च सर्वविधपीडारहितत्वात् । तथा सर्वथा निरपेक्षा, तच्छक्त्यपगमेन। अत एव स्तिमिता प्रशान्ता, सुखप्रकर्षादनुकूला निस्तरङ्ग-महोदधिकल्पा । एतस्या एव परमसुखत्वमभिधातुमाह

**सूत्र :- असंजोगिए एसाऽऽणंदे, अओ चेव परे मए । अविक्खा अणाणंदे । संजोगो विओगकारणं । अफलं फलमेआओ विणिवायपरं खु तं, बहुमयं मोहाओ अबुहाणं । जमित्तो विवज्जओ, तओ अणत्था अपज्जवसिया । एस भावरिऊ परे । अओ वुत्ते उ भगवया ।**

न हि नियतद्रव्यक्षेत्रकालभावसंयोगसापेक्षो भवति सिद्धभगवान्, शब्दादिसंयोगमुक्तत्वात्, तदपेक्षाविरहितत्वाच्च। अत एव तात्त्विकतया परः प्रधानोऽस्याऽऽनन्दो मतः - इष्टः।

इहैव व्यतिरेकमाह - अपेक्षाऽनानन्दः, कथन्नामैषा ममाऽऽशा पूरिता स्यादित्याद्यात्मकौत्सुक्यदुःखरूपत्वात्तस्याः । अपि चाभीष्टावाप्त्यनन्तरमपि न भवति सदातनं सुखम्, वियोगान्त-त्वात्संयोगस्य । एवञ्च संयोगजन्यं फलं वस्तुतोऽफलमेव,

विनश्वरत्वात् । तथापि मोहानुभावेनाज्ञजनाय रोचते सांयोगिकं फलम् । मोहेन हि गजनिमीलिकामवलम्बति जनो विनश्वरतां प्रति । ततश्च मतिविपर्यासादफलमेव मन्यते फलम् । विपर्यासादेवोद्भवन्त्यनन्ता अनर्थाः । न च तत्प्रयुक्तदुःखवेदनेनाप्यवाप्यते तत्पर्यन्तः । मोहेनैवैता भवन्त्यात्मकदर्थना, अतः परमो भावशत्रुर्मोहः, अत एवोक्तो भगवता तीर्थकरेण, यथोक्तम् - अण्णाणतो रिपू अण्णो पाणिणं णेव विज्जइ । एत्तोऽसक्किरिया तीए अणत्था विस्सतो मुहा - इति ।

ननु यदि संयोगो दुष्टः, कथं सिद्धस्याऽऽकाशेन स न दुष्ट इति चेत् ? अत्राह -

**सूत्र : नागासेण जोगो एअस्स । से सरूवसंठिए । नागासमण्णत्थ । न सत्ता सदन्तरमुवेइ । अचिंतमेअं । केवलिगम्मं तत्तं । निच्छिमयमेअं । विजोगवं च जोगोत्ति न एस जोगो । भिण्णं लक्खणमेअस्स । न इत्थावेक्खा । सहावो खु एसो, अणंतसुहसहावकप्पो !**

सिद्धस्याकाशेन सह संयोगो न भवति, स्वरूपसंस्थितत्वात्तस्य । ननु च कथमाधारमन्तरेण स्थितिरिति चेत् ? अत्राह - नाकाशमन्यत्राऽऽधारे । अयं भावः- यथाऽऽकाशं स्वयमाधारमन्तरेणैव तिष्ठति, न चासत्त्वभावमुपयाति, तथा प्रकृतेऽपि दृष्टव्यम् । अत्रैव युक्तिः - न सत्ता सदन्तरमुपैति। नाचेतनत्वं गच्छति चेतनः । नाप्यचेतनश्चेतनत्वं गच्छति । यथा भावोऽभावतां नोपयाति, एवं भावान्तरतामपि नैत्येषः । यदि तु वस्तु वस्त्वन्तरे वर्तेत, तदा देशेन वा वर्त्तेत सर्वांशेन

वा, सर्वतो वर्तने तद्रूपतामुपेयात्, सर्वथावस्थानस्यान्यथानुपपत्तेः। अथ देशतः, तदा तदवच्छेदेनापि देशतः सर्वतो वेति तदेवावर्त्तते। अतो वस्तुमात्रं स्वस्वरूपावस्थितं भवतीति प्रतिपत्तव्यम् ।

अचिन्त्योऽयं प्रस्तुतविषयः । केवलिगम्यश्च । तदेष निश्चयनयाभिप्रायः । व्यवहारतस्तु वस्तु वस्त्वन्तरसंयोगं प्राप्याधाराधेयभावेन तिष्ठति, आनुभविकत्वात् । एवं सत्यपि नाकाशेन योगो भवति सिद्धानामितिनिश्चयमतोऽप्युचित एव संयोगशक्तिविकलत्वात्सिद्धानाम् । संयोगो ह्यवश्यं वियोगवान् भवति, अतो नाकाशेन सिद्धानां संयोगः । तथापि लोकान्तस्थेनाकाशेन यो योगो सिद्धस्याभिमतः, स भिन्नलक्षणः, अतो न तत्र संयोगलक्षणं घटते । सिद्धस्य तदपेक्षाविरहात् ।

नन्वेवं लोकान्ते सिद्धगमनं तदाश्रयस्थिरत्वयोगश्चानुपपन्नः स्यादिति चेत् ? न, यथा हि कर्मक्षयेन जीवस्यानन्तसौख्यस्वभाव आविर्भवति, एवं लोकान्तगमनादिरूपोऽपि तत्स्वभाव एव प्रकटीभवति कर्मक्षये । नैतदर्थं किमप्यपेक्षते सिद्धजीवः । अतो भिन्ना एवापेक्षाप्रसूताः संयोगाः, भिन्न एव स्वभावजन्यः सिद्धानां लोकान्तयोगः ।

कीदृशं भवति सिद्धसुखमित्यत्राऽऽह -

**सूत्र : उवमा इत्थ न विज्जइ । तब्भावेऽणुभवो परं तस्सेव ।**

सकलकर्मक्षयेन सिद्धस्य योऽनन्तसुखस्वभावः प्रकटीभूतः, स निरुपमः । महोदधिना एवोपमीयते महोदधिरिति । स्वानुभवमात्रगम्यं सिद्धसुखमिति भावः, यथोक्तम् - स्वयं

वेद्यं हि तद् ब्रह्म कुमारी स्त्रीसुखं यथा । अयोगी न विजानाति सम्यग् जात्यन्धवद् घटम् - इति ।

अत एवाऽऽह - तद्भावे - सिद्धसुखभावे, अनुभवः परं तस्यैव - इति । एतदपि कथं ज्ञायत इत्याह -

**सूत्र : आणा एसा जिणाणं सव्वण्णूणं, अवितहा एगंतओ। न वितहत्ते निमित्तं । न चानिमित्तं कज्जंति निदंसणमित्तं तु नवरं-सव्वसत्तुक्खए, सव्ववाहिविगमे, सव्वत्थसंजोगेणं, सव्विच्छासंपत्तीए जारिसमेअं, इत्तोऽणंतगुणं ।**

सिद्धसुखानन्त्ये प्रमाणं सर्वज्ञवीतरागवचनम् । तच्चैकान्तेन सत्यम्, नात्रासत्यलेशोऽपि, निमिताभावात्, एतदपि रागाद्य-भावात्, उक्तञ्च - रागाद्वा द्वेषाद्वा मोहाद्वा वाक्यमुच्यते ह्यनृतम्। यस्य तु नैते दोषास्तस्यानृतकारणं नास्ति - इति।

स्यादेतत्, रागादिविरहेऽपि भवत्वनृतं वच इति चेत् ? अत्राह - न चानिमित्तं कार्यम् - इति । यथोक्तम् - नाकारणं भवेत् कार्यं, नान्यकारणकारणम् । अन्यथा न व्यवस्था स्यात् कार्यकारणयोः क्वचित् - इति । एवं स्वसंवेद्यं सिद्धसुख-मित्याप्तवादः । निदर्शनमात्रं तु नवरं सिद्धसुखस्येदम् सर्वशत्रुक्षये - महोपद्रवकारकेषु सर्वरिपुगणेऽत्यन्तं क्षयमुपगते सति, सर्वव्याधिविगमे - तीक्ष्णपीडाप्रदसर्वरोगबाधानां निःशेषेणोच्छिन्ने सति, सर्वार्थसंयोगेन - कृत्स्नाभीष्टविषय-सुखसामग्र्यवाप्त्या, सर्वेच्छासम्प्राप्त्या - जन्मादारभ्याद्य यावदुद्भूतेच्छालक्षानामपि सम्यक् परिपूर्त्या यादृशं सुखं भवति, ततोऽनन्तगुणमेव सिद्धसुखम् । सुखं ह्यात्मस्वभावः ।

कर्माऽऽवृतश्चैषः । अत आवरणविगमेऽनन्तरूपस्य तस्याविर्भावे न किञ्चिच्चित्रम् ।

**सूत्र : तं तु भावसत्तुक्खयादितो । रागादओ भावसत्तू । कम्मोदया वाहिणो । परमलद्धीओ उ अट्ठा । अणिच्छेच्छा इच्छा । एवं सुहुममेअं न तत्तओ इयरेण गम्मई जइसुहं व अजइणा, आरुग्गसुहं व रोगिण त्ति विभासा । अचिंतमेअं सरूवेणं ।**

अनन्तगुणं सिद्धसुखम्, भावशत्रुक्षयात्, भावरोगविगमात्, भावार्थसंयोगात्, भावेच्छासम्प्राप्त्या च । सिद्धिगमनेन न केवलं द्रव्यरिपूणां भावरुजामपि । भावरिपवो हि रागाद्याः । कर्मोदयाश्च-व्याधयः । नैतेषु विद्यमानेषु सम्भवत्यनन्तसुखोदयः । रागादयो हि जनयन्ति शारीरमानसक्लेशम् । अपहरति शान्तस्थितिमात्मनः । परिणामेनापि विदधन्त्यपकारम् ।

यावत्कालं हि कर्मोदया व्याधिवज्जीवं पीडयन्ति, तावत्कालं, कुतोऽनन्तं सुखम् ? अपि च रसायनौषध-पथ्यसेवनैरपास्यते ज्वरप्रयुक्तदुर्बलभावः, न तु वीर्यान्तराय-कर्मोदयापादिताऽशक्तिः । यदि चोपशमं नीयन्ते कथञ्चि-च्छारीररोगाः, तथापि नैषत्कालीनकर्मोदयापादिताः प्रत्यपायास्तै-र्निराकर्तुं शक्याः । एवञ्च सम्भवत्सु दारुणवेदनप्रदेषु कर्मोदयेषु कुतोऽनन्तसौख्योदयः । अतः परमार्थतो रागद्वेषमोहकर्मोदयरूपं दुःखम्, यावत्कालं हि सा भावपीडा नोपशाम्यति, तावत्कालं दुर्लभमनन्तसुखम् । यद्धि सुखं रागादिविकारोपशमेन कर्मपारतन्त्र्यापगमेनोदिति, तदंशोऽपि रागविकारविकृते कर्मवशे

जगति कुतो दृष्टचरस्स्यादिति भावनीयम् ।

किञ्च विषयसुखं तत्साधनभूतोऽर्थश्चानर्थः परमार्थतः, नातः सुखसम्भवः । सुखं तु विद्यते श्रेष्ठकेवलज्ञानादिरूपेऽर्थे, अत एव परार्थसम्पादनसम्भवात् । परार्थः - परेषामिष्टवस्तु श्रेष्ठो वाऽर्थो मोक्षलक्षणः ।

एवं वस्तुतोऽनिच्छेच्छा इच्छा । यत्पूर्त्या प्राप्यते शश्वदनिच्छा । ततश्च न कदाचिदुदेति काऽपीच्छा । ततस्तन्मूलकस्य दुःखस्याप्यभावः । लोके तु यद्यप्यद्य कथञ्चित्सर्वेच्छा-सम्प्राप्तिस्स्यात्, तथापि श्व इच्छान्तरोदयेन बाधते एव तत्फलभूतं दुःखम् । अतो कर्त्तव्यानिच्छेच्छा, तत्पूर्त्तौ सदातननिःस्पृहभावयोगात् । ततश्च न कश्चित्सन्तापः, केवलं परमसुखसंवित्तिः ।

वीतरागभावोदय एव सिद्ध्यत्यनिच्छेच्छा । वीतराग-भावोदयोऽपि विरागमन्तरेणासम्भवी । तदर्थमपि कर्त्तव्य इच्छा-ह्रासः । सोऽपि प्रारभ्यते प्रथमादेव गुणस्थानात् । तत्प्रकर्षश्च लभ्यते सप्तमे गुणस्थानके ।

अनन्तं सिद्धसुखं सूक्ष्मम् । नैतत् परमार्थेनेतरेण गम्यते। इतरेण - असिद्धेन । न हि संसारिणा सिद्धसुखमवगन्तुं शक्यमिति भावः । अत्र निदर्शनमाह - यतिसुखमिवायतिना, विशिष्टक्षायोपशमिकभाववेद्यत्वात्तस्य, तदुक्तम् - न देवराजस्य न चक्रवर्त्तिणस्तन्नो सुखं रागयुतस्य मन्ये । यद् वीतरागस्य मुनेः सदात्मनिष्ठस्य चित्ते स्थिरतां प्रयाति-इति (हृदयप्रदीपे) ।

अन्यत्रापि - कुमारी न यथा वेत्ति, सुखं दयितभोगजम्। न जानाति तथा लोको, योगिनां समतासुखम् - इति (अध्यात्मसारे ९ - २०)

यथा चारोग्यसुखं रोगी न संवेत्तीत्यप्यत्र निदर्शनम्, उक्तञ्च - रागाईणमभावे जं होइ सुहं तयं जिणो मुणइ । ण हि सण्णिवायगहिओ, जाणइ तयभावजं सोक्खं - इति । तदेषा विभाषैव । परमार्थतस्त्वचिन्त्यमेव सिद्धसुखस्वरूपम् । न ह्यस्मद्विधमतिज्ञानविषयस्सः, अतो नास्मत्कृतसूक्ष्मचिन्तनस्यापि गम्यं तत् ।

## (५) विचित्रतथाभव्यत्वकृतसहकारिभेदः

**सूत्र : साइ-अपज्जवसिअं एगसिद्धावेक्खा, पवाहओ अणाइ। तेवि भगवंतो एवं । तहाभव्वत्ताइभावओ । विचित्तमेअं तहाफलभेएण । नाविचित्ते सहकारिभेओ । तदवेक्खो तओ त्ति ।**

तच्च सुखं साद्यपर्यवसितमेकसिद्धापेक्षया, न तु प्रवाहतः, प्रवाहतस्तदोघमाश्रित्यानाद्यन्तत्वात् ।

अथ भव्या एव सिध्यन्ति । तेषाञ्च समानत्वेऽपि भव्यत्वे कथं सिद्धिगमनकालस्तत्सामग्री च भिन्ना भवतीति चेत् ? तथाभव्यत्वभेदादिति गृहाण । तथाफलपरिपाकीह तथाभव्यत्वम्। तथाभव्यत्वं हि भिन्नभिन्नमोक्षसामग्र्यां मोक्षलक्षणे फले च परिपच्यते । अतः प्रतिजीवं तद् भिन्नं भवति । अतोऽनुसृत्य कालादिभेदं तत्तज्जीवसिद्धिगमनं भवति ।

ननु तथाभव्यत्वाभेदेऽपि भिन्नभिन्नसहकारिकारणवैविध्येन विचित्रप्रकारैर्मोक्षफलावाप्तिः कथं सङ्गतिमङ्गतीति चेत् ? सहकारिभेद एव किम्प्रसूत इत्येव तु पृच्छ्यतां प्रथमम् । सोऽपि भेदस्तथाभव्यत्वभेदप्रभवः । तथाभव्यत्वमवलम्ब्यैव प्रवर्त्तन्ते सहकारिणः, तादृशसहकारिस्वभावविरहे सहकारिणां नियतोपनिपातस्यैवानुपपत्तिरिति सूक्ष्ममीक्षणीयम् । यदि तु तथाभव्यत्वापेक्षा न स्यात् सहकारिणाम् तदा कथं सर्वजीवानां युगपत्सहकारिसमागमो न भवतीति विचिन्त्यम् । तदत्र तथाभव्यत्ववैचित्र्यप्रयुक्तं सहकारिवैचित्र्यमेव नियामकम् । एवं समानेऽपि भव्यत्वे भव्यानामसमानं तथाभव्यत्वमित्यनेकान्तः। यद्वा सादयोऽनादयश्च सिद्धा इत्यनेकान्तः ।

**सूत्र : अणेगंतवाओ तत्तवाओ । स खलु एवं इहरहेगंतो। मिच्छत्तमेसो । न इतो ववत्था । अणारिहमेअं । संसारिणो उ सिद्धत्तं । नाबद्धस्स मुत्ती सद्दत्थरहिआ ।**

अनेकान्तवाद एव तत्त्ववादः - तात्त्विकः सिद्धान्तः । एकान्तवादो मिथ्यासिद्धान्तः । अनेकान्तवादप्रयुक्तं पदार्थनिरूपणं तात्त्विकम् । यत एष वस्तुनि घटमानाननेकधर्मान् कार्यसामर्थ्यानि चानेकानि सम्यक् प्ररूपयति । न त्वेकान्तवादवदमुकं स्वीकरोत्यपलपति चामुकमिति ।

प्रकृते भव्यत्वेऽनेकान्त एवम् - भव्यत्वं हि मोक्षप्राप्तियोग्यतारूपम्, अतो यथैतन्मोक्षनिबन्धनम्, तथैव मोक्षसाधनाराधनानामपि कारणम् । न हि योग्यत्वविरह एतत्सर्वमवाप्यते। अतस्तत्तद्भव्यजीवानां मोक्षसाधनयोगवैचित्र्ये भव्यत्ववैचित्र्यमेव

नियामकतया पर्यवस्यति । एवं मोक्षं प्रति तेषां भव्यत्वानां समानं कारणत्वम्, तत्साधनसम्पादनं प्रति त्वसमानमित्यनेकान्तवादः । न तु समानकारणत्वैकान्तः । न हि भिन्नभिन्नानेककार्यप्ररूपणे शक्त एषः । अपि च भव्यत्वसमानत्वैकान्ते तु समानकाले समानसामग्र्या सर्वभव्यानां सिद्धिगमनप्रसक्तिः । न चैतद् दृष्टमिष्टं वा ।

अत एकान्तवादो मिथ्यावादः, अतो वस्तुव्यवस्थानासम्भवात् । अनेकान्तवाद एव भव्यानां सिद्धिगमनकालभेदस्य तत्साधनभेदस्य चोपपत्तिसम्भवात् ।

भव्यत्वं नाम मोक्षभवनयोग्यत्वम् । मोक्षभवनं मोक्षप्राप्तिः । तत्प्राप्तेः कर्म भव्यजीवः । मोक्षो भव्यजीवस्य प्राप्तो भवतीति भव्यजीवः प्राप्यः । एतदर्थे विध्यर्थकृदन्तपदं भव्य इति । 'य'प्रत्ययः सूचयति कर्मत्वम् । कर्म नाम षट्कारकमध्य एकतमः कारकः । कारकश्च क्रियाकारणं भवति । यदि तु वस्तुनि स्वभाववैचित्र्यमेव न भवेत् । तदाऽकिञ्चित्करो भवेत्सहकारिभेदः । भिन्नाऽपि कृषिरीतिस्तदैव भिन्नं शस्यमुत्पादयति, यदा बीजेषु शालित्वगोधूमत्वादि-स्वभाववैचित्र्यं विद्यते, नान्यथा । एवं जीवस्वभाववैचित्र्य एव सिद्धिगमनकालवैचित्र्यं तत्साधननानात्वं च सङ्गतिमङ्गतीति निपुणं निभालनीयम् ।

न हि मोक्षो भव्यः, अपि तु जीवः । कर्मणि विध्यर्थकृदन्तमिदम् । एवमेतद्धटामटाट्यते - प्राप्तिक्रियाकर्ता

मोक्षः । क्रियाकर्म जीवः । उपेत्याऽऽलिङ्गति जीवं मोक्षः । अतो मोक्षः प्रापकः । भव्यः प्राप्यः । एतत्प्राप्तिक्रियायां कर्मभूतो जीवोऽपि कारणम् । अतः क्रियावैचित्र्याज्जीवस्वभावभूते भव्यत्वेऽपि सिद्ध्यति वैचित्र्यम् ।

यथा समानेऽपि विभवे नैकमनुजानां कालभेदेन तत्प्राप्तौ भिन्नभिन्नकालीनः पुण्योदय एव नियामकतया पर्यवस्यति । एवं समानोऽपि मोक्षोऽनेकजीवैर्भिन्नभिन्नकालेऽवाप्यते, अतस्तत्कारणभूतं भव्यत्वं विचित्रमित्युरीकर्त्तव्यम् भव्यत्वस्य विचित्रो विपाकोऽपि भव्यत्ववैचित्र्यप्रभवः । एवञ्चासमानं प्रतिजीवं तथा भव्यत्वमिति निष्कर्षः ।

## साङ्ख्यमतनिरासः

अनादिकालीनमिदं जीवानां सिद्धिगमनम् । यथाऽनेन भव्यानां विचित्रं तथाभव्यत्वं सिध्यति, तथा - न जीवा अनादिकालतः शुद्धा बुद्धा मुक्ता वा, किन्तु कर्ममललिप्ततयाऽशुद्धा अबुद्धा अमुक्ताश्च, संसारिण इत्युक्तं भवति । अत एवैषां शुद्धत्वादिपर्याययोगः सम्भवति । प्रागसिद्धस्य सिद्धिसम्भवात् । न हि प्रथमत एव सिद्धः सिध्यति नाम । बद्धस्यैव मुक्त्युपपत्तेः । अबद्धस्य तु मुक्तिर्न पारमार्थिका । न चास्यां मुक्तिशब्दार्थः बन्धविश्लेषणरूपो घटते । न चोपचारेण मुक्तव्यवहारस्स्यादिति वाच्यम्, अन्यत्र मुख्यमुक्तिसद्भाव एव तदुपचारघटनात्, माणवकसिंहवत् । ननु साङ्ख्यसम्मता मुख्यमुक्तिर्घटत एव प्रकृतौ, उपचारात्त्वात्मनीति चेत् ? न,

प्रकृतेरेव बद्धत्वे सदाशुद्धस्यात्मनः किमायातम् ? किमर्थं चासौ मुक्त्यर्थं पुरुषार्थं कुर्यादिति चिन्त्यम् ।

ननु प्रकृतिविकारोऽहमिति भ्रममपाकर्तुमात्मना मोक्षपुरुषार्थः कर्त्तव्य इति चेत् ? एतद्भ्रम एवात्मनोऽशुद्धदशापिशुनो बद्धत्वसूचकश्चेति किं न विचार्यते ? एवमेव भ्रमविगमेनात्मा शुद्धो मुक्तश्च सञ्जात इत्युक्तिसाङ्गत्यसम्भवात् । अतो प्राग्बद्धस्यैव मुक्तिरङ्गीकर्त्तुमुचिता । अबद्धस्यापि मुक्तिसम्भव आकाशादेरपि तत्प्रसक्तेश्च ।

किञ्चात्मनो नित्यमुक्तत्वाभ्युपगमे भवतामेवाऽऽगमस्यानुपपत्तिः, यत्तत्रोक्तम् - पञ्चविंशतितत्त्वज्ञो, यत्र तत्राऽऽश्रमे रतः । जटी मुण्डी शिखी वाऽपि, मुच्यते नात्र संशयः इति ।

अथ बद्धत्वमेवात्मनोऽसम्भवि, अमूर्त्त आत्मनि मूर्त्तकर्मसम्बन्धासम्भवादिति चेत् ? न, न हि संसार्यात्माऽऽकाशवत् सर्वथा शुद्धोऽरूपी च, किन्त्वनादिकालतः कर्मलेपलिप्ततया मूर्त्तसङ्काशः । अतस्तस्मिन् नवः कर्मसंयोगः सम्भवति । न च कश्चित् प्रथमः कर्मलेपोऽस्त्वात्मनीति वाच्यम्, अहेतुकत्वापत्तेः, तस्य च 'नाकारणं भवेत्कार्य'मितिनीत्याऽसम्भवात् ।

**सूत्र : अणाइमं बंधो पवाहेणं, अइयकालतुल्लो । अबद्धबंधणे वाऽमुत्ती, पुणो बंधपसंगओ, अविसेसो । अबद्धमुत्ताणं ।**

व्यक्त्या तु प्रत्येका बन्धक्रिया नूतनोत्पन्ना, किन्तु प्रवाहत आत्माऽनादिकालतः कर्मबन्धविषयीभवति । निदर्शन-

मत्रातीतकालः, स हि प्रवाहेणानादिमाननुभूतवर्त्तमानभावश्च, यथोक्तम् -भवति स नामातीतः, प्राप्तो यो नाम वर्तमानत्वम्। एष्यंश्च नाम स भवति, यः प्राप्स्यति वर्त्तमानत्वम् - इति । आकाशं तु व्यक्त्याऽनादि । न तु कर्मबन्ध इदृशः, तस्य प्रवाहतोऽनादित्वात्, व्यक्त्या तु सादिरेव सः ।

ननु प्रवाहतोऽप्यत्रास्तु सादिभावः, प्रवाहस्यापि कदाचित्प्रारम्भस्यावश्यकत्वादिति चेत् ? न, यदि बन्धोऽनादिर्न स्यात्तदा प्राक्तनकाल आत्मनोऽबद्धत्वमभ्युपेयं स्यात् । ततोऽप्यबद्धस्य बन्धः प्रतिपत्तव्यो भवेत् । एवञ्च न कदाचिदप्यस्य सिद्धिसम्भवः, सकृत्सर्वकर्मबन्धने त्यक्तेऽपि प्राग्वत् पुनरबद्धबन्धयोगेनात्यन्तिकमुक्त्यसम्भवात् । न ह्यबद्धमुक्तयोः कश्चिद् भेदः, शुद्धत्वस्योभयत्र निर्विशेषत्वात् । एवमबद्धबन्धसम्भवे मुक्तस्यापि तत्प्रसक्तिरिति निपुणं निभालनीयम् ।

## (८) कर्मवियोगादिः

**सूत्र : अणाइजोगेवि विओगो कंचणोवलनाएणं । न दिदिक्खा अकरणस्स । न यादिट्ठंमि ऐसा । न सहजाए निवित्ती । न निवित्तीए आयट्ठाणं । न यऽण्णहा तस्सेसा । भव्वत्ततुल्ला नाएणं ! न केवलजीवरूवमेअं । न भाविजोगावेक्खाए तुल्लत्तं तया केवलत्तेण सयाऽविसेसओ । तहासहावकप्पणमप्पमाणमेव एसेव दोसो परिकप्पिआए ।**

ननु यद्यनादिः कर्मसम्बन्धः, तदाऽस्य वियोगोऽसम्भवी, आकाशमेरुसम्बन्धवदिति चेत् ? न, दृष्टान्तवैषम्यात्,

उक्तसम्बन्धस्य व्यक्त्याऽनादित्वात् । प्रकृते तु व्यक्त्या सादिरस्ति कर्मबन्धः । अतस्तत्पर्यवसानं सम्भवति । निदर्शनमत्र काञ्चनोपलसंयोगः । सुवर्णस्योत्पत्तेरारभ्योपलसंयोगभावेऽप्यग्न्यादिप्रयोगतस्तद्वियोगस्सम्भवति । एवं कर्मबन्धप्रतिपक्षहेतुयोगेनाऽऽत्मकाञ्चनस्य कर्ममालिन्यापगमाद्विशुद्धिरपि मुक्तिलक्षणा सम्भवत्येव ।

अत्र पुनः प्रतितिष्ठन्ति साङ्ख्याः - अनादिबद्ध आत्मा नाभ्युपगन्तव्यः, अपि तु प्रागबद्धस्य पश्चात्सञ्जातो बन्ध इत्यभ्युपेयम् । कदाचिदप्यसञ्जातबन्धोऽबद्ध आत्मा । दिदृक्षया बन्धविषयीभूय तदनन्तरं मुक्तो बद्धमुक्त आत्मा । न ततः परं कदाचिद् बध्यत एष, दिदृक्षानुदयात् . आत्मा ह्यकर्ताऽभोक्ता च । कर्तृरूपा तु प्रकृतिः । महदहङ्कारशब्दादि-तन्मात्रेन्द्रियपञ्चभूतानि तु तस्या एव विकारभूतानि । अभेदभ्रान्त्याऽऽत्मा कर्त्तारमात्मानं मन्यते, तदाह - प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वथा । अहङ्कारविमूढाऽऽत्मा कर्त्ताऽहमिति मन्यते - इति ।

यदा हि चेतनस्य पुरुषस्य दिदृक्षोदेति, सदातनी प्रकृतिदर्शनेच्छा भवतीत्यर्थः, तदा संसारस्य प्रारम्भो भवति । एवञ्चाबद्धस्यात्मनो दिदृक्षा भवति, न तु बद्धमुक्तस्य । नातः पुनः संसारोन्मज्जनापत्तिरिति साङ्ख्यविशेषाः ।

दिदृक्षा नाम सत्त्वरजस्तमोगुणात्मकप्रकृतिविकारनिभालनस्पृहा । प्रकृतिरचेतनजगतो मूलम् । तद्दिदृक्षया बध्यत आत्मा । ततोऽपि संसरणारम्भः । वस्तुतस्तु प्रकृतिरेव

बध्यते । किन्तु तत्प्रसूते दर्पणसङ्काशे महत्तत्त्वे पुरुषः स्वं प्रतिबिम्बं निभालयति । ततश्च प्रकृतिसम्बद्धान् बद्धत्व-कर्तृत्व-ज्ञातृत्वादिकान् धर्मानात्मीयतयाऽभिमन्यते । एतेनैवाभिमाने-नानेकभवपरम्परात्मकः सृज्यतेऽस्य संसारः ।

यदा तु विवेकख्यात्या विजानाति, यथाभिन्नोऽहं प्रकृतेः, सदाप्यबद्धोऽकर्ता चेतनः पुरुषोहम् - तदाऽसौ क्रमेण मुच्यते। ततो बद्धमुक्तस्यास्य न पुनर्भवति दिदृक्षा, प्रकृतिदर्शनेन तृप्तत्वात्। नापि दिदृक्षाविरहे पुनरस्य बन्धो भवति । अतो बद्धमुक्तस्य पुनर्बन्धायोगः । एवं सर्वस्यापि सूपपन्नतया नानादिबन्ध उरीकर्तुमुचित इति ।

अत्रोच्यते - यदि सादिर्बन्धः, तदा बन्धस्य पूर्वकाल इन्द्रियशरीरमनसामभावात् कथं दिदृक्षोदय इति वाच्यम् । न बन्धं विना करणादि, न तदन्तरेण दिदृक्षा, नापि दिदृक्षामृते बन्धस्तत्प्रसूतः संसारश्च । किञ्च नादृष्टे दिदृक्षोदेति कस्यचित् कदाचित् ।

(१) अत्रादृष्ट इति कर्तृपदम् । दृष्टर्यविद्यमाने सति दिदृक्षाऽपि न भवतीत्येकोऽर्थः । न ह्यनाद्यबद्धस्य पुंसोऽन्तः-करणशरीरेन्द्रियादयः, अतोऽस्मिन् द्रष्टृत्वस्यैवायोगः, चक्षु-र्विरहात् । दिदृक्षायाश्चासम्भवः, निर्मनस्कत्वात् । यदि च निर्हेतुकावेतौ धर्मावस्याभिमतौ, तदा स्वभावभूतावेतौ स्याताम्। ततश्च नित्यदृष्टा नित्यदिदृक्षश्चात्माऽभ्युपेयस्स्यात्, तच्चानिष्टमिति ।

(२) यद्वाऽदृष्टे - इति कर्मणि भूतकृदन्तम्, सप्तमी

विषयार्था । यद्धि वस्त्वदृष्टम्, न कदाचिदपि प्रत्यक्षमीक्षितम्, श्रुतं वा, तद्दर्शनेच्छा - दिदृक्षा न भवति । एवञ्चाबद्धावस्थायामदृष्टश्रुतायाः प्रकृत्या दर्शनस्येच्छैवात्मनो न सम्भवति ।

यदि तु निर्हेतुका स्याद् दिदृक्षा, तदऽऽत्मस्वभावभूततया (१) दिदृक्षाया अपि नित्यत्वापत्तिः । अत एव (२) तत्कार्यत्वेनाभिमतस्य बन्धस्यापि शश्वत्त्वप्रसङ्गः । अत एव (३) मोक्षाभावप्रसक्तिः । अथ स्वभावभूताऽपि नश्यति दिदृक्षेत्यभ्युपगमश्चेत् क्रियते, तदा तदनतिरिक्तस्याऽऽत्मनोऽपि नाशोऽभ्युपगन्तव्यस्स्यात्, तत्स्वभावभूतत्वात्तस्याः । न हि स्वभावविगमे वस्तुनोऽवस्थानं सम्भवतीति भावनीयम् ।

अन्यथा - आत्मावस्थाने सति, दिदृक्षाया अप्यवस्थानमभ्युपेयम्, तत्स्वभावभूतत्वात्तस्याः । अथ नैषाऽऽत्मस्वभावभूता, तदाऽऽत्मनः साऽसम्भविन्येव, अभेदमन्तरेणाऽऽत्मनस्तत्सम्बन्धस्यैवानुपपत्तेः ।

ननु च यथाऽऽत्मनोऽनतिरिक्तमपि भव्यत्वं सिद्धिगमने सति वियुज्यते, न चाऽऽत्मा तद्वियोगे विनश्यति, एवं प्रकृतिदर्शनेन निवर्त्स्यते दिदृक्षा, अवस्थास्यति चाऽऽत्मेति सर्वमवदातमिति चेत् ?

न, न्यायानुसारेण दिदृक्षाया भव्यत्वसाधर्म्यविरहात् । न हि शुद्धाबद्धजीवस्वरूपं भव्यत्वम् । किन्तु जीवस्वरूपम् । दिदृक्षा तु भवता शुद्धाबद्धजीवस्वरूपतया परिकल्पितेति ।

ननु मा भूत्तथाविधं भव्यत्वसाधर्म्यं दिदृक्षायाः, कैवल्य-

योगप्रयोजकत्वाख्यं तु साधर्म्यमत्स्येव । भव्यत्वस्याप्यस्ति स्वनाशकः कैवल्यावस्थायोगः, दिदृक्षाया अपीति चेत् ?

न, एवमपि वैधर्म्यावस्थितेः । प्राक्काले हि दिदृक्षाऽबद्ध-शुद्धात्मनो बभूव । कैवल्यावस्थानन्तरमपि न तस्या भावियोगा-ऽऽभावः । ततश्च सा प्राग्वदबद्धशुद्धात्मनः सञ्जाता । इत्थञ्चैकतरस्यां कैवल्यावस्थायां सञ्जातायामपि पुनस्तदुन्मज्जनं सम्भवेत् । तत्सम्भवे चाभाव एव शश्वत्या मुक्त्याः । न च भव्यत्वविषय एवम्, अनादिबद्धाशुद्धात्मा-वस्थारूपत्वात्तस्य, न च तदबद्धशुद्धस्य सम्भवति । दिदृक्षायास्तु कैवल्यस्य प्राक्काले पश्चात्काले च समानैवावस्थाऽऽत्मनः प्राप्यते, अतो वज्रलेपायतेऽस्याः पुनरुन्मज्जनाऽऽपत्तिः ।

ननु स्वभाव एवैष दिदृक्षाया यन्नैषा महदादिविकारदर्शनतः कैवल्योदयानन्तरं पुनरुदेतीति चेत् ?

न, महदादिविकारप्राक्तनानादिविशुद्धिकालीन-कैवल्या-वस्थाया विकारदर्शनानन्तरं विवेकख्यातिप्रसूतायाश्च कैवल्या-वस्थाया स्वरूपभेदविरहात् । एवं सत्यपि दिदृक्षासहित-तद्रहितत्वलक्षणस्वभावद्वयकल्पनमेकस्मिनात्मनि विरुद्धम् । किञ्चैवमपि दिदृक्षाऽऽत्मनो भिन्नेत्येवाभ्युपेयं स्यात्, प्रकृतिपुरुष-योरतिरिक्तत्वाभ्युपगमात् ।

न ह्यनादिकालतो महदादिविकाराणामात्मयोगोऽस्ति । अपि त्वित्वरकालतः । दिदृक्षाया अपीत्वरकालत उदिततया-ऽऽगन्तुकत्वपर्यवसानान्नास्याः पुरुषात्मकत्वं प्रकृतिरूपत्वं वा

प्रतिपत्तुमुचितम्, प्रकृतिरूपत्वे तस्याः प्रकृतिदर्शनेच्छा-रूपत्वायोगात्, न हि स्वस्य स्वदर्शनेच्छा भवतीति । पुरुषरूपत्वे तु तस्या नित्यत्वप्रसक्तिरित्याद्युक्तं प्राक् ।

अतः पुरुषादत्यन्तं भिन्ना दिदृक्षा पुरुषस्य न किमपि कर्त्तुं प्रत्यला, ततश्च कस्य बन्धो मोक्षो वेति विचार्यम् । न च कल्पितैषा दिदृक्षेति वाच्यम्, प्रमाणविरोधात् । अतः कल्पनाप्येषा व्यर्था । कल्पनातिरिक्तायास्तस्या अभावात् । न च कल्पनामात्रविग्रहं वस्तु किञ्चिदपि कार्यं करोतीत्यतः तथाविधाया दिदृक्षाया बन्धप्रयोजकत्वं न सम्भवति ।

## (९) बौद्धमतसमीक्षा

**सूत्र : परिणामभेआ बंधाइभेओ त्ति साहू, सव्वनयविसुद्धीए निरुवचरिओभयभावेणं । न अप्पभूअं कम्मं । न परिकप्पि-अमेअं । न एवं भवादिभेओ । न भवाभावो उ सिद्धी । न तदुच्छेदेऽणुप्पाओ । न एवं समंजसत्तं । नाऽणाईमंतो भवो । न हेउफलभावो ।**

वस्तुतस्त्वात्मा नित्योऽपि, द्रव्यतया, अनित्योऽपि, पर्यायतया । परिणामिनित्य आत्मेति हृदयम् । द्रव्यतया नित्योऽप्यात्मा नानापरिणामेषु परिणमते । एवमाप्नोत्यसौ देवमनुजादिपर्यायान् । आत्मैव बध्यते मुच्यते च । एवं तथाविध-परिणामविशेषेण बन्धमोक्षौ प्रमाणसिद्धौ । एकान्तनित्ये त्वात्मनि मरणादिपर्यायानुपपत्तिः, दुर्घटश्च बद्धमुक्तत्वादिव्यवहारः । न चायं व्यवहारः काल्पनिकः । तथा बाह्यवस्तु-सत्कपारमार्थिक-

संयोगमन्तरेण शुद्धात्मनोऽवस्थान्तरगमनक्रिया मुक्तिश्च न सम्भवति । नाप्यनादिसंसारोऽप्येवं घटते । न सर्वनयविशुद्ध-मतेनोक्तसर्वं साङ्गत्यमुपेयादिति भावः, बन्धमोक्षोभयस्यौ-पचारिकत्वविरहात्, मुख्यतया वास्तवत्वात् । एतदपि पुरुषार्थ-निवर्त्त्यत्वात् । मुख्यमुक्त्यर्थमेव क्रियते शास्त्राभ्यासादिकमिति। सैषा द्रव्यास्तिकनयेनानादिबद्धात्मद्रव्यस्य मुक्तात्मद्रव्यस्य च प्रमाणसिद्धत्वप्ररूपणा ।

पर्यायास्तिकनयोऽपि बन्धादिपारमार्थिकत्वं प्रतिपादयति। यथा - आत्मपर्यायप्रयोजकान्येव कर्माणि, न त्वात्मभूतानि, बोधस्वरूपत्वविरहात् । नाप्यसद्रूपाणि कल्पितानि कर्माणि । असतो वस्तुन आत्मपर्यायप्रयोजकत्वानुपपत्तेः । एवं कर्मणो वासनाया वाऽऽत्मरूपत्वे कल्पितत्वे वाऽभ्युपगम्यमाने नानयोरात्मनः पृथगवस्थानं सिध्यति । क्षणभङ्गवादे च प्रत्येककर्मक्षणानां शुद्धज्ञानात्मकतया भवे मोक्षेऽपि समानतया भवमोक्षभेदाभावः, उभयस्यापि कल्पनामात्रत्वे नाममात्र-प्रयुक्तविशेषात् । न हि कर्म वासना वा पृथग्वस्तु, किन्तु क्षणिकज्ञानमात्रम् । एवञ्च तेषां क्षणानां भिन्नत्वेऽपि यथा मुक्तेरनेकक्षणेषु विचित्रभवाभावः, एवं संसारेऽपि तदभावः । ततश्च भवमोक्षभेदाभावप्रसङ्गः । अत एतत्प्रसङ्गपरिहाराय कर्मवासनादिकमपि वस्तुसदङ्गीकर्त्तव्यम् । बन्धमोक्षावपि जीवद्रव्यस्य वास्तवपर्यायावित्युरीकार्यम् ।

ननु च द्रव्यस्याभाव एव । अशुद्धकर्मवासनाक्षणपरम्पराया एव संसाररूपत्वात् । संसारोऽपि कारणपूर्वकतयाऽस्त्वनादिः।

सैव क्षणसन्ततिर्विध्यातदीपवदत्यन्तमुच्छिद्यते निरन्वयतया । एष एव मोक्षोऽभिधीयत इति चेत् ?

न, निरन्वयविनाशयोगे सतोऽसत्त्वप्रसक्तेः । युष्माभिर्हि स्थिरद्रव्यापलापाय क्षणिकज्ञानसन्ततेर्निरन्वयनाश एव मुक्तिरित्यङ्गीकृतम् । किन्तु तादृशमुक्त्यनन्तरमपि भवोद्भवापत्तिः, सतोऽसद्भावगमनवदसतोऽपि सद्भावगमनोपपत्तेः । वस्तुतस्तु - नासतो विद्यते भावो नाभावो विद्यते सतः - इतिनीत्या सतोऽसत्त्वप्राप्तिरेवासम्भविनीति ध्येयम् ।

ननु भवत्वसतः सदुत्पत्तिः, मोक्षानन्तरमपि भवसन्ततिप्रसूतिश्च, को दोष इति चेत् ? न्यायातिक्रमाख्य इति गृहाण। प्रागपि संसारानादित्वासिद्धेः । असदनुत्पत्तिनीत्या हि संसारानादित्वसिद्धिरभविष्यत् । यदि त्वसतोऽप्युत्पत्तिः स्वीक्रियते, तदा यत्किञ्चित्काल एव भवसन्तत्युत्पत्तिरभवदिति प्रतिपत्तुं शक्यते । न चेष्टापत्तिरिति वाच्यम्, जगत्प्रसिद्धहेतुफलभावविलोपप्रसङ्गात् । सन्तानस्य प्रथमः क्षण एवं निर्हेतुकस्स्यात्, अन्तिमक्षणश्च निष्फलस्स्यात् । परमार्थतस्त्वनादिकालीनेयं कार्यकारणव्यवस्था । न हि कारणमन्तरेण कार्यजन्म, अन्यथा दुग्धमन्तरेणैव दधिरुद्भवेत्, भोजनं विनैव च तृप्तिस्स्यात् ।

अतो वस्तुभूतकर्मणः संयोगेनानादिकालीनेनाऽऽत्मनः संसारः, तद्वियोगेन च मोक्षः । एतत्संयोगवियोगौ ह्यात्मनस्तत्तदवस्थाहेतुभूतौ । आत्म-कर्म-बन्ध-मोक्षादयः सर्वेऽपि वास्तवाः। विध्यातदीपनिदर्शनमपि पराभिमतासाधकम् । तत्रापि

कज्जलपुद्गलानामाकाशे प्रसृतेर्निरन्वयोच्छेदाभावात् । एवं प्रकृते विचित्रभवसन्ततिविरहेऽपि मोक्षावस्थायां शुद्धस्वरूपस्याऽऽत्मनोऽवस्थिततत्वान् न तस्योच्छेदोऽङ्गीकर्त्तुं न्याय्यः ।

अपि च 'सर्वनाशो मोक्षः' - इत्युपगमे सर्वमसत् पर्यवसेत्। तथाहि - चरमक्षणोऽकारणरूपस्स्यात्, ततश्च स न किञ्चित्कार्यं कुर्यात्, नार्थक्रियाकारी स्यादित्यर्थः । ततश्च - यदेवार्थक्रियाकारि तदेव सत् - इतिनीत्या तदसत्त्वं स्यात् । अत एव तस्य प्राक्तनोऽपि क्षणोऽसन् भवेत् । एवञ्च सर्वेऽपि क्षणा असन्तस्स्युः । ततः समग्राऽपि सन्ततिरसती स्यात् । अनिष्टं चैतत् । अतो न क्षणसन्ततिसमुच्छेदस्वरूपो मोक्षोऽभ्युपपत्तुमुचितः ।

**सूत्र : तस्स तहासहावकप्पणमजुत्तं निराहारऽनन्नयकओ निओगेण । तस्सेव तहाभावे जुत्तमेअं । सुहुममट्ठपयमेअं विचिन्तिअव्वं महाप्पण्णाए त्ति ।**

अथ स्वभाव एवैष चरमक्षणस्य यदसौ निवर्त्ततेऽत्यन्तम्, नोत्पादयति च नवं क्षणम्, एष एव मोक्षः । अपर्यनुयोज्यश्च स्वभावः, अग्नेरुष्णत्ववदिति चेत् ?

अत्रोच्यते, तथाविधचरमक्षणस्वभावोपगमो युक्तिविरुद्धः। एवमपि तदाग्रहे राजाऽऽज्ञासङ्काशतैव स्यात् । अपि च कोऽयं स्वभावः ? न च स्वस्य भाव इति वाच्यम्, स्वातिरिक्तस्य वस्तुन एव भवन्मतेऽभावात् । किन्तु स्वो भावः स्वभावः, आत्मीया सत्तेत्यर्थः । निवृत्तिस्वभावो भवति चरमक्षणः - एवं यद्युच्यते, तदा निवृत्त्यनन्तरमपि विद्यते स्वभावः, चरमक्षणानन्तरं

निवृत्तस्वभावोऽस्तीत्यभ्युपगमात् । तथा च स्वभावसद्भावान्निराधारा स्यान्निवृत्तिः । स्वसत्तायां विद्यमानायां नाशावस्थानायोगात् ।

यदि तु - पश्चात्काले चरमक्षणसत्तैव न भवति - इत्युच्यते, तदाऽनन्वयस्स्यान्निवृत्त्याः, केनापि सह तस्या अन्वयस्य - सम्बन्धस्याभावात् । एवञ्च चरमक्षणस्य निवृत्तिरितिव्यपदेशानुपपत्तिः ।

तदेते दोषा द्रव्यवियुतपर्यायमात्राभ्युपगमेऽभिपतन्ति, न तु द्रव्यस्याप्यभ्युपगमे । तथाहि - दीपनिवृत्तावुष्णस्पर्शाद्युपेतानां ज्योतिर्पुद्गलानां शीतस्पर्शाद्युपेतभस्मादिपर्यायेषु या परिणतिः, सैव दीपनिवृत्तिः, अत्र हि पुद्गलधर्मान्वयः । पर्यायमात्रोपगमेऽवश्यं स्याद् वज्रलेपायमानाऽनन्वयप्रसक्तिरिति ।

किञ्च स्वभावस्यापर्यनुयोज्यत्वमपि स्वतोऽनन्यत्वात्तस्य, अन्यथा स्वभावपदसान्वर्थत्वायोगात् । किन्तु चरमक्षणनिवृत्त्यनन्वयलक्षणदोषसद्भावेऽपि तथास्वभावकल्पनं दुराग्रह एव। प्रतिक्रुष्टश्चैष विद्वद्भिः । यथा गुणानामन्वय आधारभूतं द्रव्यमन्तरेण न घटते, एवं निवृत्तिरपि निराधारा न सङ्गतिमङ्गति । तथाहि - गोरसद्रव्यसद्भाव एव दुग्धनिवृत्तिर्दध्युत्पत्तिश्च घटते । अतः पर्यायमात्रैकान्तवादेऽनन्वयदोषानुषङ्गः । अपि च वस्तुनो निवृत्तिरेव भवन्मते वस्तुस्वभावः, एवञ्च यत्र क्षणे सर्वनिवृत्तिस्तत्र कस्यान्वय इत्यन्वयाभावः ।

यथा कटकात्कुण्डलनिर्मितौ सुवर्णद्रव्यमेव स्थास्नु

कटकपर्यायं विहाय कुण्डलपर्यायं प्रतिपद्यते । तदापि पीतवर्णादिधर्माणामन्वयो भवति, अग्निप्रयोगेण सुवर्णस्य भस्मरूपतापादने तद्धर्माणां नान्वयो भवति, किन्तु पुद्गल-धर्माणाम् । भवन्मतेन क्षणनष्टेऽपिकटकादिपर्याये पीतत्वादि-धर्माणामन्वयो भवति, तदा भस्मनि कथं नान्वयस्स्यात् ?

नन्वेवं द्रव्यास्तिकनयेऽपि कथं भस्मनि दृश्यमानानां विलक्षणधर्माणामन्वय इति चेत् ? यथा कटकाद्यवस्थायां सुवर्णद्रव्यस्येति गृहाण । सुवर्णावस्थायां ये सूक्ष्मा अणवः, त एव भस्मन्यवतरन्ति । अतस्तेषां धर्माणामन्वयो भवति ।

नियोगग्रहणमवश्यमिदमित्थमेवोरीकार्यम्, अन्यथा शब्दार्थायोगात् - इति ख्यापनार्थम् ।

यदि च प्रथमक्षणद्रव्यमेव स्थिरीभूय द्वितीयक्षणे नवामवस्थां प्राप्नोतीत्यभिमतं स्यात्, तदैव द्वितीयक्षणे निवृत्तिस्वभावत्वमुप-पद्येत, द्रव्यतया स्थिरस्यैव पूर्वपर्यायत्वेन निवृत्तियोगात् । एवमात्मनः संसारित्वपर्यायस्य कृत्स्नकर्मक्षयेन निवृत्तिर्मुक्त-तयोत्पत्तिश्च भवतीति स्वीकार्यम् । एवमेव निवृत्तस्वभाव-अनादिसंसार-कार्यकारणभावादीनां युक्तियुक्तत्वसम्भवात् ।

सूक्ष्मं पदार्थस्थानमिदम्, अतो महाप्रज्ञया - विशालगभीर-तत्त्वानुगामिधिया विचारणीयम्, अन्यथा ज्ञातुमशक्यत्वादिति ।

**सूत्र : अपज्जवसिअमेव सिद्धसुखं । इत्तो चेवुत्तमं इमं, सव्वहा अणुस्सुगत्तेऽणंतभावाओ । लोगंतसिद्धिवासिणो एए । जत्थ य एगो, तत्थ नियमा अणंता । अकम्मुणो गई,**

**पुव्वपओगेण अलाउप्पभिइभावओ निअमो अओ चेव अफुसमाण-गईए गमणं । उकरिसविसेसओ इअं ।**

मोक्षस्वरूपे न्याय-वैशेषिकमतम् - विभु आत्मपरिमाणम्। सर्वदिग्व्यापी भवत्यात्मेति भावः । ज्ञानशून्यश्चात्मस्वभावः । नास्य कुत्रापि संसरणं भवति मुक्तियोगे । आत्यन्तिकदुःख-ध्वंसात्मकं विशेषगुणोच्छेदात्मकं मुक्तिस्वरूपम् - इति ।

नैतन्मतं युक्तिसङ्गतम्, ज्ञानसुखादीनामात्मगुणानां शरीरमात्र उपलब्धेस्तद्विभुत्वायोगात्, देहमात्रप्रमाणत्वसिद्धेश्च। ज्ञानादिसर्वगुणोच्छेदरूपस्य मोक्षस्य प्राथनीयत्वायोगाद-स्पृहणीया च स्यादेषा मुक्तिः । अपि च ज्ञानशून्यत्वे गतमात्म-नश्चैतन्येनापि । चैतन्यमेवात्मनोऽजीवभिन्नत्वे नियामकम्, तदभावे च जडतामेवोपेयादात्मा । न चेष्टापत्तिरिति वाच्यम्, स्वभावापगमासम्भवात् । किञ्चाऽऽगन्तुकश्चेत् स्याच्चैतन्यम्, तदाऽचेतनेऽपीन्द्रियादौ तदागमसम्भवः, निर्विशेषादिति ।

मोक्षस्वरूपे साङ्ख्यमतम् - ज्ञानसुखादयस्तु प्रकृतिधर्माः, न त्वात्मन इति ।

एतदप्ययुक्तम्, ज्ञानाभावे चैतन्यस्याप्ययोगात्, मुक्तिपीठिका-रूपेणोपवर्णितानामृतम्भरप्रज्ञा - सम्प्रज्ञाता-ऽसम्प्रज्ञातसमाधि-तत्त्वनिदिध्यासनादीनामप्यघटनाच्च । किञ्च पुष्करपलाशव-न्निर्लेपस्यात्मनो मोक्षोऽपि कल्पनामात्रमेव पर्यवस्यतीति ।

मोक्षस्वरूपे वेदान्तिमतम् - आत्मनः शुद्धपरमब्रह्मावस्था मोक्षः । स च निर्गुणो निर्धर्मः सजातीयादिभेदशून्यश्च ।

एतदपि निर्युक्तिकम्, स्वरूपविगमप्रसक्तेः । आकाशपुष्पवदसत्त्वापत्तेः । किञ्च चिद्रूपताऽप्यात्मनि तदेव सम्भवति यदा तस्मिन् ज्ञानं स्यात् । तच्च विषयानभ्युपगमे दुर्घटम् । तथा सर्वजीवानां शुद्धैकब्रह्मरूपताऽभ्युपगमात् सर्वजीवात्मलयमन्तरेणासम्भविन्येकतमस्यापि मुक्तिरिति ।

मोक्षस्वरूपे बौद्धमतम् - क्षणिकस्यात्मनः संसारकालीना विज्ञानक्षणसन्ततिर्विषयाकारेण कलुषिता भवति । सा च स्वच्छीभूय निराकारचित्सन्ततितया निर्विषयत्वेन निरूपप्लवतामुपेता मोक्षः । यद्वा विज्ञानक्षण सन्तत्यत्यन्तोच्छेदो मोक्षः ।

एतदप्यसारम्, निर्विषयस्य ज्ञानत्वायोगात् । सतोऽत्यन्तोच्छेदासम्भवात्, सर्वनाशरूपाया मुक्तेरस्पृहणीयत्वाच्च ।

मोक्षस्वरूपे पाश्चात्यदर्शनानि - जीवस्वरूपमेव स्वतन्त्रं न विद्यते । नास्यानादिबद्धत्वादिकमप्यत एवाभ्युपेयते । आदमइव युगलाज्जीवात्मोद्भवोऽभूत् । यदा चेश्वरस्यास्थान्यां सर्वजीवा मिलष्यन्ति तदा न्यायः करिष्यते । ततश्च मूलतः स्वर्ग-नरक-मृत्युलोक-व्यवस्था भविष्यति ।

एतदपि तर्कविरुद्धमिति प्रत्यक्षमीक्ष्यतेऽपकर्णनीयमेतत्, नियतवस्तुस्वरूपाप्तदर्शकत्वात्, मोक्षस्वरूपाज्ञापकत्वाच्च ।

मोक्षस्वरूपेऽवतारवादः - मुक्ता अपि धर्मग्लानिमपाकर्त्तुं पुनः संसारेऽवतरन्तीति ।

तदेतद्विरुद्धतरम्, माता मे वन्ध्येतिवत्, जन्मप्रयोजककर्मादितः सर्वथा विरहितस्य जन्मायोगात्, सजन्मनश्च

मुक्तत्वासम्भवाच्च ।

तदत्र किन्तत्त्वमिति व्यामूढमतेः सर्वथा युक्तयुक्तं जिनमत-निरूपितं मोक्षस्वरूपं निरूपयति -

मोक्षावस्थायां हि सिद्धजीवस्यापर्यवसितमेव सुखं भवति, अत एवोत्तममिदम्, न च विनश्वरं सुखं श्रेष्ठं भवति, अत एतदेव प्रधानम् । नात्र सर्वथौत्सौक्यं भवति । अनन्तं चैतत्। औत्सुक्यं हि शतमुखं खण्डनं विधत्ते सौख्यस्य । सर्वथा-नौत्सुक्ययोगेनैवाखण्डितसुखावियोगः सम्भवी ।

सिद्धस्थानम् - सिद्धभगवन्तश्चतुर्दशरज्जूमितस्य लोक-स्याग्रभागे सिद्धशिलाया उपरितनभागे व्यवस्थिताः सन्ति । सिद्धशिला च पञ्चचत्वारिंशद्योजनलक्षप्रमाणायामविस्तारा वृत्ता स्फटिकरत्नमयी च । उक्तप्रमाणनिबन्धनमिदम्, पञ्चचत्वारिंश-द्योजनलक्षप्रमाणान्मनुष्यक्षेत्राद्धि ऋजुगत्या जीवा सिध्यन्तीति, अत उपरितनभागेऽपि तावत्प्रमाणमेव भवति सिद्धक्षेत्रम् । सा च शिला मध्यभागेऽष्टयोजनबाहल्या पर्यन्तभागेऽतु द्वितीयाचन्द्र-प्रान्तवदत्यन्तं तन्वी । तदुपरितनभागे योजनप्रमाणे लोकाकाश उपरितन योजनषड्भागे सिद्धा व्यवस्थिताः । यत्र ह्येकः सिद्धः, तत्रैव क्षेत्रेऽवश्यमन्येऽनन्ताः सिद्धा भवन्ति । क्षेत्रस्य परिमितत्वात् सिद्धानां चानन्तत्वात् । ते च भवसन्तत्या आत्यन्तिकक्षयकरणेन नित्यमुक्ता बभूवुः । सर्वशुभमवाप्यैकान्तेन सुखिनोऽरूपितयाऽन्योऽन्याबाधया तिष्ठन्ति ।

ननु सर्वकर्मक्षये क एतान् लोकान्ते प्रापयतीत चेत् ?

तथाजीवस्वभाव एवेति गृहाण । यथा हि मृत्तिकालेपाष्टकोपेतमलाबु निमज्जति सलिल लेपापगमे तून्मज्जति, तथातत्स्वाभाव्यात् । एवं कर्माष्टकलेपलिप्तो जीवः कर्मप्रेरिततया गतिं कुरुते । तल्लेपरहितस्तु प्रतिबन्धकविरहेण स्वस्वाभाव्यादुर्ध्वं गच्छति । तत्रापि नियमादस्पृशद्गत्या गच्छति । अत्र पुनरागमनविरहोऽप्यलाबुनिदर्शनेन सिद्धः । एकेनैव समयेन लोकान्तप्राप्तिर्भवति सिद्धस्य नात्रोत्पलपत्रशतभेदनिदर्शनमुपयुज्यते, तत्र प्रतिपत्रवेधेन क्रमेण गतियोगादसङ्ख्यसमयप्रमाणो गमनकालो भवति । अत्र त्वस्पृशद्गतियोगेनैकेनैव समयेन सिद्धिगमनं भवति । सम्भवत्येषाऽपि गतिर्गत्युत्कर्षविशेषयोगात् । यथैव सामान्यवेगगतेः सकाशाद्विशिष्टवेगगतौ वैशिष्ट्यं भवति, तथैव वेगप्रकर्षोपेतायामुत्कृष्टायां गतावस्पृशत्तालक्षणो विशेषो द्रष्टव्य इति ।

## (११) भव्यानामनुच्छेदः

**सूत्र : अनुच्छेओ भव्वाण अणंतभावेण, एअमणंताणंतयं । समया इत्थ नायं । भव्वतं जोगयामित्तमेव केसिं चि पडिमाजुग्गदारूनिदंसणेणं । ववहारमयमेयं ।**

ननु न हि सिद्धाः प्रत्यागच्छन्ति । अनादिकालत सिद्धिगमनमावर्त्तते । प्रतिषण्मासं जघन्यतोऽप्येकजीवस्तु सिद्ध्यत्येव । तदा कथं न भव्यजीवशून्यो भवति संसार इति चेत् ? तेषामानन्त्यादिति गृहाण । न चानन्त्येऽपि तत्क्षयो भविष्यति, वनस्पतिकायस्थितिवदिति वाच्यम्, भव्यानां

युक्तानन्त्यादिविरहात्, अनन्तानन्तप्रमाणत्वात्तेषाम्, त्रिकाल-समया यथा कदापि न क्षयमिन्ति, तथा भव्यजीवा अपि । यथा न कालः प्रत्यावर्त्तते, तथा सिद्धा अपि ।

नन्वेवम् - ऋतुर्व्यतीतः परिवर्त्तते पुनः, क्षयं प्रयातः पुनरेति चन्द्रमाः । गतं गतं नैव तु सन्निवर्त्तते, जलं नदीनां च नृणां च जीवितम् इत्यस्यानुपपत्तिरिति चेत् ?

न, एतद् व्यवहारत उच्यते । न हि ऋत्वयनादिकं तदेव पुनरागच्छति तत्त्वतः, अपि तु नवमेव, अन्यथा तस्यैव परावृत्तौ बाल्याद्यनिवृत्तिः, तस्य बाल्याद्यापादनस्वभावत्वादिति परिभावनीयम् । अतो न क्षयो भव्यानामिति स्थितम् । स्मर्त्तव्यमत्राऽऽर्षम्-जइया वि होइ पुच्छा जिणाण मग्गम्मि उत्तरं तइया । इक्कस्स णिगोयस्स अणंतभागो ३ सिद्धिगओ - इति (नवतत्त्वप्रकरणे)

एवं च सति भव्यत्वं योग्यतामात्रमेव सिद्धिं प्रति केषाञ्चित् प्राणिनाम्, येन कदाचिदपि सेत्स्यन्ति, तथा चाऽऽगमः-भव्वावि न सिज्झिस्संति केइ - इत्यादि । भव्यत्वं सिद्धिगमन योग्यत्वम् । फलगम्या च योग्यता ।

ननु चैवम् - सव्वे भविआ सिज्झंति - इत्यागमविरोध इति चेत् ? न, अभिप्रायापरिज्ञात् । भव्यस्यैव सिद्धिर्नान्यस्येत्यत्र तत्तात्पर्यभावात्, तदुक्तम् नैतद् वयं वदामो यद् भव्यः सर्वोऽपि सिध्यति । यस्तु सिध्यति सोऽवश्यं भव्य एवेति नो मतम् - इति (अध्यात्मसारे)

ननु एवमभव्येभ्यः को विशेषो भव्यानामित्यत्राऽऽह-प्रतिमायोग्यदारुनिदर्शनेन - इति । तथाहि तुल्यायां प्रतिनिष्पत्तौ विशेषो भवति काष्ठयोः । एकं दारु प्रतिमायोग्यम्, ग्रन्थ्यादि-शून्यत्वात् । न तु तदन्यत्, ग्रन्थ्यादियुक्तत्वात् । अयोग्यात्तु काष्ठात्प्रतिमा नैव भवति । योग्यादपि सर्वस्मान्न भवति । यथा स्वयम्भूरमणद्वीपसत्कमृत्तिकाभिर्योग्याभिरपि न घटनिष्पत्ति-र्भवति । नापि वन्ध्यत्वरहितसुशीलविधवायाः पुत्रोत्पत्तिर्भवति। न चैवं तथाविधयोग्यतैव तस्या नास्तीति । विद्वदङ्गनादि-सिद्धमेतत् ।

अथ भव्यत्वं निवृत्तिस्वभावं वा नित्यं वा ? नित्यत्वे मोक्षेऽपि तत्प्रसक्तिः, एवञ्च मोक्षेऽपि मोक्षगमनयोग्यत्वसद्भावे परमार्थतो मोक्षस्यैवानुपपत्तिः । निवृत्तिस्वभावं चेत्, तदा प्रथमत एव तेन निवृत्तेन भाव्यम्, तत्स्वाभाव्यात् । अथ मा भूदेष दोष इति प्राप्तसामग्रीकं तन्निवर्त्तत इत्युच्येत, तदा सापेक्षतया तत्स्वाभाव्यमेव तस्यानुपपन्नं स्यात् । एवमुभयथाप्यसिद्धिः भव्यत्वस्य इति स्थितम् ।

मैवम्, उक्तविकल्पजालस्य व्यर्थत्वात् । यद्यपि न भव्यत्वं नित्यम्, जीवस्य सिद्धिगमने सति निवर्त्तनस्वाभाव्यात् । तथापि व्यवहारेणैतज्जीवस्वभावभूतमुच्यते । निश्चयतस्तु सदा स्थास्नुस्वभावा ज्ञानादय एव जीवस्वभावभूताः । व्यवहारो ह्येवं व्यवस्थितः, यथा - न कर्माधीनं भव्यत्वम्, अपि तु सहजं जीवयोग्यतारूपम्, अतः स्वभावभूतमेतत्, न चैतदभव्येषु भवति । उपायैर्भव्यत्वपरिपाकं कृत्वाऽऽसाद्यते मोक्षफलमित्यादि प्रागुक्तमेव ।

## (१२) तत्त्वाङ्गं व्यवहारः

**सूत्र : एसो वि तत्तगं पवित्तिविसोहणेण, अणेगंतसिद्धिओ, निच्छयंगभावेणं ।**

जगज्जीवयोग्यत्वादिव्यवहारोऽपि वस्तुसत्पदार्थावलम्बनः, न तु काल्पनिकः । यदि कश्चिद् ब्रूयात् निश्चयतो ऽनन्तज्ञान-सुखादिस्वभाव आत्मा । कल्पितस्तु भव्यत्वादिव्यवहारः । अतस्तत्परिपाचनादिवक्तव्यताऽपि व्यर्था - इति । तदा तदभिप्रायो दुराग्रहे पर्यवस्यति । निश्चयवद् व्यवहारस्यापि मोक्षसाधन-प्रकरणे तत्त्वाङ्गत्वात्, पारमार्थिकमोक्षाङ्गं व्यवहार इत्याकूतम्।

वस्तुतस्तु न केवलं योग्यतापरिपाकक्रिया, अपि तु 'एतद्वस्तु योग्यम्' - इत्याकारका योग्यत्वमतिरपि सन्निबन्धना, न त्वसद्धेतुका । यदि तु योग्यत्वादिभेद एव वस्तुनि न विद्येत, तदा कथं लोको योग्यवस्त्वन्वेषणं कुर्यादिति विभावनीयम् । किञ्चाविभावितयोग्यत्वादेः कङ्कटुके पाकप्रयत्नवद्विफल-स्स्यादायासः । तथा ग्रन्थिमत्काष्ठं प्रतिमाघटनार्थमयोग्यम् - इति ज्ञानमपि व्यवहारानाश्रयणेऽप्रमाणं स्यादित्याद्यन्यत्र विस्तरः ।

प्रवृत्तौ मोक्षाङ्गं व्यवहारः । यथा साध्यदृष्टिप्रयोजकतया निश्चयनय उपयुज्यते, तथा पुरुषार्थविशुद्ध्यापादनार्थं व्यवहारोऽपि, अत एव पारमर्षम् - जइ जिणमयं पवज्जह, ता मा ववहारणिच्छये मुयह । ववहारणयुच्छेए तित्थुच्छेओ जतोऽवस्सं - इति ।

ननु च निश्चयनयाश्रयेण शुद्धात्मस्वरूपावलम्बनमेव मोक्षाङ्गमिति चेत् ? सोऽयं वदतो व्याघातः, स्वमतस्याप्येवमपाकरणात् । निश्चयनयेन हि शुद्धक्षायिकसम्यक्त्वज्ञानस्वभाव आत्मा । भवद्भिस्त्वद्याप्यशुद्धैव दृष्टिर्ध्रियते, सा च व्यवहारान्तर्गतैव । ननु सत्यप्येवं सा दृगुपादेयेति चेत् ? समः समाधिः, महाव्रताद्यनुष्ठानस्याप्येतन्नीत्योपादेयत्वानतिक्रमात् ।

## व्यवहारस्य तत्त्वाङ्गत्वे कारणत्रयम्

(१) प्रवृत्तिविशोधनेन - व्यवहारनयेन बाह्यचारित्रपालनेन परलोकप्रवृत्त्याः संशोधनं भवति । यावन्मात्राणि व्रत-नियम-त्याग-तपांस्यत्राचर्यन्ते, तावन्मात्रपापप्रवृत्त्यादिह्रासो भवतीत्यानुभविकम् । एतत्संस्कारेण परलोकेऽपि भवति तद्ध्रासः। तदनुभावेन चात्मपरिणतिविशुद्धिः । एवञ्च व्यवहारचारित्रं घटयति पारलौकिकविशुद्धतरपरिणतिम् ।

(२) अनेकान्तसिद्धितः - निश्चयव्यवहारनयद्वयस्याप्यनुसरणेन हि स्याद्वादस्य प्रमाणप्रसिद्धिरिति ।

(३) निश्चयाङ्गभावेन - व्यवहारतश्चारित्राद्यनुपालनेन पुरुषार्थविशुद्ध्याऽपूर्वकरणादिका निश्चयनयाभिमताऽऽराधना प्राप्यते ।

एवं हेतुत्रयेण व्यवहारोऽपि मोक्षाङ्गम् । दम्भ-मलिनाशंसादिविमुक्तः शुद्धो व्यवहार एव जिनाज्ञानुसारि पुष्टालम्बनम्, शुद्धनिश्चयधर्मप्रासादसोपानमित्यर्थः । अनन्तव्यवहारधर्मवैफल्ये

तदशुद्धिरेव बीजम् । अतो निश्चयधर्मं लक्ष्यीकृत्य शास्त्रोदितशुद्धचरणादिव्यवहारे यत्नो विधेयः, एवमेव सिद्धि-सिद्धेरिति ।

प्रत्याख्यानीयाभिधतृतीयकषायचतुष्कक्षयोपशमप्रादुर्भूतः शुद्धात्मपरिणामो निश्चयचारित्रम् । एतत्सम्पादनसंवर्धन-संरक्षणानि कुरुते व्यवहारचारित्रम् । न हि स्थाल्यां परिवेषितस्य भोजनस्य दर्शनमात्रेण तृप्तिर्भवति, अपि तु तत्कवलनादि-व्यवहारेणैव । किञ्च प्रियस्य जनस्य सत्कारादिना प्रीतिवृद्धि-रिति सर्वानुभव एव व्यवहारमहिमज्ञापकः । सत्समागमपरमात्म-दर्शन-वैराग्यश्रवण-सदनुष्ठानादिव्यवहार-धर्माचरणेन निश्चय-धर्माधिगम इति दृढमवधारणीयम् । अन्यथा निश्चयधर्माधिगम इति दृढमवधारणीयम् । अन्यथा तु स्वच्छन्दं विषयकषायादि-प्रवृत्त्या कृतः शुभभावोदय इति चिन्त्यम् । किञ्च व्यवहारा-पलापिनोऽपि निश्चयनयप्रदर्शनार्थमुपदेश-लेखपुस्तकादि-व्यवहारमेवाश्रयन्ति, एतदपि ज्ञापयति, यद् व्यवहारो निश्चयसिद्धावावश्यकमङ्गम् ।

एतत्त्वत्रावधेयम् - निश्चयस्य प्राप्तिरपि व्यवहारतः, निश्चयस्य पूर्णभावोऽपि व्यवहारतः, योगनिरोधलक्षणव्यवहारा-दरेणैवात्मप्रदेशस्थैर्यलक्षणनिश्चयपूर्णभावयोगात् ।

**सूत्र : एसा आणा इह भगवओ समंतभद्दा तिकोडि-परिसुद्धिए, अपुणबंधगाइगम्मा ।**

एषा - उभयनयप्ररूपिका पञ्चसूत्रोदितसर्वविधानात्मिका वा, जिनानाम् - अर्हद्भगवताम्, आज्ञा समन्तभद्रा - सर्वथाऽपि

निर्दोषा, त्रिकोटिपरिशुद्ध्या - कषच्छेदतापपरिशुद्ध्या । यथैव सुवर्णं निकषेण छेदेन तापेन च परीक्ष्यते, एवमेव शास्त्रवचोऽपि। तथा हि हितविधानान्यहितनिषेधानि यत्र सन्ति तच्छास्त्रं कषशुद्धम् । तादृशविधिनिषेधनिर्वाहकक्रियाऽऽचारप्रतिपादकं शास्त्रं छेदशुद्धम् । उक्तविधिनिषेधाऽऽचारकदम्बकं येन साङ्गत्यमुपेयात्, तादृशतत्त्वनिरूपणं यत्र शास्त्रे विद्यते, तत्तापशुद्धम् ।

एतत्परीक्षात्रितयोत्तीर्णानि खलु जिनवचांसि, (१) स्वाध्यायादिविधीनां हिंसादिनिषेधानां च तेषूपलब्धेः । (२) एतन्निर्वाहप्रयोजकानां तपः प्रृतीनां समित्यादीनां चाप्युपलम्भात्। (३) उक्तसर्वसाङ्गत्यप्रयोजकनित्यानित्याऽऽत्मादितत्त्व-निरूपणप्राप्तेश्च । न ह्येकान्तनित्ये सत्यात्मनि निषिद्धानां हिंसादीनां परिहारो विहितानां च तपश्चरणादीनामासेवनं घटाकोटिमाटीकते । नाप्येकान्तेन क्षणिक आत्मनि, हिंसात्यागकर्तुः तपउपादानकर्तुश्च क्षणनष्टत्वात् तदकर्तुश्च फलयोगित्वात् कृतनाशाकृताभ्यागमदोषानुषङ्गात् । अतो नित्यानित्य एवात्मनि सर्वसाङ्गत्यसद्भावात्तत्प्रतिपादकः स्याद्वाद एव जिनाभिहितः शरणीकार्यः ।

एवंविधं च जिनवचनमपुनर्बन्धकादिगम्यम् । सप्ततिकोटाकोटिसागरमितामुत्कृष्टां कर्मस्थितिं यः पुनर्न बध्नाति, अपुनर्बन्धकत्वेन क्षपयति, सोऽपुनर्बन्धकः । आदिना मार्गाभिमुख - मार्गपतितादिग्रहः । सम्यक्त्वलक्षणविशिष्टगुण-स्थानकप्रापकघातिकर्मक्षयोपशमविशेषः, येन तत्त्वश्रद्धानं प्रति

चेतसोऽवक्रगमनं स्यात्, स मार्गः । एतत्प्रविष्टो मार्गपतितः। एतत्प्रवेशयोग्यो मार्गाभिमुखः ।

स च दृढप्रतिज्ञत्वादिगुणेन परिज्ञायते । स्वकृतस्खलनायाश्च गुरुसकाश आलोचनां स सम्यक् कुरुते । न च बहुमन्यते संसारम् । एवंविधा एव जीवा जिनवचोऽधिगमार्थं योग्याः, नान्ये भवाभिनन्दिनः । तेषां ह्यतो विषयप्रतिभासमात्रं ज्ञानमुदेति । न तद्द्वेषत्वादिवेदकम्, तत्त्वपरिणतिमदित्यर्थः। यथाऽऽत्माहितकारिण इन्द्रियेष्टविषयसंयोगाः - इति जिनवचसः प्रतिभासमात्रमुपजायते तेषाम् । न तु तद्गोचरद्वेष्यमतिरुदेति, एवञ्च तत्तत्त्वपरिणतिविरह एव तेषाम् । अत एवाभिहितम् - न यथावस्थितं शास्त्रं खल्वङ्को वेत्ति जातुचित् । ध्यामलादपि बिम्बात्तु, निर्मलः स्यात् स्वहेतुतः - इति । न हि दर्पणं मलिनं मुखं विशोधयति, अपि तु तत्र तत्प्रतिबिम्बं दृष्ट्वा जनो योग्यसाधनव्यापारणेन स्वमुखमुज्ज्वलीविधत्ते । एवं भवाभिनन्दिजीवस्य बाह्यप्रवृत्तिलक्षणे दर्पणे योग्यजीव आत्मनो मालिन्यं दृष्ट्वा स्वकीययोग्यतानुभावेन परिश्रमप्रभावाच्च निर्मलो भवति । अतः - कथं परिणतिविरहे भवाभिनन्दिनां परोत्तारकत्वमुपपद्येत - इति शङ्कानवकाशः ।

**सूत्र : एअप्पिअत्तं खलु इत्थ लिंगं ओचित्तिपवित्तिविन्नेअं, संवेगसाहगं णिअमा ।**

आज्ञाप्रियता ह्यपुनर्बन्धकत्वादिलिङ्गम् - इति सूत्रकारमहर्षयः । उपलक्षणमेतत्, तेनाऽऽज्ञाश्रवणतदभ्यासावपि लिङ्गभूतौ दृष्टव्यौ । स हि भवाभिनन्दितामतिक्रम्यापुनर्बन्धक-

त्वाद्यलङ्कारालङ्कृतो भवति, यस्य प्रिया स्याज्जिनाज्ञा । चिन्तयत्येष अहो भवसहस्रदुर्लभा खलु जिनाज्ञाऽवाप्ता मया। अत्र हि तद्रुचि-ज्ञाना-ऽनुष्ठानावसरः । तद्वञ्चितस्य क्व पुनस्तदवाप्तिर्मम - इति ।

जिनाज्ञानुपालनगोचरः परिश्रम एव प्रादुर्भावयत्यनन्तं वीर्यम्। जिनाज्ञापालनगोचरमेव ज्ञानं प्रापयत्यनन्तं केवलज्ञानम्। जिनाज्ञापालने व्ययिता शक्तिः प्रकटयत्यनन्तमात्मसामर्थ्यम्। जिनाज्ञापालनमेव सौख्यमितिमानिन उदेत्यनन्तं सुखम् । जिनाज्ञाप्रियत्वमपि ज्ञायत उचितप्रवृत्त्या । उचितप्रवृत्तिरेव जिनाज्ञाबहुमानजीवनम् । तदतिक्रमेण प्रवृत्तेर्मोहताण्डवत्वानतिंक्रमात् ।

आज्ञा हि ज्ञापयति संसारमसारत्व-तुच्छत्वादिविशिष्टम्। यदि चैनं यथावस्थितं जानीयात्, तदा गौणीकुर्यादैहिकादिप्रलोभनम्, न तु जिनाज्ञाम् । इष्टविषयगोचरादर एवौचित्यातिक्रमप्रयोजकः । तदादरवतः कुतो जिनाज्ञाबहुमानः? विषयकषायहेयत्व एव जिनाज्ञातात्पर्यभावात् । अतो जिनाज्ञानुरागी सर्वत्र मनोवाक्कायैरुचितप्रवृत्तिर्यथा स्यात्, तथा प्रयतेत । एषोऽवश्यं साधयति संवेगम् । संवेगो नाम मोक्षस्य मोक्षसाधकस्य च जिनधर्मस्य तीव्राभिलाषः । यदि तु संवेगो न विद्यते हृदि, तदा जिनाज्ञानुरागोऽपि नैव विद्यते परमार्थतः, इति दृढमवधारणीयम् । न हि स्वजन्यमजनयद् वस्तु स्वरूपमेव लभते, निश्चयतस्तस्य कुर्वद्रूपत्वादिति हृदयम्।

संवेगिनस्त्वाज्ञानुपालनानुभावेन स्वर्गादिप्राप्तिस्स्यात्त-त्राप्यसावौचित्यानतिक्रमेण संवेगविरागरसप्रसराऽऽप्लावित एव तिष्ठेत् । संवेगाभावेन भवाभिनन्दी कथञ्चिद् भोगसमृद्धिं प्राप्य बाढं तस्यां गृद्ध्यति, व्रजति च दुर्गतिम् ।

## (१४) अपात्रे जिनाज्ञाविनियोगः कारुण्यम्

**सूत्र : न एसा अन्नेसिं देआ । लिंगविवज्जयाओ तप्परिण्णा । तयणुग्गहयट्ठयाए आमकुंभोदगनासनाएणं एसा करुणत्ति वुच्चइ एगंतपरिसुद्धा, अविराहणाफला, तिलोगनाहबहुमाणेणं निस्सेअससाहिगत्ति पवज्जाफलसुत्तं । (इति श्रीपञ्चसूत्रम्)**

अथैषा जिनाज्ञा कस्मै न देयेत्याह - यस्य हि जिनाज्ञा-प्रियत्वं नास्ति, तस्मै नैषा देया । स ह्यवगणयत्येतदभि-हितसूक्ष्माऽऽचारप्रपञ्चम् । उपहसत्येतत्कृतविधिनिषेधान् । उन्माद्यति जिनाज्ञोपहासादिना । ततश्च बम्भ्रमति दारुणसंसार-सन्ततौ । अतोऽपुनर्बन्ध-कादितोऽन्ये, येऽसंवेगिनोऽनुचित-कारिणश्च, तेभ्यो भवाभिनन्दिभ्यो न देया जिनाज्ञा, नैभ्यः कथनीयानि शास्त्ररहस्यानि, नापि दर्शनीय जिनाज्ञोपदिष्टो मार्ग इत्याशयः ।

ननु कथन्नामेदृशायोग्यजीवपरिज्ञानं स्यादिति चेत् ? अपुनर्बन्धकादिलिङ्गविपर्यादिति गृहाण यथा तीव्रा विषयपरिग्रहादिसञ्ज्ञा, मुक्तिद्वेषः, अनुचितकारिता चेत्यादि । क्षुद्रतादीनि तल्लक्षणानि तु प्रागुक्तान्येव ।

स्यादेतत्, एकान्तहितरूपत्वेन जिनाज्ञायास्तेभ्योऽपि

वराकेभ्यो देयैव जिनाज्ञा, तदन्तरेण तेषां भीमभवसागरोत्तारस्यासम्भवादिति चेत् ? न, तेभ्यस्तददानेनैव तदनुग्रहस्य सम्भवात्, अप्रशान्तमतित्वात्तेषां जिनाज्ञाग्रहणस्य दोषनिबन्धनत्वपर्यवसानात्, उक्तञ्च - अप्रशान्तमतौ शास्त्रसद्भावप्रतिपादनम् । दोषायाभिनवोदीर्णे, शमनीयमिव ज्वरे - इति (सिद्धसेनी द्वात्रिंशिकायाम् १८ - २८)

अत्राऽऽमकुम्भोदकन्यासोऽपि निदर्शनम्, यदुक्तम् - आमे घडे निहित्तं, जहा जलं तं घडं विणासेइ । इय सिद्धंतरहस्सं, अप्पाहारं विणासेइ - इति (पञ्चवस्तुके ९८२) अल्पाधारम् - अयोग्याऽऽधारम् । अतोऽयोग्याय जिनाज्ञाऽप्रदान एव तद्दया । एषैव दयैकान्तपरिशुद्धा, उक्तदोषपरिहार-प्रवणत्वात् । स्वपराविराधना फला चैषा, सम्यगालोचनेन ।

अयोग्यायापि जिनवचनविनियोगलक्षणा तु न दया, अपि तु दयाभासा, ग्लानापथ्यप्रदानक्रियावत् । भवति हि भवाभिनन्दिनस्तीव्रा विषयगृद्धिः, अत उपहसत्ययं तत्त्यागोपदेशपरं जिनवचनम् । जुगुप्सत एतत् । द्वेष्टि च । तदेतत्पापतरं निपीडयति तं जीवं दुर्गतितती । न चैवं तद्गोचरं कारुण्यं कृतं स्यात् ।

न च दयाभासेयमेनं रक्षति जिनाज्ञाविराधनात् । जिनाज्ञाऽविनियोगलक्षणा तु दया रक्षति ततः । एवमेव चाखण्डितो भवति त्रिलोकनाथतीर्थकरदेवगोचरो बहुमानभावः । अतो मोक्षसाधिकेयं करुणा ।

भवाभनन्दिने जिनवचनमददानो रक्षति तमधिकतरादनर्थात्, स्वयमपि च विराधनापरिहारेण साधयति मुक्तिम् । एवंविध-दयास्वरूपप्ररुपकं भगवन्तमपि बहुमन्यत एष एव ।

अयं भावः - यस्य हि जिनोक्ताऽऽगमावगमपरिणतिर्नास्ति, स न तात्त्विकां दयां कर्त्तुं शक्नोति । यस्योक्तपरिणतिर्विद्यते, स एव वास्तवकारुण्ये शक्तः । यतो हि रसादिवृद्धिस्स्यात्, सैव परिणतिः, न त्वजीर्णविकारकर्त्री । सा ह्यागमपरिणतिः, ययाऽपात्रदानसाहसा - ऽदीर्घदृष्टि - आगमातिक्रमाद्या विकारा नोद्भवेयुः । एवंविधस्य विशिष्टो भगवद्बहुमानो भवतीति न किञ्चित्तत्र चित्रम् । आगमपरिणतिमान् यां तात्त्विकां दयां विधत्ते, सा सानुबन्धसुप्रवृत्तिभावेन - परमार्थसाधकसत्प्रवृत्ति-परम्परया नियोगतो मोक्षसाधिका । इति पञ्चमं प्रव्रज्याफलसूत्रं सव्याख्यं समाप्तम् । चरममङ्गलमेवमाहाऽत्र टीकाकृन्महर्षिः - नमः श्रुतदेवतायै भगवत्यै । सर्वनमस्कारार्हेभ्यो नमः । सर्वनमस्कारार्हेभ्यो नमः । सर्ववन्दनार्हान् वन्दे । सर्वोपकारिणामिच्छामो वैयावृत्त्यम् । सर्वानुभावादौचित्येन मे धर्मप्रवृत्तिर्भवतु । सर्वे सत्त्वाः सुखिनः सन्तु । सर्वे सत्त्वा सुखिनः सन्तु । सर्वे सत्त्वा सुखिनः सन्तु - इति ।

मिथ्याऽस्तु दुरुक्तं मम । शोधयन्तु कृतकृपा बहुश्रुताः । इति

चरमतीर्थपति-करुणासागर-
श्रमणभगवन्महावीरस्वामिशासने
जिताजितारिश्रीअजितनाथभगवत्पुण्यसान्निध्ये
मुनिरसाम्बरनयने (२०६७) वैक्रमेऽब्दे
फाल्गुनशुक्लप्रतिपदि
मलाडस्थिते जितेन्द्रमार्गस्थे श्रीसङ्घे
चिरन्तनाचार्यकृतश्रीपञ्चसूत्रगोचरयाकिनीमहत्तरासूनु-
आचार्यवर्यश्रीहरिभद्रसूरिपुरन्दरविरचितवृत्तिविषय-
वर्धमानतपोनिधि-
आचार्यवर्यश्रीभुवनभानुसूरीश्वरविहित-
'उच्च प्रकाशना पंथे' इत्यभिध-गुर्जरविवरणस्य
तपागच्छीयाचार्यदेव श्रीमद्विजयप्रेम-भुवनभानु-
पद्म-हेमचन्द्रसूरीश्वरशिष्य-
आचार्यविजयकल्याणबोधिसूरिसंवर्णित-
संस्कृततात्पर्यानुवादरूपा
पञ्चसूत्रोपनिषद्

# પરિશિષ્ટ-૧

## એક વિલોકન વિવેચકનું

સાગર ગંભીર છે, પણ મીઠો નથી, સૂર્ય તેજસ્વી છે, પણ શીતળ નથી, ચંદ્ર સૌમ્ય છે, પણ નિષ્કલંક નથી, સિંહ શૂરવીર છે, પણ દયાળુ નથી... આ સૂચિનો અંત આવે તેમ નથી. મહાકવિ કાલિદાસે કહ્યું છે, 'नैकत्र सर्वगुणसन्निपातः ' એક જ પાત્રમાં સર્વ ગુણો આવી પડતાં નથી. મહાકવિની આ પંક્તિ ઠેર ઠેર સંવાદી થતી હશે, એની ના નહીં, પણ એક પાત્રમાં એ વિસંવાદી પુરવાર થાય છે, જેનું નામ છે વર્દ્ધમાનતપોનિધિ ન્યાયવિશારદ આચાર્યદેવ શ્રીમદ્વિજય **ભુવનભાનુસૂરીશ્વરજી** મહારાજા.

કલ્પનાની આંખે જોઈએ તો એવું લાગે કે ક્યારેક રાબેતા મુજબનું સર્જન કરતા વિધાતા કંટાળતો હશે અને આવા યુગપુરુષનું સહજ સર્જન થઈ જતું હશે. સાધનાના કયા કક્ષને આ ભુવનભાનુએ અજવાળ્યો નથી, એ જ એક પ્રશ્ન છે. ચાલો, એ અજવાળામાંથી કેટલાક તેજકિરણોનું સાન્નિધ્ય માણીએ, અને તેના દ્વારા આપણા જીવનને ઉજાસથી ભરી દઈએ.

## તરવરાટ

જ્ઞાનાચાર, દર્શનાચાર, ચારિત્રાચાર અને તપાચારની આરાધનાનો જે અદમ્ય ઉલ્લાસ એનું જ નામ વીર્યાચાર. સાધનાનો તલસાટ કહો, આરાધનાનો તરવરાટ કહો, મોક્ષની ઉત્કંઠા કહો કે નિર્જરાની અભીપ્સા કહો, આ સર્વનું મૂર્તિમંત સ્વરૂપ હતા પૂજ્યશ્રી. તેમનો તરવરાટ કોઇ ક્ષણે છૂપો ન રહી શકતો.

૮૨ વર્ષની ઉંમરે સોલ્જરની જેમ વિહાર કરતી એમની મુદ્રા....૮૩ વર્ષની ઉંમરે સ્પ્રિંગની જેવી સ્ફૂર્તિથી પ્રમાર્જનાપૂર્વક ઉભા થઇ-થઇને ખમાસમણા દેતી એમની કાયા....શિબિરોમાં છ-છ કલાકના પ્રવચનો આપીને ઉપાશ્રયમાં પગ મુકતાની સાથે વાચનાનું નિમંત્રણ આપતા એમના મધુર વચન.... વર્ધમાન તપની ૧૦૦ મી ઓળીના અંતિમ દિને ૧૦૧મી ઓળીના શમણા સેવતી એમની ચિત્તવૃત્તિ....શિષ્યના શિષ્યના શિષ્ય બિમાર પડે, તો તેમની પણ સેવા કરવાની સહજ વૃત્તિ.... શબ્દોના બીબામાં તેમનો અમાપ અફાટ તરવરાટ સમાઇ જાય એવી કોઇ જ શક્યતા નથી.

## વિરાગમહાસાગર

'સાહેબ ! ચોમાસું પૂરું થશે, ચાર ચાર મહિના આપે પ્રવચનગંગા વહાવી. આપનું પ્રવચન તો બેજોડ છે જ. સાથે સાથે મેં એક વાત માર્ક કરી છે કે આપે કદી

પણ એક ક્ષણ માટે પણ, ઉડતી નજરે પણ બહેનોની પર્ષદા તરફ નજર કરી નથી.'

સંસારને જ્યાં આશ્ચર્ય જણાય છે, એ યોગીની સહજદશા હોય છે. ચશ્માની ગોલ્ડન ફ્રેમ પરના કાળા લપેડા, કપડાના દોરાઓની રીવર્સ એક્ઝીટ, એક ઝાટકે મેવા-મિઠાઇ-ફ્રૂટનો આજીવન ત્યાગ, ભક્તોની ભૂતાવળથી સદા ય સલામત અંતર, સાદામાં સાદા ઉપકરણો....ક્યાં ક્યાં એમની વિરાગની ધજા ફરકતી ન હતી, એ જ એક પ્રશ્ન છે

## અનરાધાર પ્રવચનધારા...

પૃથ્વીચંદ્ર-ગુણસાગર, વિજયશેઠ-વિજયાશેઠાણી જેવા પાત્રો હોય, અંતરમાં ઘૂઘવાટા કરતો વૈરાગ્યનો દરિયો પ્રવચનના માધ્યમે પ્રગટ થઇ રહ્યો હોય, સંવેદનની અભિવ્યક્તિ પરાકાષ્ઠાએ પહોંચી હોય, શ્રોતાગણની આંખો અવિરત અશ્રુધારા કરતી હોય, પથ્થર હૃદયો પણ પીગળી જતાં હોય, વિષય-કષાયોના મિનારાઓ કડડડભૂસ થઈને તૂટી પડતા હોય, કઠિન કર્મોના પડળો પળે પળે ધોવાતા હોય... આ કોઇ એકાદ દિવસની વાત નથી. પૂજ્યશ્રી ૫૦-૫૦ વર્ષો સુધી મન મૂકીને આ રીતે વરસ્યા છે અને હજારો-લાખો ભવ્યાત્માઓના ઉદ્ધાર કર્યા છે. શિબિર જેવા વિશિષ્ટ આલંબનની શ્રીસંઘને ભેટ ધરી છે અને તેના માધ્યમે શ્રીસંઘના દેદાર પલટી નાખ્યા છે.

## શાસ્ત્રપારગામિતા

છઠ્ઠના પારણે છઠ્ઠ કરીને આત્મતત્ત્વવિવેક જેવા જટિલ ગ્રંથોનો અભ્યાસ....ન્યાયભૂમિકા જેવા માસ્ટર કી-ગ્રંથોનું સર્જન.... ૫૦ વર્ષ પહેલા ભણેલા ગ્રંથો પણ જાણે તાજા જ હોય એમ ઉપસ્થિત... શાસ્ત્રપંક્તિઓના ગંભીરતમ અર્થોને પ્રગટ કરવાની એક સહજ કળા... કાળધર્મના આગલા દિવસ સુધી અવિરત અધ્યાપનપ્રવૃત્તિ... ચમત્કૃતિસભર ચિંતનો દ્વારા ચાંદનીનો સદુપયોગ...શતાધિક શાસ્ત્રોના સર્જન... દિવ્યદર્શનના માધ્યમે વિશ્વને દિવ્ય જ્ઞાનદષ્ટિનું પ્રદાન... હજારો શ્લોકો પ્રમાણ સંસ્કૃત-પ્રાકૃત ગ્રંથો કંઠસ્થ... આગમના રહસ્યો હૃદયસ્થ... વધુ તો શું કહું ? ઘણી વાર એવું લાગે છે કે આપણે 'ન્યાયવિશારદ' કહીએ છીએ, તેમાં પૂજ્યશ્રીને અન્યાય તો નથી થતો ને ?

## કૃતજ્ઞતા

શતાધિક શિષ્યોના ગુરુ બન્યા પછી ય પોતાના ગુરુદેવની સેવામાં ઉછળતે ઉમંગે પડાપડી, ગુરુની વૃદ્ધવયે હોંશે હોંશે તેમને ખભે ઉંચકીને વિહાર, ગુરુના કાળધર્મના સમાચાર સાંભળતા જ અસહાય બાળકની જેમ કરેલું આક્રંદ... ગૃહસ્થ વિદ્યાગુરુનો પણ અદ્ભુત વિનય... પોતાની ૧૦૦ ઓળીનો યશ એક શ્રાવકને જાય છે... એવી જાહેરમાં જાહેરાત... ખરેખર યુગપ્રભાવક હોવા છતાં પણ આ સ્થિતિ પ્રકૃષ્ટ ગુણિયલતા વિના શક્ય જ નથી.

# જિનશાસનનિષ્ઠા

'અહિંસા પરમો ધર્મ:' આ પ્રભુ વીરના નાદને જગતમાં ગુંજતો કર્યો, અનેક સ્થળોએ કતલખાના, બલિપ્રથા, ઈંડાવિતરણ બંધ કરાવ્યા, ગીરના જંગલમાં સિંહદર્શનની હિંસક યોજનાને ઉચાળા ભરાવ્યા, દિવસ-રાત અથાગ પરિશ્રમ કરીને બાળદીક્ષાની રક્ષા કરી, દેવદ્રવ્ય આદિ અનેક બાબતોમાં જિનાજ્ઞાનું પ્રવર્તન કરાવ્યું... જિનશાસનનિષ્ઠાની પરાકાષ્ઠા તો ત્યાં દાખવી કે જ્યાં સામુદાયિક પક્ષપાતને ગૌણ કરીને સમગ્ર શ્રીસંઘના હિતને મુખ્ય કર્યું. જિનશાસનહીલના અને શ્રીસંઘસંક્લેશનું નિવારણ કરવા માટે કડવા અપમાનોને સહન કરી લીધા. ગુરુના આશયને સતત અનુસરતા રહીને સ્વર્ગસ્થ ગુરુદેવના પણ અનહદ આશીર્વાદ પામી લીધા.

કળિકાળની અંધારી રાતે ઉગેલો એક ઝળહળતો ભાનુ... પાંચમા આરે ય ચોથા આરાના અપ્રમત્ત સાધક સાધનાના પ્રદેશે પ્રદેશને અજવાળતું દેદીપ્યમાન વ્યક્તિત્વ... સહજપણે Master of all જેવા ઉદ્ગારો નીકળી જાય. એવી એક વિરલ વિભૂતિ... એવા પૂજ્યશ્રીના ચરણોમાં કોટિ કોટિ વંદના.

**ગુરુપાદપદ્મરેણુ**
**આચાર્ય વિજય કલ્યાણબોધિસૂરિ**

# अथ प्रशस्तिः

श्रीमते वीरनाथाय, कारुण्यपुण्यपाथसे ।
चरमतीर्थनाथाय, परोपकारिणे नमः ॥१॥

गौतमस्वामिने स्वस्ति, सुधर्मस्वामिने नमः ।
तत्परम्परयाऽऽयात-यतीन्द्रेभ्यो नमो नमः ॥२॥

शुभ्राभ्रशुभ्रसन्तत्या-मेतस्यामभवत् किल ।
विजयानन्दसूरीशः, सुरीशसेव्यतां गतः ॥३॥

ततोऽपि कमलः सूरिः, संयमकमलाकरः ।
उपाध्यायस्तथा वीरो, वीर आन्तरविग्रहे ॥४॥

सर्वागमरहस्यज्ञ-स्ततो दानसूरीश्वरः ।
ततोऽपि प्रेमसूरीशः, सिद्धान्तैकमहोदधिः ॥५॥

भुवनभानुसूरीश-स्ततो न्यायविशारदः ।
पंन्यासोऽस्यानुजः पद्मः, समतारससागरः ॥६॥

विराजते विनेयोऽस्य, मादृशेषु कृपापरः ।
वैराग्यदेशनादक्षः, श्रीहेमचन्द्रसूरिपः ॥७॥

तत्पादपङ्कजालिना, सूरिकल्याणबोधिना ।
सन्दृब्धोऽयं प्रबन्धस्तु, कुर्यात् सर्वस्य मङ्गलम् ॥८॥



# સુકૃત અનુમોદના

## શ્રી જિનશાસન સુકૃત મુખ્ય આધારસ્તંભ

(૧) શ્રી નયનબાળા બાબુભાઈ જરીવાલા પરિવાર
હ. લીનાબેન ચંદ્રકુમારભાઈ જરીવાલા - મુંબઈ.

(૨) શ્રી મૂળીબેન અંબાલાલ શાહ પરિવાર
હ. રમાબેન પુંડરીકભાઈ શાહ, ખંભાત - મુંબઈ.

(૩) શ્રી નયનબાળા બાબુભાઈ જરીવાલા પરિવાર
હ. શોભનાબેન મનીશભાઈ જરીવાલા - મુંબઈ

(૪) શ્રી સાયરકંવર યાદવસિંહજી કોઠારી પરિવાર
હ. મીનાબેન વિનયચન્દ કોઠારી

(૫) હસમુખભાઈ કેસરીચંદ ચૂડગર (ઈન્ટાસ), અમદાવાદ

## શ્રી જિનશાસન સુકૃત આધારસ્તંભ

(૧) શ્રી કમળાબેન કાંતિલાલ શાહ પરિવાર
હ. બીનાબેન કીર્તિભાઈ શાહ (ઘાટકોપર-સાંઘાણી)

(૨) જાગૃતિબેન કૌશિકભાઈ બાવીશી
ડાલીની જયકુમાર મહેતા, મ્હેંક, કાંદિવલી, મુંબઈ.

## શ્રી શ્રુતોદ્ધાર મુખ્ય આધારસ્તંભ

(૧) શ્રી માટુંગા શ્વે.મૂ. જૈન સંઘ - મુંબઈ

(૨) શ્રી અઠવાલાઈન્સ શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ અને
શ્રી ફૂલચંદ કલ્યાણચંદ ઝવેરી ટ્રસ્ટ, સુરત.

(૩) શ્રી ગોવાલિયા ટેન્ક જૈન સંઘ - મુંબઈ

(૪) શ્રી નવજીવન શ્વે.મૂ. જૈન સંઘ - મુંબઈ

## શ્રી શ્રુતોદ્ધાર આધારસ્તંભ

(૧) શ્રી હેમચંદ્રાચાર્ય જૈન જ્ઞાનમંદિર - પાટણ

(૨) શ્રી મનફરા શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ - મનફરા
(પ્રેરક : પ.પૂ.આચાર્યદેવ શ્રીમદ્ વિજયકલાપ્રભસૂરીશ્વરજી મહારાજા)

(૩) શ્રી નડિયાદ શ્વે.મૂ. જૈન સંઘ - નડિયાદ

(૪) શ્રી કે.પી. સંઘવી ચેરીટેબલ ટ્રસ્ટ સંચાલિત
શ્રી પાવાપુરી તીર્થધામ-જીવમૈત્રીધામ

(૫) શ્રી શંખેશ્વર પાર્શ્વનાથ શ્વે. મૂ. તપાગચ્છ જૈન સંઘ,
શ્રી જયાલક્ષ્મી આરાધના ભવન, ઘાટકોપર (ઈસ્ટ), મુંબઈ

(૬) શ્રી જૈન શ્વેતાંબર મૂર્તિપૂજક સંઘ, સાયન (શિવ), મુંબઈ

(૭) શ્રી બાબુભાઈ સી. જરીવાલા ચેરીટેબલ ટ્રસ્ટ,
હ. શ્રી આદિનાથ જૈન સંઘ, નિઝામપુરા, વડોદરા.

(૮) શ્રી રિદ્ધિ સિદ્ધિ વર્ધમાન હાઈટ્સ શ્વે. મૂ. જૈન સંઘ,
ભાયખલા, મુંબઈ. (પ્રેરક : પ.પૂ.મુ. શ્રી જિનપ્રેમવિજયજી મ.)

(૯) શ્રી આદિનાથ સોસાયટી જૈન ટેમ્પલ ટ્રસ્ટ, પૂના,
(પ્રેરક : પૂ.પં. શ્રી અપરાજિતવિજયજી ગણિવર્ય)

(૧૦) શ્રી મુલુંડ શ્વે.મૂ. તપાગચ્છ સમાજ, મુંબઈ
(પ્રેરકઃ પૂ.પં.શ્રી હિરણ્યબોધિવિ. ગણિ, પૂ.મુ. શ્રી હેમદર્શનવિ.મ.)

(૧૧) શ્રી વિક્રોલી સંભવનાથ જૈન શ્વે.મૂ.પૂ. સંઘ, વિક્રોલી (ઈ), મુંબઈ
(પ્રેરકઃ પૂ.મુ. શ્રી યશકલ્યાણવિ. મ., મુ. શ્રી તીર્થપ્રેમવિ. મ.)

(૧૨) શ્રી વિશ્વનંદીકર જૈન સંઘ, ભગવાનનગરનો ટેકરો, અમદાવાદ.
(પ્રેરક : પૂ.આ. શ્રી જગચ્ચંદ્રસૂરીશ્વરજી મ.સા.)

(૧૩) શ્રી આદીશ્વરજી મહારાજ મંદિર ટ્રસ્ટ, શ્રી દશા ઓસવાળ સિરોહીયા,
સાથ ગોટીવાળા, ધડા, પૂના. (પ્રેરક : પૂ.મુ. શ્રી અભયરત્નવિ. મ.)

(૧૪) શ્રી ગોડીજી ટેમ્પલ ટ્રસ્ટ, પૂના
(પ્રેરક : પૂ.આ. શ્રી કલ્યાણબોધિસૂરીશ્વરજી મ.સા.)

(૧૫) આ. શ્રી હેમપ્રભસૂરિજીની આચાર્ય પદવી પ્રસંગે
કસ્તુરધામ પાલીતાણા. (પ્રેરક : પૂ.પં. શ્રી વજ્રસેનવિજયજી મ.સા.)

## શ્રી શાસન સુકૃત રજતસ્તંભ

(૧) શેઠ શ્રી કસ્તૂરભાઈ લાલભાઈ ચેરીટેબલ ટ્રસ્ટ,
નવરંગપુરા, અમદાવાદ. (હ. શ્રી શ્રેણીકભાઈ કસ્તૂરભાઈ)

## શ્રુતસમુદ્ધારક

૧) ભાણબાઈ નાનજી ગડા, મુંબઈ. (પ. પૂ. ગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્વિજયભુવનભાનુસૂરિ મ. સા.ના ઉપદેશથી)

૨) શેઠ આણંદજી કલ્યાણજી, અમદાવાદ.

૩) શ્રી શાંતિનગર શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, અમદાવાદ.
(પ. પૂ. તપસમ્રાટ આચાર્યદેવ શ્રીમદ્વિજયહિમાંશુસૂરિ મ. સા.ની પ્રેરણાથી)

૪) શ્રી શ્રીપાળનગર જૈન ઉપાશ્રય ટ્રસ્ટ, વાલકેશ્વર, મુંબઈ.
(પ.પૂ. ગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્વિજય રામચંદ્રસૂરિ મ.સા.ની દિવ્યકૃપા તથા પૂ. આચાર્યદેવ શ્રીમદ્વિજય મિત્રાનંદસૂ. મ.સા.ની પ્રેરણાથી)

૫) શ્રી લાવણ્ય સોસાયટી શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, અમદાવાદ. (પ. પૂ. પંન્યાસજી શ્રી કુલચંદ્રવિજયજી ગણિવર્યની પ્રેરણાથી)

૬) નયનબાલા બાબુભાઈ સી. જરીવાલા હા. ચંદ્રકુમાર, મનીષ, કલ્પનેશ (પ. પૂ. મુનિરાજશ્રી કલ્યાણબોધિ વિજયજી મ. સા.ની પ્રેરણાથી)

૭) કેશરબેન રતનચંદ કોઠારી હા. લલિતભાઈ (પ. પૂ. ગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્વિજય જયઘોષસૂરીશ્વરજી મહારાજાની પ્રેરણાથી)

૮) શ્રી શ્વેતાંબર મૂર્તિપૂજક તપગચ્છીય જૈન પૌષધશાલા ટ્રસ્ટ, દાદર, મુંબઈ.

૯) શ્રી મુલુંડ શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, મુલુંડ, મુંબઇ. (પ.પૂ. આચાર્યદેવ શ્રીહેમચંદ્રસૂરીશ્વરજી મ. સા.ની પ્રેરણાથી)

૧૦) શ્રી સાંતાક્રુઝ શ્વેતાં. મૂર્તિ તપાગચ્છ સંઘ, સાંતાક્રુઝ, મુંબઇ. (પ.પૂ. આચાર્યદેવ શ્રીહેમચંદ્રસૂરિ મ. સા.ની પ્રેરણાથી)

૧૧) શ્રીદેવકરણ મૂલજીભાઇ જૈન દેરાસર પેઢી, મલાડ (વેસ્ટ), મુંબઇ. (પ. પૂ. મુનિરાજ શ્રી સંયમબોધિવિ. મ. સા.ની પ્રેરણાથી)

૧૨) સંઘવી અંબાલાલ રતનચંદ જૈન ધાર્મિક ટ્રસ્ટ, ખંભાત.
(પૂજ્ય સાધ્વી શ્રી વસંતપ્રભાશ્રીજી મ., પૂજ્ય સાધ્વી શ્રી સ્વયંપ્રભાશ્રીજી મ. તથા પૂ. સા. શ્રી દિવ્યયશાશ્રીજી મ.ની પ્રેરણાથી મૂળીબેનની આરાધનાની અનુમોદનાર્થે)

૧૩) બાબુ અમીચંદ પન્નાલાલ આદીશ્વર જૈન ટેમ્પલ ચેરીટેબલ ટ્રસ્ટ, વાલકેશ્વર, મુંબઇ-૬.
(પૂ. મુનિરાજશ્રી અક્ષયબોધિવિજયજી મ.સા., પૂ. મુનિરાજશ્રી મહાબોધિવિજયજી મ.સા. તથા પૂ. મુનિરાજશ્રી હિરણ્યબોધિ વિજયજી મ.સા.ની પ્રેરણાથી)

૧૪) શ્રી શ્રેયસ્કર અંધેરી ગુજરાતી જૈન સંઘ, મુંબઇ. (પૂ. મુનિરાજશ્રી હેમદર્શન વિ.મ. તથા પૂ. મુનિરાજશ્રી રમ્યઘોષ વિ.મ.ની પ્રેરણાથી)

૧૫) શ્રી જૈન શ્વેતાંબર મૂર્તિપૂજક સંઘ, મંગલ પારેખનો ખાંચો, શાહપુર, અમદાવાદ. (પ. પૂ. આચાર્યદેવ શ્રીરૂચકચંદ્રસૂરિ મ.ની પ્રેરણાથી)

૧૬) શ્રી પાર્શ્વનાથ શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, સાંઘાણી એસ્ટેટ, ઘાટકોપર (વેસ્ટ), મુંબઇ. (પૂ. મુનિરાજશ્રી કલ્યાણબોધિવિજયજી મ. સા.ની પ્રેરણાથી)

૧૭) શ્રી નવજીવન સોસાયટી જૈન સંઘ, બોમ્બે સેન્ટ્રલ, મુંબઇ. (પૂ. મુનિરાજશ્રી અક્ષયબોધિ વિ. મ.ની પ્રેરણાથી)

૧૮) શ્રી કલ્યાણજી સૌભાગચંદજી જૈન પેઢી, પિંડવાડા. (સિદ્ધાંતમહોદધિ સ્વ. આ. શ્રીમદ્વિજયપ્રેમસૂરીશ્વરજી મ. સા.ના સંયમની અનુમોદનાર્થે)

૧૯) શ્રી ઘાટકોપર જૈન શ્વેતાંબર મૂર્તિપૂજક સંઘ, ઘાટકોપર (વેસ્ટ), મુંબઇ. (વૈરાગ્યદેશનાદક્ષ પૂ. આ. શ્રીહેમચંદ્રસૂરિ મ. સા.ની પ્રેરણાથી)

૨૦) શ્રી આંબાવાડી શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, અમદાવાદ. (પૂ. મુનિરાજ શ્રી કલ્યાણબોધિ વિજયજી મ.ની પ્રેરણાથી)

૨૧) શ્રી જૈન શ્વેતાંબર મૂર્તિપૂજક સંઘ, વાસણા, અમદાવાદ.
(પૂ. આચાર્યશ્રી નરરત્નસૂરિ મ.ના સંયમજીવનની અનુમોદનાર્થે પૂજ્ય તપસ્વીરત્ન આચાર્ય શ્રી હિમાંશુસૂરીશ્વરજી મ. સા.ની પ્રેરણાથી)

૨૨) શ્રી પ્રેમવર્ધક આરાધક સમિતિ, ધરણિધર દેરાસર, પાલડી, અમદાવાદ. (પૂ. ગણિવર્ય શ્રીઅક્ષયબોધિવિજયજી મ.ની પ્રેરણાથી)

૨૩) શ્રી મહાવીર જૈન શ્વેતા. મૂર્તિપૂજક સંઘ, પાલડી, અમદાવાદ. શેઠ કેશવલાલ મૂળચંદ જૈન ઉપાશ્રય. (પ. પૂ. આચાર્યશ્રી રાજેન્દ્રસૂરિ મહારાજ સા.ની પ્રેરણાથી)

૨૪) શ્રી માટુંગા જૈન શ્વેતાં. મૂર્તિપૂજક તપગચ્છ સંઘ એન્ડ ચેરિટીઝ, માટુંગા, મુંબઇ.

૨૫) શ્રી જીવિત મહાવીરસ્વામી જૈન સંઘ, નાંદિયા. (રાજસ્થાન)
(પૂ. ગણિવર્ય શ્રી અક્ષયબોધિવિ. મ.સા. તથા મુનિરાજશ્રી મહાબોધિવિ. મ.સા.ની પ્રેરણાથી)

૨૬) શ્રી વિશા ઓશવાલ તપાગચ્છ જૈન સંઘ, ખંભાત. (વૈરાગ્યદેશનાદક્ષ પ. પૂ. આચાર્યદેવશ્રી હેમચંદ્રસૂરિ મ. સા.ની પ્રેરણાથી)

૨૭) શ્રી વિમલ સોસાયટી આરાધક જૈન સંઘ, બાણગંગા, વાલકેશ્વર મુંબઇ-૪૦૦ ૦૦૭.

૨૮) શ્રી પાલિતાણા ચાતુર્માસ આરાધના સમિતિ. (પ. પૂ. વૈરાગ્યદેશનાદક્ષ આચાર્યદેવ શ્રીમદ્વિજયહેમચંદ્રસૂરીશ્વરજી મ. સા.ના સં. ૨૦૫૩ના પાલિતાણા મધ્યે ચાતુર્માસ પ્રસંગે જ્ઞાનનિધિમાંથી)

૨૯) શ્રીસીમંધરજિન આરાધક ટ્રસ્ટ, એમરલ્ડ એપાર્ટમેન્ટ, અંધેરી (ઇ), મુંબઇ. (મુનિરાજશ્રી નેત્રાનંદવિજયજી મ. સા.ની પ્રેરણાથી)

૩૦) શ્રી ધર્મનાથ પોપટલાલ હેમચંદ જૈન શ્વેતાંબર મૂર્તિપૂજક સંઘ, જૈનનગર, અમદાવાદ. (પ.પૂ. મુનિરાજશ્રી સંયમબોધિવિજયજી મ.સા.ની પ્રેરણાથી)

૩૧) શ્રીકૃષ્ણનગર જૈન શ્વેતાંબર મૂર્તિપૂજક સંઘ, સૈજપુર, અમદાવાદ. (પ.પૂ.આચાર્યદેવ શ્રીમદ્‌વિજયહેમચંદ્રસૂરીશ્વરજી મ. સા.ના કૃષ્ણનગર મધ્યે સંવત ૨૦૫૨ના ચાતુર્માસ નિમિત્તે પ. પૂ. મુનિરાજશ્રી કલ્યાણબોધિવિજયજી મ. સા.ની પ્રેરણાથી)

૩૨) શ્રી બાબુભાઇ સી. જરીવાલા ટ્રસ્ટ, નિઝામપુરા, વડોદરા-૨. (પ. પૂ. મુનિરાજ શ્રી કલ્યાણબોધિવિજયજી મ. સા.ની પ્રેરણાથી)

૩૩) શ્રી ગોડી પાર્શ્વનાથજી ટેમ્પલ ટ્રસ્ટ, પુના. (પ.પૂ. ગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્‌વિજય જયઘોષસૂરીશ્વરજી મ.સા. તથા પૂ. મુનિરાજશ્રી મહાબોધિવિજયજી મ.સા.ની પ્રેરણાથી)

૩૪) શ્રી શંખેશ્વર પાર્શ્વનાથ જૈન શ્વેતાંબર મંદિર ટ્રસ્ટ, ભવાની પેઠ, પુના. (પૂ. મુનિરાજ શ્રી અનંતબોધિવિજયજી મ. સા.ની પ્રેરણાથી)

૩૫) શ્રી રાંદેર રોડ જૈન સંઘ, સુરત. (પૂ.પં. શ્રી અક્ષયબોધિ વિજયજી મ. સા.ની પ્રેરણાથી)

૩૬) શ્રી શ્વેતાંબર મૂર્તિપૂજક તપાગચ્છ દાદર જૈન પૌષધશાલા ટ્રસ્ટ, આરાધના ભુવન, દાદર, મુંબઇ. (મુનિરાજશ્રી અપરાજિતવિજયજી મ. સા.ની પ્રેરણાથી)

૩૭) શ્રી જવાહરનગર જૈન શ્વેતા. મૂર્તિ. સંઘ, ગોરેગાવ, મુંબઇ. (પૂ. આ. શ્રી રાજેન્દ્રસૂરિ મ. સા.ની પ્રેરણાથી)

૩૮) શ્રી કન્યાશાળા જૈન ઉપાશ્રય, ખંભાત. (પ.પૂ. સા. શ્રી રંજનશ્રીજી મ. સા., પૂ. પ્ર. સા. શ્રી ઈંદ્રશ્રીજી મ. સા.ના સંયમજીવનની અનુમોદનાર્થે પ. પૂ. સા. શ્રી વિનયપ્રભાશ્રીજી મ. સા., પ. પૂ. સા.શ્રી વસંતપ્રભાશ્રીજી મ. સા. તથા પ.પૂ. સાધ્વીજી શ્રી સ્વયંપ્રભાશ્રીજી મ. સા.ની પ્રેરણાથી)

૩૯) શ્રી માટુંગા જૈન શ્વેતાંબર મૂર્તિપૂજક તપાગચ્છ સંઘ એન્ડ ચેરીટીઝ, માટુંગા, મુંબઇ. (પ. પૂ. પંન્યાસપ્રવર શ્રી જયસુંદરવિજયજી મ. સા.ની પ્રેરણાથી)

૪૦) શ્રી શંખેશ્વર પાર્શ્વનાથ શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, ૬૦ ફુટ રોડ, ઘાટકોપર (ઈસ્ટ) (પૂ. પં. શ્રી વરબોધિવિજયજી ગણિવર્યની પ્રેરણાથી)

૪૧) શ્રી આદિનાથ શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, નવસારી.
(પ.પૂ.આ. શ્રી ગુણરત્નસૂરિ મ.ના શિષ્ય પૂ. પંન્યાસજી શ્રી પુણ્યરત્નવિજયજી ગણિવર્ય તથા પૂ.પં. યશોરત્નવિજયજી ગણિવર્યની પ્રેરણાથી)

૪૨) શ્રી કોઇમ્બતુર જૈન શ્વેતાંબર મૂર્તિપૂજક સંઘ, કોઇમ્બતુર.

૪૩) શ્રી પંકજ સોસાયટી જૈન સંઘ ટ્રસ્ટ, પાલડી, અમદાવાદ. (પ. પૂ. આ. શ્રી ભુવનભાનુસૂરિ મ. સા.ની ગુરુમૂર્તિ પ્રતિષ્ઠા પ્રસંગે થયેલ આચાર્ય-પંન્યાસ-ગણિ પદારોહણ, દીક્ષા વગેરે નિમિત્તે થયેલ જ્ઞાનનિધિમાંથી.)

૪૪) શ્રી મહાવીરસ્વામી જૈન શ્વેતાંબર મૂર્તિપૂજક દેરાસર, પાવાપુરી, ખેતવાડી, મુંબઇ. (પૂ. મુનિરાજશ્રી રાજપાલવિજયજી મ.સા. તથા પૂ.પં. શ્રી અક્ષયબોધિવિ. મ.સા.ની પ્રેરણાથી)

૪૫) જગદ્‌ગુરુ શ્રી હીરસૂરીશ્વરજી શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ ટ્રસ્ટ, મલાડ (પૂર્વ), મુંબઇ.

૪૬) શ્રી પાર્શ્વનાથ શ્વેતાં. મૂર્તિપૂજક જૈન સંઘ, સાંઘાણી એસ્ટેટ, ઘાટકોપર (વેસ્ટ), મુંબઇ. (પ. પૂ. મુનિરાજશ્રી કલ્યાણબોધિવિજયજી મ. સા.ની સંઘમાં થયેલ ગણિ પદવીની અનુમોદનાર્થે)

૪૭) શ્રી ધર્મનાથ પોપટલાલ હેમચંદ જૈન શ્વેતાં. મૂર્તિપૂજક સંઘ, જૈનનગર, અમદાવાદ. (પૂ. મુનિરાજશ્રી સત્યસુંદર વિ. મ.સા.ની પ્રેરણાથી)

૪૮) રતનબેન વેલજી ગાલા પરિવાર, મુલુંડ, મુંબઇ. (પ્રેરક-પૂ. મુનિરાજશ્રી રત્નબોધિવિજયજી મ. સા.)

૪૯) શ્રી મરીન ડ્રાઇવ જૈન આરાધક ટ્રસ્ટ, મુંબઇ.

૫૦) શ્રી સહસ્રફણા પાર્શ્વનાથ જૈન દેરાસર ઉપાશ્રય ટ્રસ્ટ, બાબુલનાથ, મુંબઇ (પ્રેરક-મુનિરાજ શ્રી સત્ત્વભૂષણવિજયજી મ.)

૫૧) શ્રી ગોવાલીયા ટેંક જૈન સંઘ મુંબઇ. (પ્રેરક : પૂ. ગણિવર્યશ્રી કલ્યાણબોધિ વિજયજી મ.સા.)

૫૨) શ્રી વિમલનાથ જૈન દેરાસર આરાધક સંઘ, બાણગંગા, મુંબઇ.

૫૩) શ્રી વાડિલાલ સારાભાઇ દેરાસર ટ્રસ્ટ પ્રાર્થના સમાજ, મુંબઇ (પ્રેરક : મુનિરાજશ્રી રાજપાલવિજયજી તથા પંન્યાસ શ્રીઅક્ષયબોધિવિજયજી ગણિવર.)

૫૪) શ્રી પ્રિન્સેસ સ્ટ્રીટ, લુહારચાલ જૈન સંઘ. (પ્રેરકઃ પૂ. ગણિવર્ય શ્રી કલ્યાણબોધિ વિજયજી મ.સા.)

૫૫) શ્રી ધર્મશાંતિ ચેરીટેબલ ટ્રસ્ટ, કાંદિવલી (ઈસ્ટ), મુંબઈ. (પ્રેરક-મુનિરાજશ્રી રાજપાલવિજયજી તથા પં.શ્રી અક્ષયબોધિવિજયજી ગણિવર)

૫૬) સા. શ્રી સૂર્યયશાશ્રીજી તથા સા. શ્રી સુશીલયશાશ્રીના પાર્લા (ઈ) કૃષ્ણકુંજમાં થયેલ ચોમાસાની આવકમાંથી.

૫૭) શ્રી પ્રેમવર્ધક દેવાસ શ્વે. મૂર્તિપૂજક જૈન સંઘ, દેવાસ, અમદાવાદ (પ્રેરક-પૂ.આ. શ્રી હેમચંદ્રસૂરિજી મ.સા. તથા પૂ. મુનિરાજશ્રી કલ્યાણબોધિવિજયજી મ.)

૫૮) શ્રી પાર્શ્વનાથ જૈન સંઘ, સમારોડ, વડોદરા (પ્રેરક-પંન્યાસપ્રવર શ્રી કલ્યાણબોધિ વિજયજી ગણિવર્ય)

૫૯) શ્રી મુનિસુવ્રતસ્વામી જૈન દેરાસર ટ્રસ્ટ-કોલ્હાપુર (પ્રેરક-પૂ.મુનિરાજશ્રી પ્રેમસુંદરવિજયજી મ.)

૬૦) શ્રી ધર્મનાથ પો. હે. જૈનનગર શ્વે. મૂ. પૂ. સંઘ, અમદાવાદ (પ્રેરક - પ. પૂ. પંન્યાસપ્રવર શ્રી પુણ્યરત્નવિજયજી ગણિ)

૬૧) શ્રી દિપક જ્યોતિ જૈન સંઘ, કાલાચોકી, પરેલ, મુંબઈ (પ્રેરક - પૂ.પં. શ્રી ભુવનસુંદરવિજયજી ગણિવર્ય તથા પૂ.પં. શ્રી ગુણસુંદરવિજયજી ગણિવર્ય)

૬૨) શ્રી પદ્મમણિ જૈન શ્વેતાંબર તીર્થ પેઢી - પાબલ, પુના (પ. પૂ. પંન્યાસજી શ્રી કલ્યાણબોધિવિજયજી ગણિની વર્ધમાન તપની સો ઓળીની અનુમોદનાર્થે પ. પૂ. પંન્યાસ શ્રીવિશ્વકલ્યાણવિજયજી ગણિવર્યની પ્રેરણાથી)

૬૩) ૐકારસૂરીશ્વરજી આરાધના ભુવન - સુરત (પ્રેરક- આ. ગુણરત્નસૂરિ મ. ના શિષ્ય મુનિરાજશ્રી જિનેશરત્નવિજયજી મ.)

૬૪) શ્રી ગોડી પાર્શ્વનાથ જૈન શ્વેતાંબર મૂર્તિપૂજક સંઘ, નાયડુ કોલોની, ઘાટકોપર(ઈસ્ટ), મુંબઈ.

૬૫) શ્રી આદીશ્વર શ્વેતાંબર મૂર્તિપૂજક સંઘ, ગોરેગાવ-મુંબઇ.

૬૬) શ્રી આદીશ્વર શ્વેતાંબર ટ્રસ્ટ, સાલેમ(પ્રેરક-પ.પૂ. ગચ્છાધિપતિ આ.શ્રી જયઘોષસૂરીશ્વરજી મ.સા.)

૬૭) શ્રી ગોવાલિયા ટેંક જૈન સંઘ, મુંબઈ.

૬૮) શ્રી વિલેપાર્લા શ્વે. મૂ.પૂ. જૈન સંઘ એન્ડ ચેરીટીઝ, વિલેપાર્લા (પૂર્વ), મુંબઈ.

૬૯) શ્રી નેનસી કોલોની જૈન શ્વે. મૂ. પૂ. સંઘ, બોરીવલી (વેસ્ટ), મુંબઈ.

૭૦) માતુશ્રી રતનબેન નરસી મોનજી સાવલા પરિવાર. (પૂ. પં. શ્રી કલ્યાણબોધિવિજયજીના શિષ્ય મુનિરાજશ્રી ભકિતવર્ધનવિજયજી મ. સા. તથા પૂ. સાધ્વીજી શ્રી જયશીલાશ્રીજી મ. ના સંસારી સુપુત્ર રાજનની પુણ્યસ્મૃતિ નિમિત્તે હ. : સુપુત્રો નવીનભાઈ, ચુનીલાલ, દિલીપ, હિતેશ.

૭૧) શ્રી સીમંધર જિન આરાધક ટ્રસ્ટ, એમરલ્ડ એપાર્ટમેન્ટ, અંધેરી (ઇ.) મુંબઇ (પ. પૂ. પંન્યાસપ્રવર શ્રી કલ્યાણબોધિવિજયજી મ. સા.ની પ્રેરણાથી)

૭૨) શ્રી ધર્મવર્ધક શ્વે. મૂ. પૂ. જૈન સંઘ, કાર્ટર રોડ નં. ૧, બોરીવલી (પ. પૂ. વૈરાગ્યદેશનાદક્ષ આચાર્ય ભગવંત શ્રી વિજયહેમચંદ્રસૂરીશ્વરજી મ.સા. તથા પંન્યાસપ્રવર શ્રી કલ્યાણબોધિ વિજયજી ગણિવર્યની પ્રેરણાથી)

૭૩) શ્રી ઉમરા જૈન સંઘની શ્રાવિકાઓ (જ્ઞાનનિધિમાંથી) (પ્રેરક : પ.પૂ. મુનિરાજ શ્રી જિનેશરત્નવિજયજી મ.સા.)

૭૪) શ્રી કેશરિયા આદિનાથ જૈન સંઘ, ઝાડોલી, રાજ. (પ્રેરક : પ.પૂ. મુ. શ્રી મેરૂચંદ્ર વિ. મ. તથા પં. શ્રી હિરણ્યબોધિ વિ. ગ.)

૭૫) શ્રી ધર્મશાંતિ ચેરીટેબલ ટ્રસ્ટ, કાંદીવલી, મુંબઈ (પ્રેરક : પ.પૂ. મુનિરાજ શ્રી હેમદર્શનવિ. મ.)

૭૬) શ્રી જૈન શ્વે. મૂ. સુધારાખાતા પેઢી, મહેસાણા.

૭૭) શ્રી વિક્રોલી સંભવનાથ શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ, વિક્રોલી (ઈ), મુંબઈની આરાધક બહેનો તરફથી (જ્ઞાનનિધિમાંથી)

૭૮) શ્રી કે.પી. સંઘવી ચેરીટેબલ ટ્રસ્ટ, સુરત, મુંબઈ. (પ્રેરક - પ.પૂ. વૈરાગ્યદેશનાદક્ષ આચાર્ય ભ. શ્રીમદ્‌વિજય હેમચંદ્રસૂરીશ્વરજી મ.સા. તથા પંન્યાસપ્રવર શ્રી કલ્યાણબોધિ વિજયજી ગણિવર્ય)

૭૯) શાહ જેસિંગલાલ મોહનલાલ આસેડાવાલાના સ્મરણાર્થે હ. પ્રકાશચંદ્ર જે. શાહ (આફ્રિકાવાળા) (પ્રેરક : પં. કલ્યાણબોધિ વિ. ગણિવર)

૮૦) શેઠ કનૈયાલાલ ભેરમલજી ચેરીટેબલ ટ્રસ્ટ, ચંદનબાળા, વાલકેશ્વર, મુંબઈ.

૮૧) શ્રી નવા ડીસા શ્વે.મૂ.પૂ. જૈન સંઘ (બનાસકાંઠા)

૮૨) શ્રી પાલનપુર જૈન મિત્ર મંડળ સંઘ, બનાસકાંઠા (પ્રેરક - પૂ. પંન્યાસપ્રવર કલ્યાણબોધિ વિજયજી ગણિવર્ય.)

૮૩) શ્રી ઉંઝા જૈન મહાજન (પ્રેરક - પૂ. પંન્યાસપ્રવર શ્રી અપરાજિતવિજયજી ગણિવર્ય તથા પૂ. મુનિરાજ શ્રી હેમદર્શનવિ. મ.)

૮૪) શ્રી સીમંધર જૈન દેરાસર, એમરલ્ડ એપાર્ટમેન્ટ, અંધેરી (પૂર્વ), મુંબઈ. (પ્રેરક - પૂ.સા. શ્રી સ્વયંપ્રભાશ્રીજીના શિષ્યા પૂ.સા. શ્રી તત્ત્વપ્રજ્ઞાશ્રીજી આદિ)

૮૫) શ્રી બાપુનગર શ્વે. મૂ. જૈન સંઘ, અમદાવાદ.

૮૬) શ્રી શેફાલી જૈન સંઘ, અમદાવાદ.

૮૭) શાન્તાબેન મણિલાલ ઘેલાભાઈ પરીખ ઉપાશ્રય, સાબરમતી, અમદાવાદ. (પ્રેરક- સા. શ્રી સુવર્ણપ્રભાશ્રીજી મ. તથા સા.શ્રી રત્નત્રયાશ્રીજી મ.)

૮૮) શ્રી આડેસર વિશા શ્રીમાળી જૈન દેરાવાસી સંઘ (પ્રેરક - આ. શ્રી કલાપ્રભસૂરીશ્વરજી મ.સા.)

૮૯) શ્રીમદ્ યશોવિજયજી જૈન સંસ્કૃત પાઠશાલા એવં શ્રી શ્રેયસ્કર મંડલ, મહેસાણા.

૯૦) શ્રી તપાગચ્છ સાગરગચ્છ આણંદજી કલ્યાણજી પેઢી, વિરમગામ (પ્રેરક : આ. શ્રી કલ્યાણબોધિસૂરીશ્વરજી મ.)

૯૧) શ્રી મહાવીર શ્વે. મૂર્તિપૂજક જૈન સંઘ, વિજયનગર, નારણપુરા, અમદાવાદ

૯૨) શ્રી સીમંધરસ્વામિ જૈન સંઘ, અંધેરી (પૂર્વ) (પ્રેરક : સા. શ્રી સ્વયંપ્રભાશ્રીજી મ.)

૯૩) શ્રી ચકાલા શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ (પ્રેરક : આ. શ્રી કલ્યાણબોધિસૂરીશ્વરજી મ.)

૯૪) શ્રી અઠવાલાઈન્સ શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ તથા શ્રી ફૂલચન્દ કલ્યાણચંદ ઝવેરી ટ્રસ્ટ, સુરત

૯૫) શ્રી જૈન શ્વેતામ્બર મૂર્તિપૂજક તપાગચ્છ સંઘ - સંસ્થાન, બ્યાવર (રાજસ્થાન) (પ્રેરક : આ. શ્રી પુણ્યરત્નસૂરીશ્વરજી મ.સા.)

૯૬) પાલનપુરનિવાસી મંજૂલાબેન રસિકલાલ શેઠ (હાલ મુંબઈ), (પ્રેરક : આ. શ્રી કલ્યાણબોધિસૂરીશ્વરજી મ.)

૯૭) શ્રી શંખેશ્વર પાર્શ્વનાથ શ્વે.મૂ.જૈન સંઘ, પદ્માવતી એપાર્ટમેન્ટ, નાલાસોપારા (ઈ), (પ્રેરક- પ.પૂ.આ. શ્રી હેમચંદ્રસૂરીશ્વરજી મ.સા.)

૯૮) શ્રી ઋષભ પ્રકાશભાઈ ગાલા, સંઘાણી એસ્ટેટ, ઘાટકોપર (વે.), (પ્રેરક : પ.પૂ.આ. શ્રી હેમચંદ્રસૂરીશ્વરજી મ.સા.)

૯૯) શ્રી શંખેશ્વર પાર્શ્વનાથ આરાધક ટ્રસ્ટ, પુખરાજ રાયચંદ આરાધના ભવન, સાબરમતી (પ.પૂ. વ્યાખ્યાનવાચસ્પતિ આ.દે. શ્રીમદ્વિજય રામચન્દ્રસૂરીશ્વરજી મ.સા.ના ઉપકારોની સ્મૃતિમાં)

૧૦૦) શ્રી કુંદનપુર જૈન સંઘ, કુંદનપુર - રાજસ્થાન, હ. શ્રી શાંતિલાલજી મુથા.

શ્રી ભુવનભાનુસૂરિ જન્મશતાબ્દીએ નવલું નજરાણું

# જ્ઞાનામૃતં ભોજનમ્...

પરિવેષક

પ.પૂ. વૈરાગ્યદેશનાદક્ષ આ. **હેમચન્દ્રસૂરીશ્વર** શિષ્ય

આ. **કલ્યાણબોધિસૂરીશ્વરજી** મ.સા.

| | | |
|---|---|---|
| ૧. | સિદ્ધાન્તમહોદધિ મહાકાવ્યમ્ - સાનુવાદ. | |
| ૨. | ભુવનભાનવીયમ્ મહાકાવ્યમ્ - સાનુવાદ, સવાર્તિક. | |
| ૩. | સમતાસાગર મહાકાવ્યમ્ - સાનુવાદ. | |
| ૪. | પરમપ્રતિષ્ઠા કાવ્યમ્ - સાનુવાદ, કલાત્મક આલ્બમસાથે. | |
| ૫. | જીરાવલીયમ્ કાવ્યમ્ - સાનુવાદ. | |
| ૬. | પ્રેમમંદિરમ્ - | કલ્યાણમંદિર પાદપૂર્તિ સ્તોત્ર-સાનુવાદ, સવાર્તિક. |
| ૭. | છંદોલંકારનિરૂપણમ્ - | કવિ બનવાનો શોર્ટકટ-પોકેટ ડાયરી. |
| ૮. | તત્ત્વોપનિષદ્ - | શ્રી સિદ્ધસેનદિવાકરસૂરિકૃત ષષ્ઠી, અષ્ટમી, નવમી, અષ્ટાદશી **દ્વાત્રિંશિકા** પર સંસ્કૃત વૃત્તિ - સાનુવાદ. |
| ૯. | વાદોપનિષદ્ - | |
| ૧૦. | વેદોપનિષદ્ - | |
| ૧૧. | શિક્ષોપનિષદ્ - | |
| ૧૨. | સ્તવોપનિષદ્ - | શ્રી સિદ્ધસેનદિવાકરસૂરિ તથા કલિકાલસર્વજ્ઞ શ્રી હેમચન્દ્રાચાર્ય કૃત અદ્ભુત સ્તુતિઓના રહસ્ય -સાનુવાદ. |
| ૧૩. | સત્ત્વોપનિષદ્ - | **યોગસાર** ચતુર્થપ્રકાશવૃત્તિ - સાનુવાદ. (માત્ર સંયમી ભગવંતો માટે) |
| ૧૪. | દેવધર્મોપનિષદ્ - | મહોપાધ્યાય શ્રી યશોવિજયજી કૃત **દેવધર્મપરીક્ષા** ગ્રંથની ગુર્જર ટીકા. |
| ૧૫. | પરમોપનિષદ્ - | મહોપાધ્યાય શ્રીયશોવિજયજી આદિ કૃત પાંચ પરમકૃતિઓ પર ગુર્જરવૃત્તિ, |

| | | |
|---|---|---|
| ૧૬. | **આર્ષોપનિષદ્-૧** | શ્રી પ્રત્યેકબુદ્ધપ્રણીત **ઋષિભાષિત** (ઈસિભાસિયાઈ) **આગમસૂત્ર** પર સંસ્કૃત ટીકા. |
| ૧૭. | **આર્ષોપનિષદ્-૨** | |
| ૧૮. | **વૈરાગ્યોપનિષદ્** | શ્રી હરિહરોપાધ્યાયકૃત **ભર્તૃહરિનિર્વેદ** નાટક-ભાવાનુવાદ. |
| ૧૯. | **સૂક્તોપનિષદ્**- | પરદર્શનીય અદ્ભુત સૂક્તોનો સમુચ્ચય તથા રહસ્યાનુવાદ. |
| ૨૦. | **કર્મોપનિષદ્**- | સિદ્ધાન્તમહોદધિ શ્રી પ્રેમસૂરીશ્વરજી કૃત **કર્મસિદ્ધિ** ગ્રંથ પર ભાવાનુવાદ. |
| ૨૧. | **વિશેષોપનિષદ્**- | શ્રી સમયસુંદર ઉપાધ્યાયજી કૃત વિશેષ-શતક ગ્રંથ પર ગુર્જર ભાવાનુવાદ. |
| ૨૨. | **હિંસોપનિષદ્**- | શ્રી હરિભદ્રસૂરિકૃત સ્વોપજ્ઞ અવચૂરિ અલંકૃત **હિંસાષ્ટક** ગ્રંથ પર ગુર્જર ટીકા. |
| ૨૩. | **અહિંસોપનિષદ્**- | અજ્ઞાતકર્તૃક (પ્રવાદતઃ શ્રી હરિભદ્રસૂરિ મહારાજા કૃત) **નાનાચિત્તપ્રકરણ** પર સંસ્કૃત ટીકા-સાનુવાદ. |
| ૨૪. | **ધર્મોપનિષદ્**- | વેદથી માંડીને બાઈબલ સુધીના ધર્મશાસ્ત્રોના રહસ્ય. |
| ૨૫. | **શમોપનિષદ્**- | નવનિર્મિત **સપ્તક પ્રકરણ** - સાનુવાદ. |
| ૨૬. | **લોકોપનિષદ્**- | શ્રી હરિભદ્રસૂરિકૃત **લોકતત્ત્વનિર્ણય** ગ્રંથ પર સંસ્કૃત વૃત્તિ (ભાગ-૧). |
| ૨૭. | **આત્મોપનિષદ્**- | શ્રી ઉદયનાચાર્યકૃત **આત્મતત્ત્વવિવેક** ગ્રંથ પર ગુર્જર ટીકા (ભાગ-૧). |
| ૨૮. | **સામ્યોપનિષદ્**- | મહો. શ્રી યશોવિજયજી કૃત **સમાધિ - સામ્યદ્વાત્રિંશિકા** સચિત્ર સાનુવાદ. |
| ૨૯. | **આગમોપનિષદ્**- | **વિસંવાદપ્રકરણ** (આગમપ્રતિપક્ષનિરાકરણ) પર વિશદ વિવરણ. |

૩૦. **સ્તોત્રોપનિષદ્**- શ્રી વજ્રસ્વામિકૃત શ્રી **ગૌતમસ્વામીસ્તોત્ર** -સચિત્ર સાનુવાદ.

૩૧.–૩૨. **દર્શનોપનિષદ્**- શ્રી માધવાચાર્યકૃત **સર્વદર્શનસંગ્રહ** ગ્રંથ પર ગુર્જર ટીકા. ભાગ : ૧-૨

૩૩-૩૪-૩૫. **રામાયણના તેજ કિરણો** - રામાયણી માટે પર્યાપ્ત આલંબન. ભાગ-૧-૨-૩.

૩૬. **જ્ઞાનોપનિષદ્**- **અષ્ટાવક્ર ગીતા** પર સંસ્કૃત વૃત્તિ.

૩૭.–૩૮. **સંબોધોપનિષદ્** સટીક શ્રી રત્નશેખરસૂરિકૃત **સંબોધસપ્તતિ** ગ્રંથ પર ગુર્જરવૃત્તિ. ભાગ : ૧-૨

૩૯. **ઈષ્ટોપનિષદ્**- શ્રી પૂજ્યપાદસ્વામિકૃત **ઈષ્ટોપદેશ** ગ્રંથ પર સંસ્કૃત ટીકા-સાનુવાદ.

૪૦.–૪૧. **વિમોહોપનિષદ્**- શ્રી યશપાલમંત્રીકૃત **મોહરાજપરાજય** નાટક પર વિષમપદ વ્યાખ્યા અને અનુવાદ. ભાગ : ૧-૨

૪૨. **શ્રામણ્યોપનિષદ્**- દશવિધ યતિધર્મ પર નવનિર્મિત પ્રકરણ (બીજું નામ શ્રમણશતક).

૪૩. **સફળતાનું સરનામું** - સફળતાની ઈચ્છુક વ્યક્તિએ વાંચવા યોગ્ય ગુર્જર ગ્રંથ.

૪૪. **પ્રસન્નતાની પરબ** - વક્તા-શ્રોતા બન્નેને ઉપયોગી વૈરાગ્યાદિ રસઝરણા.

૪૫. **સૂત્રોપનિષદ્**- **શ્રીસૂત્રકૃતાંગસૂત્ર** દ્વિતીય શ્રુતસ્કંધની સંસ્કૃત સંગ્રહણી. શ્રી સૂત્રકૃતાંગદીપિકા ભાગ-૨ ના પુનઃસંપાદન સાથે.

૪૬. **પ્રવ્રજ્યોપનિષદ્**- અજ્ઞાતકર્તૃક **પ્રવ્રજ્યાવિધાન** પર ગુર્જર વૃત્તિ.

૪૭. **દેશનોપનિષદ્**- વૈરાગ્યદેશનાદક્ષ પૂ. ગુરુદેવશ્રીના વાચનાઓનું સંસ્કૃત કાવ્યમય અવતરણ.

૪૮. **જીરાવલા જુહારીએ** - ગીત ગુંજન.

૪૯. **અસ્પર્શોપનિષદ્**- મહોપાધ્યાય શ્રી યશોવિજયજીકૃત **અસ્પૃશદ્ગતિવાદ** પર ગુર્જર વૃત્તિ.

૫૦. **હિતોપનિષદ્**- **અધ્યાત્મકલ્પદ્રુમ**ના યતિશિક્ષોપદેશાધિકાર તથા **યતિશિક્ષા-પંચાશિકા** પર ગુર્જર વાર્તિક+સાનુવાદ સાવચૂરિ **યતિવિચાર**.

૫૧. **ઉપદેશોપનિષદ્**- **ઉપદેશરત્નકોષ** પર સંસ્કૃતવૃત્તિ-સાનુવાદ.

૫૨. **પ્રાર્થનોપનિષદ્**- અલંકારિક સ્તુતિઓ પર તાત્પર્યવૃત્તિ-સાનુવાદ.

૫૩. **સદ્બોધોપનિષદ્**- **સદ્બોધચન્દ્રોદય** પંચાશિકા પર સંસ્કૃત સાનુવાદ વાર્તિક.

૫૪.
૫૫. **અંગોપનિષદ્**- અદ્યાવધિ અમુદ્રિત ગ્રંથ શ્રી **અંગચૂલિકાસૂત્ર** પર સંસ્કૃત વૃત્તિ ભાગ-૧-૨

૫૬. **વર્ગોપનિષદ્**- અદ્યાવધિ અમુદ્રિત ગ્રંથ શ્રી **વર્ગચૂલિકાસૂત્ર** પર સંસ્કૃત વૃત્તિ.

૫૭. **આગમની આછી ઝલક** ૪૫ આગમ સંક્ષિપ્ત પરિચય

૫૮. **જૈનં જયતિ શાસનમ્** - બુદ્ધિજીવીઓને અવિશ્વસનીય જૈન સિદ્ધાન્તોની આધુનિક પ્રસંગો દ્વારા સિદ્ધિ.

૫૯. **આઈ આઈ રે અંજનશલાકા** - અંજનશલાકા-સ્ટેજ પ્રોગ્રામ માટે આલંબન.

૬૦. **પંચકોપનિષદ્**- શ્રી હરિભદ્રસૂરિ મહારાજા કૃત **જ્ઞાનપંચક-વિવરણ** ગ્રંથ પર નૂતન સંસ્કૃત વૃત્તિ.

૬૧. **અવધૂતોપનિષદ્**- શ્રી દત્તાત્રેય અવધૂત પ્રણીત **અવધૂતગીતા**ની મનનીય સૂક્તિઓ પર નૂતન સંસ્કૃત વૃત્તિ.

૬૨. **દુઃષમોપનિષદ્**- **દુઃષમગંડિકા** ગ્રંથ પર વિશદ વૃત્તિ, સાનુવાદ

૬૩. **પ્રથમોપનિષદ્**- રત્નાકર પચ્ચીશી-પ્રાચીન ટીકા આદિ વિશિષ્ટ કૃતિઓનું પ્રથમ પ્રકાશન.

૬૪. **અર્હન્નામસહસ્રસમુચ્ચય** - કલિકાલસર્વજ્ઞ શ્રી હેમચન્દ્રાચાર્યરચિત કૃતિ-સચિત્ર સંપાદન.

૬૫. **ઉપાસનોપનિષદ્**- પૂ. શ્રી હરિભદ્રસૂરિ મહારાજા કૃત **ધૂમાવલિ** + **સર્વજિનસાધારણસ્તવન** આ બે વિશિષ્ટ કૃતિઓ-સચિત્ર સાનુવાદ.

૬૬. **સુખોપનિષદ્**- **પરમસુખ**પ્રાપ્તિરૂપ ચિત્તશુદ્ધિફળ, સચિત્ર-સાનુવાદ.

૬૭. **દયોપનિષદ્**- **જીવદયા પ્રકરણ** પર નૂતન સંસ્કૃત વૃત્તિ-સાનુવાદ

૬૮. **શંખેશ્વર સ્તોત્ર**- મહો. યશોવિજયજી મહારાજાની કૃતિ, સચિત્ર-સાનુવાદ.

૬૯. **દાનાદિ પ્રકરણ**- શ્રી સૂરાચાર્યકૃત પ્રકરણ, ત્રુટિતકાવ્યપૂર્તિ + અનુવાદ સહ.

૭૦. **ધ્યાનોપનિષદ્** - પ.પૂ. આચાર્ય શ્રી ભુવનભાનુસૂરીશ્વરજી લિખિત **ધ્યાન અને જીવન** પુસ્તકનો સંસ્કૃત તાત્પર્યાનુવાદ.

૭૧. **પંચસૂત્રોપનિષદ્** - પ.પૂ. આચાર્ય શ્રી ભુવનભાનુસૂરીશ્વરજી લિખિત **ઉચ્ચ પ્રકાશના પંથે** પુસ્તકનો સંસ્કૃત તાત્પર્યાનુવાદ.

૭૨. **પૂર્ણોપનિષદ્**- મહો. યશોવિજયજી મહારાજા કૃત **જ્ઞાનસાર** અંતર્ગત પૂર્ણાષ્ટક સચિત્ર - સાનુવાદ.

७३. **મગ્નોપનિષદ્-** મહો. યશોવિજયજી મહારાજા કૃત **જ્ઞાનસાર** અંતર્ગત મગ્નાષ્ટક સચિત્ર-સાનુવાદ.

७४. **ગૌતમાષ્ટક-** પૂર્વાચાર્યકૃત મહાપ્રભાવક કૃતિ સચિત્ર - સાનુવાદ.

७५. **વીરોપનિષદ્-** શ્રીભદ્રબાહુસ્વામીકૃત **કલ્પસૂત્ર** અંતર્ગત પ્રભુ વીરનું સ્વરૂપ સચિત્ર-સાનુવાદ.

७६. **આચારોપનિષદ્-** દશ સામાચારી વિષયક નવનિર્મિત સંસ્કૃત પ્રકરણ-સાનુવાદ.

**७७ થી १२५- આનંદઘનની આત્માનુભૂતિ** અલગારી અવધૂત શ્રી આનંદઘનજી મહારાજ પ્રણીત આધ્યાત્મિક પદ આધારિત પરિશીલન શૃંખલા (સચિત્ર).

## सचित्र हिन्दी प्रकाशन

- **स्टोरी स्टोरी** - मोहक एवं बोधक कहानीओ का अनोखा संग्रह ।
- **डायमंड डायरी** - जिस के प्रत्येक पेज पर है अद्भुत हीरे।
- **लाइफ स्टायल** - जीवन जीने की... जीतने की कला की प्रस्तुति ।
- **एन्जोय जैनीझम** - जैन... प्रसन्नता का पथ ।

*To get* **peace of mind.**

*To be* **a best house holder.**

*To take Sainthood in proper way.*

*To be* **a supreme Saint.**

*To get the fruit of Sainthood.*

*Don't miss to read this book.*

MULTY GRAPHICS
(022) 23873222 23884222